सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

श्रुतम् मे गोपाय

२९ वर्षे
२ अङ्कः

भाद्रपदपूर्णिमा, वै० सं० २०३१
सितम्वर, १९७४ ई०

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

[त्रैमासिकी]

प्रधानसम्पादकः

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'

सह-सम्पादकः

डॉ० हरिश्चन्द्रमणित्रिपाठी

२९ वर्षे
२ अङ्कः

वार्षिकमूल्यम् १० रूप्यकाणि
प्रत्यङ्कमूल्यम् ३ रूप्यकाणि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

१.	चन्द्रमसः पौराणिकं स्वरूपम्—डॉ० श्रीकृष्णमणित्रिपाठी	१०९-१२५
२.	गतिभक्षणार्थकः √चर् (चर): अर्थविज्ञानम्—डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'	१२६-१३२
३.	भाषालक्षणलक्ष्यीकरणम्—सुशीलासर	१३३-१४७
४.	तात्पर्यवृत्तिविमर्शः—पं० श्रीवायुनन्दनपाण्डेयः	१४८-१६९
५.	कुमारदासस्य सौन्दर्यपरीक्षणम्—डॉ० दशरथद्विवेदी	१७०-१७९
६.	संस्कृतं शिल्पशास्त्रम्—श्री ति० गो० अनन्तसुब्रह्मण्यम्	१८०-१८६
७.	वैष्णवदर्शनेषु भक्तिस्वरूपविमर्शः—श्रीराजेन्द्रः	१८७-१९३
८.	जातकसारः—(लघुग्रन्थमाला)—डॉ० मुरलीधरचतुर्वेदः	१-७

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयानुसन्धानपत्रिका

२९ वर्षः | भाद्रपदपूर्णिमा, वि० सं० २०३१ | २ अङ्कः

चन्द्रमसः पौराणिकं स्वरूपम्

डॉ० श्रीकृष्णमणित्रिपाठी
व्याकरण-साहित्य-पुराणेतिहास-साङ्ख्ययोगाचार्यः, साहित्यरत्नम्,
एम० ए०, पुराणेतिहासविभागाध्यक्षचरः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

प्रायः प्रतिपुराणं भूगोल-खगोलसम्बन्धिनां विषयाणां विवेचनं विद्यत एव, परन्तु श्रीमद्भागवते, भविष्यपुराणे, कूर्मपुराणे, ब्रह्माण्डपुराणे च भूगोल-खगोलयोस्सविशेषं वर्णनं वर्तते। पुराणेषु सूर्य-चन्द्रादिग्रहोपग्रह-नक्षत्रमण्डल-राशिचक्र-शिशुमार-ध्रुवतारादीनामुत्पत्ति-गति-विगति-परिवर्त्तनादीनां रहस्यं विवेकपूर्णपद्धत्याऽङ्कितमस्ति। केषां ग्रहाणां कियत् परिमाणमस्ति, कस्को ग्रहः पृथिवीतः कियति दूरे वर्तते, कश्च ग्रहः कया गत्या कियता कालेन केन मार्गेण कथं भ्रमति, कस्य च ग्रहस्य कुत्र कदा कीदृशः प्रभावः प्रजायते? इत्यादीनां मौलिकविषयाणां तर्कसङ्गतमुत्तरं पुराणेषु वर्तते।

अखिललोकस्रष्टुर्भगवन्नारायणनाभिह्रदसमुद्भवसरोजजन्मनो ब्रह्मणो मानसः पुत्रो महर्षिरत्रिमुनिर्जातः। स च पित्रा विधात्रा सृष्ट्यर्थं समादिष्टो लोककल्याणकामनया मनोवाक्कायकर्मभिः शुभान्याचरन् काष्ठ-कुडच-शिलासन्निभ ऊर्ध्ववाहुः सन् दिव्यत्रिशतसहस्रवर्षपर्यन्तमनुत्तमं नाम सुदुश्चरं तपस्तेपे।[1] तेनानन्दमयं सकलक्लेशनिवारकं ब्रह्मविष्णुमहेशानामान्तरिकं तेजः प्रकाशितम्। तपःप्रभावात् सञ्जातनिर्मलकान्तेर्निर्निमेषं पश्यतस्तस्य मुनेर्नेत्राभ्यां तेजोविन्दुः सहसा प्रास्रवत्, यस्य ज्योत्स्नया समस्ते विश्वस्मिन् प्रकाशो जातः।[2]

---

१. आदिष्टो ब्रह्मणा पूर्वमत्रिः सर्गविधौ पुरा।
अनुत्तमं नाम तपः सृष्ट्यर्थं तप्तवान् प्रभुः॥
कर्मणा मनसा वाचा शुभान्येव समाचरन्।
काष्ठकुडचशिलाभूत ऊर्ध्ववाहुर्महाद्युतिः॥
(ब्र० पु० ६५।२-३)

२. अधः सुस्राव नेत्राभ्यां धाम तच्चाम्बुसम्भवम्।
दीपयद्विश्वमखिलं ज्योत्स्नया सचराचरम्॥
(म० पु० २३।२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लोकपितामहस्य विधेरादेशात् तत्तेजोबिन्दुं पुत्रेच्छया स्त्रीरूपेण दिशो धारयामासुः, किन्तु तत्तेजोबिन्दोर्दुर्धर्षतया ताश्चिरं धर्तुमसमर्थाः सत्यो भूमौ प्राक्षिपन्। ततो वेधा वसुधायां पतन्तं तमादाय पुरुषाकारं च विधाय स्ववेदमये रथे संस्थाप्य तेन सागरपर्यन्ताया वसुन्धराया एकविंशतिवारं प्रदक्षिणां कारयित्वा तं स्वं धाम नीतवान्।[1] तत्र देवर्षिभिः सोमदैवत्यैर्मन्त्रैः संस्तूयमानं तं भगवानब्जयोनिरशेषौषधि-द्विज-नक्षत्राणामाधिपत्येऽभ्यषेचयत्।

वायुपुराणस्यानुषङ्गपादे चाधिपत्याभिषेकसमये प्रजापतिरेव द्विजातीनां वीरुधां ग्रहनक्षत्राणां यज्ञानां तपसाञ्चाधिपत्ये सोममभिषिक्तवान्।

मत्स्यपुराणानुसारं तु राज्ञः पृथोः पृथिव्या आधिपत्येऽभिषेकानन्तरं तेनैवौषधि-यज्ञ-व्रत-तपसामधिपतिश्चन्द्रः कृतः।[2]

श्रीमद्भागवतेऽपि भगवान् व्यासदेवस्तदेव समर्थयति।[3]

चन्द्रमसो यत्तेजः पृथिव्यामपतत् तदौषधिरूपेण परिणतम्। अतोऽद्यत्वेऽपि तत्तेजसा रात्रौ जाज्वल्यमाना भवन्त्योषधयः। एवं चन्द्रमा ओषधिभिरद्यापि प्रजानां पालनं करोति। तेन स ओषधीशो द्विजराजश्च कथ्यते।[4] अत एव कोषकाराः—"ओषधीशो निशापतिः, द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः" इत्यादि चन्द्रपर्यायमाहुः। अत एव सोमोऽस्माकं ब्राह्मणानां राजेति संगच्छते।

---

१. आशास्तं मुमुचुर्गर्भम शक्ता धारणे ततः।
समादायाथ तं गर्भमेकीकृत्य चतुर्मुखः॥
युवानमकरोद् ब्रह्मा सर्वायुधधरं प्रभुम्।
(म० पु० २३।८)
स तेन रथमुख्येन सागरान्तां वसुन्धराम्॥
त्रिःसप्तकृत्वोऽतियशाश्चकाराभिप्रदक्षिणम्॥
(ब्र० पु० ६५।१४)

२. द्विजातीनां वीरुधां च नक्षत्राणां ग्रहैः सह।
यज्ञानां तपसां चैव सोमं राज्येऽभिषेचयत्॥
(वा० पु० ७०।३)
यदाभिषिक्तः सकलाधिपत्ये पृथुर्धरित्र्यामधिपो बभूव।
तदौषधीनामधिपं चकार यज्ञव्रतानां तपसां च चन्द्रम्॥
(म० पु० ८।२)

३. सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात्।
जातस्यासीत् सुतो धातुरत्रिः पितृसमो गुणैः॥
तस्य दृग्भ्योऽभवत् पुत्रः सोमोऽमृतमयः किल।
विप्रौषध्युडुगणानां ब्रह्मणा कल्पितः पतिः॥
(श्रीम० भा० ९।१४।२-३)

४. तद्दीप्तिरधिका तस्माद् रात्रौ भवति सर्वदा।
तेनौषधीशः सोमोऽभूद् द्विजेशश्च निगद्यते॥
(म० पु० २३।१३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एवं प्राप्ताधिपत्यः स भुवनत्रयं पालयन् विष्णुध्यानैकतत्परो दशपद्मवर्षपर्यन्तं तीव्रं तपः समाचरन् भगवन्तं विष्णुं प्रसाद्य तेन वरं वृणुष्वेत्युक्तः शक्रलोकजिगीषायाः, करिष्यमाणे स्वराजसूये यज्ञे प्रत्यक्षीभूय फलभोक्तृत्वस्य च वरं ययाचे[1]। ततो भगवता विष्णुना तथास्त्वित्युक्त्वाऽन्तर्हिते तस्मिन्नयं तपसो विरम्य महतोत्साहेन ससम्भारं राजसूयं नाम महायज्ञमाजह्रे, यत्र महर्षिरत्रिर्होता, भृगुरध्वर्युः, हिरण्यगर्भ उद्गाता, स्वयं ब्रह्मैव ब्रह्मा, उपद्रष्टा साक्षाद्धरिः, सदस्याश्च सनकादयो मुनयोऽभूवन्[2]।

ईदृशस्यापूर्वस्य राजसूययज्ञस्य सम्पादनप्रभावादत्युत्कृष्टाधिपत्याधिष्ठातृत्वाच्चैनं मद आविवेश। मदावलेपाच्चासौ भ्रान्तचित्तो दुर्बुद्धया विक्षिप्तः सन् देवगुरोः पत्नीं तारां बलाज्जहार। बृहस्पतिना तदनुरोधेन देवैर्भूयो याच्यमानो देवर्षिभिश्च प्रेर्यमाणोऽपि स तत्सुखपाशबद्धो न तां प्रत्यावर्तयत्[3]। तन्त्र-मन्त्र-यन्त्राद्यभिज्ञोऽपि वाक्पतिर्न तस्मै शापं प्रदातुं प्राभवत्, न वा कैरप्युपायैस्तस्यापकारं कर्तुं समर्थो जातः[4]।

देवगुरुं बृहस्पतिं प्रति द्वेषकारणाद् देवविद्वेषिणामसुराणामाचार्यः शुक्राचार्यश्चन्द्रमसः पार्ष्णिग्राहोऽजायत। उशनसः सहयोगाच्च दैत्यदानवनिकाया अपि तत्पक्षे महान्तमुद्योगं

---

१. ततो वव्रे वरान् सोमः शक्रलोकं जयाम्यहम्।
प्रत्यक्षमेव भोक्तारो भवन्तु मम मन्दिरे॥
राजसूये सुरगणा ब्रह्माद्याः सन्तु मे द्विजाः।
(म० पु० २३।१८½)

२. होतात्रिर्भृगुरध्वर्युरुद्गाताऽभूच्चतुर्मुखः।
ब्रह्मत्वमगमत्तस्य उपद्रष्टा हरिः स्वयम्।
सदस्याः सनकाद्यास्तु राजसूयविधौ स्मृताः॥
(म० पु० २३।२१½)

३. तदा तत्प्राप्य दुष्प्रापमैश्वर्यमृषिसंस्तुतम्।
सविभ्रममतिर्विप्रा विनयोऽविनयाहृतः॥
बृहस्पतेः स वै भार्यां तारां नाम यशस्विनीम्।
जहार सहसा सर्वानवमत्याङ्गिरःसुतान्॥
स याच्यमानो देवैश्च तथा ब्रह्मर्षिभिश्च ह।
नैव व्यसर्जयत् तारां तस्मायाङ्गिरसे तदा॥
(वा० पु० ९०।२७–२९)

४. शशाक शापं न च दातुमस्मै न तन्त्रशस्त्राग्निविषैरशेषैः।
तस्यापकर्तुं विविधैरुपायैर्नैवाभिचारैरपि वागधीशः॥
(म० पु० २३।३३)

उशनास्तस्य जग्राह पार्ष्णिमङ्गिरसो भवः।
स हि शिष्यो महातेजाः पितुः पूर्वं बृहस्पतेः॥
(ब्र० पु० ६५।३१)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चक्रुः । बृहस्पतिपक्षे सकलदेवसेनासहायः शक्रोऽपि सहायकोऽभवत् । बृहस्पतेः पितुरङ्गिरसः सकाशादुपलब्धविद्यस्तत्स्नेहपाशबद्धो रुद्रोऽपि तत्साहाय्यकामनया प्रमथगणैः साकं स्वकीयमाजगवं धनुरादाय सोमेन सह योद्धुमुपस्थितः[1] । श्रीमद्भागवतमप्येतत्सर्वं समर्थयति[2] ।

ततो रुद्रपुरोगा इन्द्रादिदेवा असुरेषु असुराश्चोशनसा समन्विता देवेषु सरोषं शस्त्रास्त्राणि मुमुचुः । एवमुग्रतीक्ष्णैरायुधैः परस्परं युद्ध्यमानयोर्बाणांश्च प्रक्षिपतोर्द्वयोर्दलयोरतीवोग्रो भयङ्करस्तारानिमित्तस्तारकामयः सङ्ग्रामः समारब्धः, येन भूम्यन्तरीक्षयोर्महती भीतिरुत्पन्ना । ईदृशेन सकलक्षोभकरेण महाहवेन क्षुब्धहृदयमशेषं जगद् ब्रह्माणं शरणमुपेत्य तन्निवारणाय प्रार्थयाञ्चकार । ततो लोकपितामहेन ब्रह्मणा विश्वविनाशाय प्रवृत्ते तस्मिन् तारकामये सङ्ग्रामे सहसा कथञ्चित् प्रविश्य भगवन्तं पिनाकपाणिमुग्रमुशनसं देव-दैत्य-दानवगणांश्च निवारयन् सोममुवाच—सोम्य ! परस्त्रीहरणादकार्यात् त्वं सोम्योऽपि ग्रहेषु पापीयान् गणयिष्यसे, बृहस्पतेर्भार्यां तारां प्रत्यावर्तय, परस्वप्रत्यर्पणेऽपमानं न सम्भवति ।[3] ओमित्युक्त्वा युद्धाद्विरतेंऽशुमालिनि स्वयमेव विधाता गुरवे तां तारां प्रत्यावर्तयत ।[4]

तामन्तःप्रसवामालोक्य देवगुरुः—नैष मम क्षेत्रे भवत्यन्यसुतो ग्राह्यः, तस्मादेनमुत्सृजेति तामुवाच । सा चैवमुक्ता पत्युश्छन्दानुसारिणी सोमेन बलादाहितं तं गर्भं तृणगुच्छे उत्ससर्ज । स चोत्पन्नमात्र एवातितेजसा समेषां देवानां तेजांस्यभिभूतवान् ।[5] ततः कनकप्रभस्य कुमा-

---

१. ततः सशिष्यो गिरिशः पिनाकी बृहस्पतिस्नेहवशानुबद्धः ।
धनुर्गृहीत्वाजगवं पुरारिर्जगाम भूतेश्वरसिद्धजुष्टः ॥
युद्धाय सोमेन विशेषदक्षस्तृतीयनेत्रानलभीमवक्त्रः ।
(म० पु० २३।३७-३९)

२. सोऽयजद् राजसूयेन विजित्य भुवनत्रयम् ।
पत्नीं बृहस्पतेर्दर्पात् तारां नामाहरद् बलात् ॥
यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात् ।
नात्यजत् तत्कृते यज्ञे देवदानवविग्रहः ॥
(श्री० भा० ९।१४।४–५)

३. तदस्त्रयुग्मं जगतः क्षयाय प्रवृद्धमालोक्य पितामहोऽपि ।
अन्तः प्रविश्याथ कथं कथञ्चिन्निवारयामास सुरैः सहैव ॥
यस्मात् परस्त्रीहरणाय सोम ! त्वया कृतं युद्धमतीव भीमम् ।
पापग्रहस्त्वं भविता जनेषु शान्तोऽप्यलं नूनमथासितान्ते ॥
भार्यामिमामर्पय वाक्पतेस्त्वं न चावमानोऽस्ति परस्वहारे ।
(म० पु० २३।४४-४६)

४. ततो निवार्योशनसं रुद्रं ज्येष्ठं च शङ्करम् ।
ददावाङ्गिरसे तारां स्वयमेव पितामहः ॥
(वा० पु० ९०।३५)

५. जातमात्रः स तेजस्वी सर्वाण्येवाजयद् बली ।
(म० पु० २४।४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रस्यातितेजस्वितया चारुतया च गुरुमिन्दुञ्च साभिलाषौ[1] दृष्ट्वा समुत्पन्नसन्देहाः सन्तो देवाः 'माता भस्त्रा पितुः पुत्रः' इत्यादिवचनात् पितुरेव पुत्रः, मातैव पुत्रजनकं वेत्ति, इत्यतोऽस्य को जनक इति निश्चेतुं तारामेव पप्रच्छुः—कथय सुभगे ? कस्यायमात्मजः कुमारः सोमस्य गुरोर्वा ?

इत्येवं बहुशः पृष्टाऽपि सा यदा ह्रिया न किञ्चिदुक्तवती[2], तदा कुमारः क्रोधाविष्टः प्राह—दुष्टे अम्ब ! कस्मान्न मम तातमाख्यासि । साम्प्रतमेवाहमलीकलज्जावत्यास्ते शास्ति करोमि ।[3]

अथ प्रपितामहो ब्रह्मा तं कुमारमपवार्य स्वयमेवाप्राक्षीत्—वत्से ! सत्यं ब्रूहि, कस्यायमौरसः कुमारः, सोमस्याथ बृहस्पतेः ? ततः सा लज्जावशाच्छनैः प्राह—सोमस्येति । ततः स्फुरदुच्छ्वसितामलकपोलकान्तिरुडुपतिः कुसुमशरसुन्दरं तं सुकुमारं कुमारं प्रेमनिर्भरमालिङ्ग्य साधु वत्स ! साधु ! प्रज्ञासम्पन्नोऽसीत्युच्चार्य बुध इति तस्य नाम चक्रे[4] । ततो विधाता तस्याभिषेकं विधाय युवानं कृत्वा तस्मै ग्रहसाम्यं प्रदाय पश्यत्सु च देवेषु ब्रह्मर्षिभिः सह स्वकं धाम जगाम[5] । एवं सोमोऽत्रिमुनेरात्मजो बुधस्य पिता पुरूरवसश्च पितामहो निगद्यते[6] ।

---

१. स्पृहामङ्गिरसश्चक्रे कुमारे कनकप्रभे ।
ममायं न तवेत्युच्चैस्तस्मिन् विवदमानयोः ॥
(श्री० भा० ९।१४।११)

२. अपृच्छंस्ते सुरास्तत्र केन जातः कुमारकः ।
अथ सा लज्जिता तेषां न किञ्चिदवदत्तदा ॥
(म० पु० २४।५)

३. ह्रीयमाणा यदा देवान्नाह सा साध्वसाधु वा ।
तदा तां शप्तुमारब्धः कुमारो दस्युहन्तमः ॥
(वा० पु० ९०।४०)

४. सा प्राञ्जलिरुवाचेदं ब्रह्माणं वरदं प्रभुम् ।
सोमस्येति महात्मानं कुमारं दस्युहन्तमम् ॥
ततः सुतमुपाघ्राय सोमो धाता प्रजापतिः ।
बुध इत्यकरोन्नाम तस्य पुत्रस्य धीमतः ॥
(वा० पु० ९०।४२-४३)

५. अभिषेकं ततः कृत्वा युवानमकरोद्विभुः ।
ग्रहसाम्यं प्रदायाथ ब्रह्मा ब्रह्मर्षिसंयुतः ॥
पश्यतां सर्वदेवानां तत्रैवान्तरधीयत ॥
(म० पु० २४।८½)

६. अत्रेः पुत्रोऽभवत् सोमः सोमस्य तु बुधः स्मृतः ।
बुधस्यैको महेन्द्राभः पुत्र आसीत् पुरूरवाः ॥
(महाभा०, द्रो० प० १४४।४)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्राप्तापूर्वाधिपत्यमाह्लादजनकं सर्वानन्दकरं सोमं समवेक्ष्य दक्षप्रजापतिना रूपलावण्यसम्पन्नाः सुयोग्याः स्वकीयाः सप्तविंशतिः कन्यकाश्चन्द्रमसे पत्नीत्वेन समर्पिताः। एताः सर्वा दक्षात्मजाश्चन्द्रपत्न्यः कालविभागज्ञापने नियुक्ता लोकव्यवहारनिर्वाहाय नक्षत्रनाम्ना ज्यौतिषशास्त्रेषु व्यवहृता विद्यन्ते ।[1]

यद्यपि चन्द्रमसः सर्वा भार्याः समानरूपवत्यः सर्वाङ्गसुन्दर्यश्चासन्, तथापि तासु रोहिणी सर्वातिशायिनी चन्द्रमसो मनोरमा बभूव[2]। अतोऽन्या उपेक्ष्य स रोहिण्यामेव प्रीतिमानभूत्। तदिदमनुचितं मत्वा ताः सर्वा ईर्ष्यावत्यः पितुः समीपमुपेत्यामुमर्थं शशंसुः—तात ! अस्मासु तुल्यप्रभावासु सतीष्वपि ते जामाता रोहिणीमेवाधिकं भजतीति। ततो दक्षः सर्वासु समानभावेन व्यवहाराय सोममादिश्य ताः प्रत्यावर्तयत। अथापि तदादेशमवहेत्य स पूर्ववद् रोहिण्यामेवासक्तो बभूव।

पुनस्तच्छ्रुत्वा दक्षेण रोषात् तदर्थं राजयक्ष्माणमुत्पाद्य तच्छरीरे प्रवेशितः। ततः शनैः शनैः क्षीयमाणे चन्द्रे यदा ओषधयः प्रजाश्च क्षीणतामुपगताः, तदा देवानामनुरोधेन दक्षस्तद्रोगनिर्वृत्तये उपायं निर्दिशन्नुवाच—सोमो हि सर्वासु भार्यासु समानं व्यवहरतु, अपि च पश्चिमसमुद्रे सरस्वतीसङ्गमे हिरण्यमयतीर्थे स्नानं च कुर्यात्। तत्रैव भगवतो महादेवस्याराधनया तस्य कान्तिः प्रागिव निर्मला भविष्यति[3]।

अयं पञ्चदशदिनपर्यन्तं क्षीणो भविष्यति, तथा पञ्चदशदिनानि यावद् वर्द्धिष्यते। तदनुसारं सोऽमावस्यायां तत्र तीर्थे स्नात्वा तत्तीर्थप्रभावात् पूर्ववत् स्वकीयानि प्रकाशवन्ति प्रभायुक्तानि शीतलानि किरणान्यवाप्य पुनः समस्तं जगत् प्रकाशयितुमारब्धवान्। ततस्तत्कालादेव

---

१. ताः सर्वास्त्वनवद्याङ्ग्यः कन्याः कमललोचनाः।
कालस्य नयने युक्ताः सप्तविंशतिमिन्दवे॥
(महाभा०, आ० प० ७५।९)
सप्तविंशत्तु याः कन्या दक्षः सोमाय ता ददौ।
सर्वा नक्षत्रनाम्न्यस्ता ज्यौतिषे चैव कीर्तिताः॥
(वा० पु० ६६।५२)

२. तास्तु सर्वा विशालाक्ष्यो रूपेणाप्रतिमा भुवि।
अत्यरिच्यत तासां तु रोहिणी रूपसम्पदा॥
(महाभा०, शा० प० ३५।४७)

३. समं वर्ततु सर्वासु शशी भार्यासु नित्यशः।
समुद्रं पश्चिमं गत्वा सरस्वत्यब्धिसङ्गमम्।
आराधयतु देवेशं ततः कान्तिमवाप्स्यति॥
(तत्रैव: ३५।७७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्तीर्थं प्रभाप्राप्त्या प्रभासतीर्थं नाम्ना प्रसिद्धं जातम्[1]। तेनैव शापेनाद्यापि चन्द्रमाः कृष्णपक्षे प्रतिपदमारभ्य क्रमशः प्रत्यहं क्षीयते, तथा शुक्लपक्षे प्रतिपदमारभ्य पूर्णिमापर्यन्त-मेकैकाभिः कलाभिर्वर्द्धते। पीयूषपिण्डमयं तस्य मण्डलाकारं स्वरूपं मेघस्य श्यामया रेखयाऽऽ-च्छन्नमिव दृश्यते, तथा तस्य शरीरमध्ये मेघश्यामलं शशकचिह्नं स्पष्टं विलोक्यते इति महा-भारतीया कथाऽत्रानुसन्धेया (शान्तिपर्वणि ३४२।५७-५८)

वायुपुराणानुसारं तु राजयक्ष्मणा प्रतिदिनं क्षीयमाणः सोमः स्वं पितरमत्रिमुनिसमीप-मुपेत्य तन्निवृत्तये प्रार्थयाञ्चकार। तदनु तेन स्वतपोबलप्रभावेण तस्य शमनं विधाय स स्वस्थीकृतः।

अपि च शीतलरश्मिः सूर्यं इव तेजस्वी प्रकाशमयः प्रसन्नात्मा चन्द्रमाः समुद्रमन्थन-समये मध्यमानात् क्षीरसमुद्रान्निर्गतेषु चतुर्दशरत्नेष्वन्यतमं रत्नमप्युक्तमस्ति महाभारते पुराणेषु च[2]। पूर्णिमायां चन्द्रोदयसमये ताम्रपात्रे मधुमिश्रितपक्वान्नैर्युक्तस्य बलेश्चन्द्रमसे समर्पणेन चन्द्रसमुद्रयोर्वृद्धिर्जायते। साध्य-रुद्रादित्यविश्वेदेव-मरुद्गणाश्विनीकुमारादीनां च महती तृप्ति-र्भवति। अत एव च चन्द्रार्घ्यप्रदानसमये सोमस्यात्रिनेत्रसमुद्रसम्भवत्वं सम्यक् संघटते।

किञ्च धर्मपुत्रेषु अष्टवसुषु अन्यतमोऽपि सोमः प्रोक्तो विद्यते। वसुरूपेणायं मनस्विन्या गर्भजोऽस्ति। अस्य मनोहरनामिकायां पत्न्यां चत्वारस्तनया अजायन्त—वर्चाः, शिशिरः, प्राणः, रमणश्च। सोमः स्वं ज्येष्ठं पुत्रं वर्चसं देवकार्यसिद्धिनिमित्तं षोडशवर्षपर्यन्तं भूतले स्थातुं प्रणीकृत्य प्रेषितवानासीत्। योऽभिमन्युरूपेणार्जुनात् सुभद्रायामुत्पन्न आसीत्[4]। अत एव मत्स्यपुराणेऽपि द्युतिमतः सोमस्य वसुत्वमुक्तं संगच्छते।[5]

---

१. विमुक्तशापः पुनराप्य तेजः सर्वं जगद् भासयते नरेन्द्रः।
एवं तु तीर्थप्रवरं पृथिव्यां प्रभासनात् तस्य ततः प्रभासः॥
(महाभा०, शा० प० ३५।४२)
अतश्चैतत् प्रजानन्ति प्रभासमिति भूमिप।
प्रभां हि परमां लेभे तस्मिन्नुन्मज्ज्य चन्द्रमाः॥
(तत्रैव ३५।८५)

२. ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात्।
प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः॥
(महाभा०, आ० प० १८।३४)

३. अत्रिनेत्रसमुद्भूत ! क्षीरोदार्णवसम्भव।
गृहाणार्घ्यं मया दत्तं रोहिण्या सहितः शशि॥

४. यस्तु वर्चा इति ख्यातः सोमपुत्रः प्रतापवान्।
सोऽभिमन्युर्बृहत्कीर्तिरर्जुनस्य सुतोऽभवत्॥
ततः षोडश वर्षाणि स्थास्यत्यमरसत्तमाः॥
(महाभा०, आ० प० ६७।११२)

५. द्युतिमान् धर्मयुक्तश्च सोमो देवो वसुः स्मृतः।
(म० पु० २७।४८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पीयूषपिण्डस्य सोमस्यामृतमय्यः षोडशकलाः सन्ति। तत्र कृष्णपक्षे प्रतिपदमारभ्यामावस्यापर्यन्तं प्रत्यहं पितृदेवाः क्रमश एकैकां कलां पिबन्ति। दर्शपर्यन्तं पञ्चदशसु कलासु पितृभिः पीतासु षोडश्याः कलाया अवशिष्टत्वादेककलं चन्द्रमसं भगवान् भास्करः स्वकीयेन सुषुम्णाख्येन रश्मिना पुनः पूर्णिमापर्यन्तमेकैकामेव कलामाप्याययति[1]। एवं सुधास्राविकिरणस्य सोमस्यामावास्यां यावदेकैकां कलां पितरः पिबन्ति। पितृभिः पीतसुधं कलामात्रावशिष्टं सोमं सूर्यदेवः स्वैः प्रकाशमयैः किरणैः पुनः पोषयति। येन क्रमेण पितरश्चन्द्रमसोऽमृतं पिबन्ति, तेनैव क्रमेणादित्यः शुक्लपक्षीयप्रतिपत्तिथितः पूर्णिमापर्यन्तं प्रतिदिनं निशाकरं पुष्णाति।[2]

इत्थं पञ्चदशभिर्दिनैः सञ्चितं सोमामृतं सुधाहाराः पितरः पुनः पातुमारभन्ते, यतस्ते मृत्युभेषजरूपायाः सुधाया नियमेन पानात् कल्पान्तकालपर्यन्तं जीवन्ति। अतस्ते सुधाहारा देवा अमरा अप्युच्यन्ते।[3]

तथा च जन्यभावमात्रस्य नियमेन ध्वंसप्रतियोगित्वात् पितृदेवानाममरत्वमनुपपन्नमित्याक्षेपो निरस्तः, प्रलये भावभूतानां तेषां पितृदेवानां विनाशे सत्यपि तत्पूर्वकालं यावत् स्थितिरूपस्यामरत्वस्य निर्बाधात्।

यस्मिन् समये द्विकलामात्रावशिष्टश्चन्द्रमाः सूर्यमण्डले प्रविश्य तस्यामानामके किरणे तिष्ठति, स कालोऽमावस्यातिथिः कथ्यते।[4] अमावस्यायां रात्रौ सोमः क्रमशः प्रथमं जले प्रविशन् वृक्षलतादिषु निवसन् सूर्ये प्रविशति। अतोऽस्मिन् समये यो वृक्षादि छिनत्ति, पत्रादिकं वा

---

१. क्षीणं पीतं सुरैः सोममाप्याययति दीप्तिमान्।
मैत्रेयैककलं सन्तं रश्मिनैकेन भास्करः॥
येन क्रमेण पीतोऽसौ देवैस्तेन निशाकरम्।
आप्याययत्यनुदिनं भास्करो वारितस्करः॥
(वि० पु० २।१२।४–५)

२. पीतं पञ्चदशाहञ्च रश्मिनैकेन भास्करः।
आपूरयन् ददौ तेन भागं भागमहःक्रमात्॥
इत्येवं सूर्य्यवीर्येण चन्द्रस्याप्यायिता तनुः।
पूर्णमास्यां प्रदृश्येत शुक्लः सम्पूर्णमण्डलः॥
(म० पु० २५।५५-५७)

३. सम्भृतश्चार्द्धमासेन तत् सोमस्थं सुधामृतम्।
पिबन्ति देवा मैत्रेय! सुधाहारा यतोऽमराः॥
(वि० पु० २।१२।६)

४. कलाद्वयावशिष्टस्तु प्रविष्टः सूर्यमण्डलम्।
अमाख्यरश्मौ वसति अमावस्या ततः स्मृता॥
(तत्रैव २।१२।८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्रोटयति तस्य ब्रह्महत्यायाः पातकं भवति ।[१] तदेवं दर्शाहोरात्रेऽप्सु वीरुत्सु च प्रवेशादुपक्षीण-प्राये कलात्मके पञ्चदशभागे किञ्चिदवशिष्टे सति अपराह्णे पितृगणाः पानार्थं चन्द्रमसं पर्युपासते । द्विकलं सोमं पर्युपास्य तस्येन्दोः शिष्टां पञ्चदशीं कलामेव द्विलवपरिमितं कालं निभृतं पितरः पिबन्ति, न तु षोडशीं कलाम् । इत्थममावस्यायां सोमस्य गभस्तिभ्यो निःसृतं सुधामृतं पीत्वा सौम्या बर्हिषद अग्निष्वात्ताश्च पितरो मासपर्यन्तं परमां तृप्तिमाप्नुवन्ति ।[२] "सोमाच्चैवामृतप्राप्तिः पितॄणां तर्पणं तथा" इत्यादिवचनानुसारममावस्यायां कुहूकाले सोमामृतेन तर्पणस्य महन्महत्त्वमस्ति । अत एव बुधस्य पुत्रः पुरूरवाः कुहूमात्रे पितॄन् तर्पयितुं प्रत्यमावस्यं दिवमुपतिष्ठते स्म[३] ।

एवं चन्द्रमाः शुक्लपक्षे देवगणान् कृष्णपक्षे च पितॄन् तथाऽमृतमयैः शीतलै रश्मिभि-र्वृक्षलतौषधींश्चाह्लादयन् मनुष्य-पशु-पक्षि-कीट-पतङ्गादीन् समस्तान् प्राणिनो निरन्तरं पुष्णाति ।[४]

एवं विष्णुशक्त्यधिष्ठितस्य रवेरपि पित्रादितर्पकत्वमुक्तमस्ति । शुक्लप्रतिपदमारभ्या-पूरितः षोडशकलः सन् कृष्णपक्षीयप्रतिपदादिप्रत्यहमेकैककलांशेनामरैः पीयते । एवममरैरेकैक-

---

१. छिनत्ति वीरुधो यस्तु वीरुत्संस्थे निशाकरे ।
पत्रं वा पातयत्येकं ब्रह्महत्यां स विन्दति ॥
(वि० पु० २।१२।१०)

२. निःसृतं तदमावस्यां गभस्तिभ्यः सुधामृतम् ।
मासं तृप्तिमवाप्याग्र्यां पितरः सन्ति निर्वृताः ॥
सौम्या बार्हिषदश्चैव अग्निष्वात्ताश्च ते त्रिधा ।
(तत्रैव २।१२।१३)

३. ऐलः पुरूरवा विद्वान् मासि श्राद्धचिकीर्षया ।
ततः स दिवि सोमं वै ह्युपतस्थे पितॄनपि ॥
द्विलवं कुहूमात्रं च वसंस्तेषां च तृप्तये ।
स्वधामृतेन सौम्येन तर्पयामास वै पितॄन् ॥
(म० पु० ४०।७-१२)

४. एवं देवान् सिते पक्षे कृष्णपक्षे तथा पितॄन् ।
वीरुधश्चामृतमयैः शीतैरप्परमाणुभिः ॥
वीरुधौषधिनिष्पन्ना मनुष्यपशुकीटकान् ।
आप्याययति शीतांशुः प्रकाशाह्लादनेन च ॥
(वि० पु० २।१२।१४।१५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कलायामंशेन पीतायां चतुर्दश्यन्ते द्विकलमवशिष्टं सन्तं कृष्णपक्षक्षये दर्शे पितरः किञ्चित् पिबन्ति, तेन चन्द्रतर्पणप्रकारेण भास्करात् तेषां देवपितॄणां तर्पणं भवति[1]।

खेचरचक्रसञ्चालननिमित्तमस्य स्थितिरन्तरीक्षे वर्ण्यते। पृथिवीतो लक्षयोजनोपरि भागे सूर्य्यमण्डलं विद्यते। तथा सूर्य्यमण्डलत उपरि लक्षयोजनदूरे चन्द्रमण्डमप्यस्ति। चन्द्रमण्डलतो लक्षयोजनदूरे उपरि नक्षत्रमण्डलं वरीवर्ति। ततो नक्षत्रमण्डलतो लक्षद्वययोजनोपरि बुधमण्डलं वर्तते। ततोऽप्युपरि लक्षद्वययोजने शुक्रोऽस्ति। ततो लक्षद्वययोजनोपरि मङ्गललोको विद्यते। मङ्गलतो द्विलक्षयोजनदूरे उपरि बृहस्पतेः स्थानं वर्तते। ततो लक्षयोजनोपरि शनिस्तिष्ठति। शनितो लक्षयोजनदूरे सप्तर्षिमण्डलमस्ति। ततः शतसहस्रयोजनोपरि ज्योतिश्चक्रस्य नाभिरूपो ध्रुवो वर्तते। स एवास्ति भगवतो विष्णोः परमं पदम्। तथाहि[2]—

---

१. पितृदेवमनुष्यादीन् स सदाऽऽप्याययन् प्रभुः।
परिवर्त्तत्यहोरात्रकारणं सविता द्विज॥
सूर्यरश्मिः सुषुम्णो यस्तर्पितस्तेन चन्द्रमाः।
कृष्णपक्षेऽमरैः शश्वत् पीयते वै सुधामयः॥
पीतं तद् द्विकलं सोमं कृष्णपक्षक्षये द्विज।
पिबन्ति पितरः शेषं भास्करात्तर्पणं तथा॥
(वि० पु० २।११।२१-२३)

२. भूमेर्योजनलक्षे तु सौरं मैत्रेयमण्डलम्।
लक्षाद्दिवाकरस्यापि मण्डलं शशिनः स्थितम्॥
पूर्णे शतसहस्रे तु योजनानां निशाकरात्।
नक्षत्रमण्डलं कृत्स्नमुपरिष्टात् प्रकाशते॥
द्वे लक्षे चोपरि ब्रह्मन् बुधो नक्षत्रमण्डलात्।
तावत्प्रमाणभागे तु बुधस्याप्युशनाः स्थितः॥
अङ्गारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः।
लक्षद्वयेन भौमस्य स्थितो देवपुरोहितः॥
शौरिर्बृहस्पतेश्चोर्ध्वं द्विलक्षे सम्यगास्थितः।
सप्तर्षिमण्डलं तस्माल्लक्षमेकं द्विजोत्तम॥
ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः।
मेधीभूतः समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः।
(वि० पु० २।७।५-१०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भूमेः	१ लक्षयोजनोपरि	दूरे		सूर्यमण्डलं	वर्तते
सूर्यमण्डलतः	१	,,	,,	चन्द्रमण्डलम्	,,
चन्द्रमण्डलतः	१	,,	,,	नक्षत्रमण्डलम्	,,
नक्षत्रमण्डलतः	२	,,	,,	बुधः	,,
बुधात्	२	,,	,,	शुक्रः	,,
शुक्रात्	२	,,	,,	मङ्गललोकः	,,
मङ्गलात्	२	,,	,,	बृहस्पतिः	,,
बृहस्पतेः	२	,,	,,	शनिः	,,
शनितः	१	,,	,,	सप्तर्षिमण्डलः	,,
सप्तर्षितः	१	,,	,,	ध्रुवलोकः	,,
	१५ एवं पञ्चदशलक्षयोजनपरिमिता समस्ता त्रिलोकी				,,

तथा चोच्छ्रायेन पञ्चदशलक्षयोजनेन यज्ञादिफलस्य भोग्यभूमिरेतत् त्रैलोक्यमित्युच्यते। अत एवोक्तम् "यतो हि कर्मभूरेषा इतोऽन्या भोगभूमयः।" अतो भारतवर्षे लब्धजन्मनां पुंसां नित्यं नूनं यज्ञादिधर्मे प्रयतितव्यम्, यतो हीज्याविधानस्यात्रैव व्यवस्था विद्यते[1]।

तत्र ग्रहेषु सर्वेभ्योऽधस्तात् सूर्योऽस्ति। तत ऊपरि चन्द्रमा विराजते[2]।

ग्रहरूपेण चन्द्रमसो वर्णनप्रसङ्गे विष्णुपुराणे प्रोक्तमस्ति यच्चन्द्रमसो रथे त्रीणि चक्राणि वर्तन्ते। तत्र वामदक्षिणयोः पार्श्वयोः कुन्दकुसुमसगश्वेतवर्णा दश वाजिनो युक्ता विद्यन्ते। ध्रुवस्याधारे स्थितेन तेन वेगशालिना रथेन चन्द्रमा नागवीथ्याश्रयाणि अश्विन्यादीनि नक्षत्राणि उपभुङ्क्ते। सूर्यवदेवास्यापि समुद्रगर्भसमुद्भवा अश्वाः सकृद् युक्ता रथमाकल्पान्तं वहन्ति।[3]

---

१. त्रैलोक्यमेतत् कथितमुत्सेधेन महामुने।
इज्याफलस्य भूरेषा इज्या चात्र व्यवस्थिता॥
(वि० पु० २।७।११)

२. सर्वेषां तु ग्रहाणां वै सूर्योऽधस्तात् प्रसर्पति।
विस्तीर्णं मण्डलं कृत्वा तस्योर्ध्वं चरते शशी॥
(म० पु० २२।७२)

३. रथस्त्रिचक्रः सोमस्य कुन्दाभास्तस्य वाजिनः।
वामदक्षिणतो युक्ता दश तेन चरत्यसौ॥
अर्कस्येव हि तस्याश्वाः सकृद् युक्ता वहन्ति ते।
कल्पमेकं मुनिश्रेष्ठ! वारिगर्भसमुद्भवाः॥
(वि० पु० २।१२।१-३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चन्द्रमण्डलस्य व्यास एकादशसहस्रयोजनम्, परिधिर्विस्तारस्त्रयस्त्रिंशत्सहस्रयोजनम्, तस्य स्थौल्यञ्चोनषष्टिशतयोजनं विद्यते ।[1] एष नक्षत्रैः सह मेरुं परिक्रमन् पर्वसन्धिसमये विभिन्नान् मासांश्च विभजन् सूर्य इव मेरुमुल्लङ्घ्य मन्दराचलमाश्रयते ।[2]

मेरोः पूर्वस्यामिन्द्रस्य देवधानी, दक्षिणस्यां यमस्य संयमनी, पश्चिमस्यां वरुणस्य निम्नोचा, उत्तरस्याञ्च चन्द्रमसो विभावरीनाम्नी पुरी वर्तते । आसु पुरीसु यथासमयं सूर्योदय-मध्याह्न-सायाह्न-निशीथा भवन्ति । ये सुमेरौ तिष्ठन्ति तेषां कृते सर्वदा मध्याह्न एव भवति । यस्यां पुर्यां सूर्योदयो जायते तद्विपरीतायां पुर्यां सूर्योऽस्तं गच्छन् प्रतीयते । सूर्यो हीन्द्रपुरीतः पञ्चदशपरिक्रमागिर्यमपुरीमुपतिष्ठते । एतावति समये स सपादकोटिद्वययोजनानां सार्द्धलक्ष-द्वययोजनानि मार्गानुल्लङ्घते । एवं क्रमशो वरुण-चन्द्रमसोः पुर्यावतिक्रम्य स पुनरैन्द्रीमुपतिष्ठते ।

एवं चन्द्रादयो ग्रहा अपि ज्योतिश्चक्रेऽन्यैर्नक्षत्रैः साकमुदयन्तेऽस्तञ्च गच्छन्ति । एकेन मुहूर्त्तेन चतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानि सौरो रथस्त्रयीमयोऽसौ चतसृषु परिवर्तते[3] ।

भूमण्डलतो लक्षयोजनपर्यन्तमुपरिभागे सूर्यमण्डलं वर्तते । पृथ्वीतो लक्षद्वययोजने दूरे उपरि चन्द्रमण्डले चन्द्रमा विद्यते । तस्य गतिर्महती वेगवती वर्तते । अयं सूर्यस्य संवत्सरगति-मेकस्मिन् मासे, मासस्य गतिं सार्द्धद्वयदिने, एकस्य पक्षस्य गतिमेकस्मिन् दिने पूरयति । एष कृष्णपक्षे क्षीयमाणाभिः कलाभिः पितॄणां शुक्लपक्षे वर्द्धमानाभिः कलाभिर्देवानां च रात्रिन्दिवं विभजते, तथा त्रिंशद्भिर्मुहूर्तैरेकैकं नक्षत्रमतिक्रामति । षोडशकलोऽयं सोमो मनोमयत्वादमृत-मयत्वादन्नमयत्वाच्च देव-पितृ-मनुष्य-पशु-पक्षि-सरीसृप-वीरुधां प्राणाप्ययनशीलत्वाच्च समस्ते-भ्यो जीवेभ्यः प्राणान् जीवनं च प्रददाति । अत एवायं सर्वमयः प्रोच्यते[4] ।

केचन शिशुमारसंस्थानेन भगवतो वासुदेवस्य, ककुदि बृहस्पतिः, वक्षसि सूर्यस्य, हृदये नारायणस्य, मनसि चन्द्रमसः, नाभ्यामुशनसो वास इति वर्णयन्ति—बृहस्पतिः ककुदि, वक्षस्या-

---

१. षष्टिमाहुः शतान्यस्य बुधाः पौराणिकास्तथा ।
चन्द्रमास्तु सहस्राणि राजन्नेकादश स्मृतः ॥
विष्कम्भेण कुरुश्रेष्ठ ! त्रयस्त्रिंशत्तु मण्डलम् ।
एकोनषष्टिविष्कम्भ शीतरश्मेर्महात्मनः ॥
(महाभा०, व० प० १२।४२–४३)

२. स मासान् विभजन् काले बहुधा पर्वसन्धिषु ।
तथैव भगवान् सोमो नक्षत्रैः सह गच्छति ॥
एवमेतं त्वतिक्रम्य महामेरुमतन्द्रितः ।
भगवान् सर्वभूतानि पुनर्गच्छति मन्दरम् ॥
(महाभा०, व० प० १६३।३१–३२)

३. श्रीमद्भागवते ५ । २१ । ७-१२ ।

४. तत्रैव ५ । २२ । ८-१० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दित्योः, हृदये नारायणोः, मनसि चन्द्रमाः, नाभ्यामुशनाः[1] । अतश्चन्द्रमा मनसो जात इति संगच्छते ।

केषाञ्चिन्मते सूर्याद्दशयोजनमधस्तान्नक्षत्रवद्राहुः परिभ्रमति । असुराधमत्वादयं सैंहिकेय एतत्पदयोग्यो नासीत्, किन्तु भगवतो विष्णोः कृपया अमरत्वं ग्रहत्वं चोभे लब्ध्वा ग्रहेषु गण्यते । सूर्यस्य देदीप्यमानं मण्डलं दशसहस्रयोजनम्, चन्द्रमसो मण्डलं द्वादशसहस्रयोजनं राहोश्च मण्डलं त्रयोदशसहस्रयोजनं विस्तीर्णमुक्तमस्ति । समुद्रमन्थनानन्तरममृतपानावसरे राहुर्देववेषेण सोम-सूर्ययोर्मध्ये समुपविष्टस्तयोः सङ्केतेन भगवता तच्छिरस्तत्कालं चक्रेण छिन्नम् । तत्कालादेव शिरो राहुः कायश्च केतुरिति प्रोच्यते । अमृतपानात् प्राप्तामरत्वो राहुस्तदेव वैरं स्मारं स्मारं समये समये अमावस्यायां सूर्यं पूर्णिमायाञ्च पूर्णं चन्द्रमसमाक्राम्यति । तयोरेतादृशं शाश्वतिकं भयमालोक्य भगवता विष्णुना तयो रक्षार्थं स्वकीयं प्रियतममस्त्रं सुदर्शनं नाम चक्रं नियुक्तं यत्तयोः पार्श्वयोर्निरन्तरं परिभ्रमति । अत आक्रमणकाले राहुस्तस्यासह्येन तेजसा समुद्विग्न-हृदयः सन् मुहूर्तमात्रं कथञ्चित् सम्मुखे स्थित्वा परावर्तते । यावत्कालं स तयोः समक्षं तिष्ठति, तावज्जना ग्रहणकाल इति कथयन्ति[2] । यत् पार्थिवं जगत् पादसञ्चरणयोग्यमस्ति तद् भूलोको निगद्यते । पृथ्वीसूर्ययोर्मध्ये यत् सिद्ध-मुनिगणादिसेवितं स्थानं वर्तते तद् भुवर्लोकः कथ्यते । सूर्यध्रुवयोर्मध्ये यच्चतुर्दशलक्षयोजनस्यान्तरं विद्यते तदेव लोकस्थितिविशेषज्ञैः स्वर्लोकः कथ्यते । एवं त्रयो भूर्भुवः स्वर्लोकास्त्रैलोक्यं कृतकं च कथ्यते[3] ।

भगवतः सूर्यस्याधारो ध्रुवोऽस्ति, ध्रुवस्याधारः शिशुमारो विद्यते, शिशुमारस्य चाश्रयोऽस्ति श्रीनारायणः, यतस्तस्य हृदयकमले सर्वेषां प्राणिनां पालक आदिभूतः सनातनः स महापुरुषो विराजते[4] ।

---

१. श्रीमद्भागवते ५ । २३ । ७ ।

२. तत्रैव ५ । २४ । १-३ ।

३. पादगम्यं तु यत् किञ्चिद् वस्त्वस्ति पृथिवीमयम् ।
स भूलोकः समाख्यातो विस्तारोऽस्य मयोदितः ॥
भूमिसूर्यान्तरं यच्च सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ॥
ध्रुवसूर्यान्तरं यच्च नियुक्तानि चतुर्दश ।
स्वर्लोकः सोऽपि गदितो लोकसंस्थानचिन्तकैः ॥
त्रैलोक्यमेतत् कृतकं मैत्रेय परिपठ्यते ॥
(वि० पु० २।७।१६-१८)

४. आधारभूतः सवितुर्ध्रुवो मुनिवरोत्तम ।
ध्रुवस्य शिशुमारोऽसौ सोऽपि नारायणात्मकः ॥
हृदि नारायणस्तस्य शिशुमारस्य संस्थितः ।
विभर्ता सर्वभूतानामादिभूतः सनातनः ॥
(तत्रैव २।९।२४-२५)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अयं भावः—नक्षत्राणामयनं दिवि शिशुमाराकृति यद्रूपं प्रोक्तं तस्य हृदि स्थितः स्वयं नारायण एव तस्याधारः ।

ध्रुवलोको भगवतो विष्णोः परमं पदमुच्यते । ध्रुवस्याश्रयेण प्रवहवायुप्रेरणया कालचक्रे नियुक्ता ग्रहोपग्रहनक्षत्रज्योतिर्गणाः स्वस्वकार्यानुसारं स्वस्यां स्वस्यां कक्षायां कल्पान्तं यावन्निरन्तरं चंक्रमन्ते, न पृथिव्यां केचिदपि च्यवन्ते । सर्वे स्वासु स्वासु कक्षासु स्थिराः सन्तः स्वानि कर्तव्यान्यनुतिष्ठन्ते ।

केचित्तु ज्योतिश्चक्रं शिशुमारचक्ररूपेण वर्णयन्ति । यस्य पुच्छभागे ध्रुवोऽवस्थितोऽस्ति । सोऽयं ध्रुवः स्वयं भ्रमन् चन्द्रमसं सूर्यमन्यान् ग्रहांश्च भ्रामयति । तेन भ्रमणशीलेन ध्रुवेण सह नक्षत्रगणोऽपि चक्रवत् परिभ्रमति । चन्द्र-सूर्य-तारा-नक्षत्राणि अन्यान्यग्रहैः समं वायुमय्या रज्वा ध्रुवेण सह बद्धानि भूमौ न पतन्ति ।[1]

भगवतो विष्णोर्वामनावतारे पादत्रयभूम्यर्थं बलेर्निग्रहावसरे उपरि प्रसारितवामचरणनखनिर्गताया जलकेलिनिमित्तं समवेतदेवाङ्गनाङ्गरागपाण्डुवर्णायाः सर्वविधदुरितक्षयकारिण्याः पतितोद्धारिण्या मनोहारिण्या भगीरथप्रार्थनया कपिलक्रोधभस्मीभूतान् सगरात्मजानुद्धर्तुकामनया पूततमं वसुधातलमागन्तुमुत्कण्ठिताया भगवत्या गङ्गाया निर्मलेन जलेनाप्लावितं चन्द्रमण्डलमधिकं क्रान्तिमद् भवति । चन्द्रमण्डलान्निर्गत्य स्वर्णमयस्य सुमेरो रम्ये शिखरे निपतन्ती एकैव सा समस्तं संसारं पवित्रयितुं चतुर्भिर्धाराभिश्चतुर्दिशमजस्रं प्रवहति ।[2]

भगवान् भास्करो हि अष्टभिर्मासैः स्वै रश्मिभी रसस्वरूपं जलमाकृष्य चतुर्भिर्मासैर्वर्षति, येनान्नादिः समुत्पद्यते । तेनैवान्नादिना समस्तस्य जीवनिवहस्य पालनं पोषणं च जायते ।

अयं भावः—सूर्यो हि स्वकीयैः किरणैः संसारे स्थितं जलमाकृष्य चन्द्रमसं पोषयति । स चाकाशे वायुमण्डलनालिकाद्वारा तज्जलं धूमाग्निवायुषु प्रापयति । चन्द्रद्वारा प्राप्तं जलं मेघे

---

१. तारामयं भगवतः शिशुमाराकृति प्रभो ।
दिविरूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः ॥
सैव भ्रमन् भ्रामयति चन्द्रादित्यादिकान् ग्रहान् ।
भ्रमन्तमनु तं यान्ति नक्षत्राणि च चक्रवत् ॥
सूर्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः समम् ।
वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ॥
(वि० पु० २।९।१–३)

२. वार्योघैः सन्ततैर्यस्याः प्लावितं शशिमण्डलम् ।
भूयोऽधिकतमां कान्तिं वहत्येतदुपक्षयम् ॥
मेरुपृष्ठे पतत्युच्चैर्निष्क्रान्ता शशिमण्डलात् ।
जगतः पावनार्थाय या प्रयाति चतुर्दिशम् ॥
सीता चालकनन्दा च चक्षुर्भद्रा च संस्थिता ।
एकैव या चतुर्भेदा दिग्भेदगतिलक्षणा ॥
(तत्रैव २।८।१०६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्कालं न भ्रश्यति, अतस्तदभ्रमुच्यते। कालजनितसंस्कारद्वारा तदभ्रस्थं जलं निर्मलं भूत्वा वातप्रेरणया भूतले वर्षति। तेन वृष्टिजलेन पुष्टा ओषधयः, फलानि अन्नादिकानि च शरीर-पोषणहेतवो भवन्ति। एवं सूर्य-चन्द्र-मेघादिद्वारा विसृष्टं वृष्टिजलमोषधादिपुष्टिपूर्वकं सर्वेषां प्राणिनां जीवनायामृतकल्पं भवति।[1] अभ्राणां धूमज्योतिर्वायुमयत्वम्—

"न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः।"

इत्यनेन सलिलमयत्वमपि प्राप्तम्। अत एव कविकुलकलाधरेण कालिदासेन प्रोक्तं स्वकीये मेघदूते—

"धूमज्योतिस्सलिलमरुतां सन्निपातः क्व मेघः।" इति

स्पष्टतया संगच्छते। एवं भगवान् सविता स्वकीयकिरणद्वारा भूमिसंस्थं यज्जलं गृह्णाति तदेव जलं पुनः प्राणिनां पुष्ट्यर्थं शस्यवृद्धिनिमित्तञ्च समुत्सृजति।[2] अत एव कविवरः कालिदासो रघुवंशे महाकाव्ये प्रोक्तवान्—

"सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।" इति

अनिष्टपरिहाराय, इष्टसिद्धिप्राप्तिहेतवे च पुराणेषु ग्रहाणां शान्तिविधानं निर्दिष्टमस्ति। पुराणानुसारं नवग्रहा मन्यन्ते। यथा—सूर्यः, चन्द्रमाः, मङ्गलः, बुधः, बृहस्पतिः, शुक्रः, शनैश्चरः, राहुः केतुश्च।[3] नवग्रहाणां विभिन्नरूपेण निर्माण-स्थापन-पूजनप्रार्थनादीनां पुराणेषू-ल्लेखो विद्यते। तत्तद्ग्रहाणां कृतेऽनेकविधपूजनसामग्र्या वर्णनं विद्यते। तेषां होमार्थं विभिन्नाः समिधोऽपि प्रोक्ताः सन्ति। नवानां ग्रहाणां नवविधानां समिधां निर्देशो।[4] स्वरूपञ्च भिन्नं भिन्नं वर्णितमस्ति। शशिनः स्वरूपनिर्माणवर्णनं पुराणेषूक्तम्।[5]

१. विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः।
वर्षत्यम्बु ततश्चान्नमन्नादप्यखिलं जगत्॥
विवस्वानंशुभिस्तीक्ष्णैरादाय जगतो जलम्।
सोमं पुष्यत्यथेन्दुश्च वायुनाडीमयैर्दिवि॥
नालैर्विक्षिपतेऽभ्रेषु धूमाग्न्यनिलमूर्तिषु।
न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः॥
(वि० पु० २।९।८–१०)

२. आदत्ते रश्मिभिर्यत्तु क्षितिसंस्थं रसं रविः।
तमुत्सृजति भूतानां पुष्टयर्थं शस्यवृद्धये॥
(तत्रैव २।११।२४)

३. सूर्यः सोमस्तथा भौमो बुधजीवसितार्कजाः।
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः॥
(म० पु० ९२।१०)

४. अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः।
औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्॥
(तत्रैव ९२।२७)

५. श्वेतः श्वेताम्बरधरः श्वेताश्वः श्वेतवाहनः।
गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी॥
(तत्रैव ९३।२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मत्स्पुराणेऽङ्कितमस्ति यत्—आयुरारोग्यपुष्टि-श्री-शान्तिकामेन पुंसा ग्रहयज्ञोऽवश्यं विधातव्यः[1] । श्रुति-स्मृति-पुराणादिविद्भिर्विपश्चिद्भिर्ग्रहयज्ञस्त्रिविधः प्रोक्तो विद्यते—एकोऽयुतहोमः, द्वितीयो लक्षहोमः, तृतीयश्च सर्वकामप्रदः कोटिहोमः[2] । तत्रायुतहोमो विवाहोत्सवयज्ञेषु प्रतिष्ठाकर्मणि च विधेयः, येन सर्वा बाधा दूरीभवेत् । अयुतहोमेनाश्वमेधयज्ञफलप्राप्तिर्भवति । कोटिहोमात् सर्वयज्ञफलं भवति, भुक्तिर्मुक्तिर्वा लभ्यते । एवं यथा गावो राजानो ब्राह्मणाश्च सत्कृताः सन्तो विशेषं फलं प्रददति, अनादृताश्चानिष्टमपि कुर्वन्ति, तथैव ग्रहा अपि पूजिता इष्टं प्रददति, नापूजितास्तु न[3] । अतो ग्रहशान्तिरवश्यं कर्त्तव्या, तया सर्वोपद्रवाणां निवारणं जायते नूनम्[4] । अपि च यस्मिन् गृहे त्रयाणामेषां ग्रहयज्ञानामङ्कितं चित्रं स्थाप्यते तत्र विशेषतो बालानां काऽपि ग्रहजन्यपीडा न भवति, न च कश्चन रोगो जायते, न वा किञ्चित् कष्टमुपतिष्ठते । अतो बालकानामारोग्यार्थं ग्रहबाधानिवृत्तये च ग्रहयज्ञानां चित्रस्थापनमत्यावश्यकमस्ति[5] । पाश्चात्यज्योतिर्विद्भिर्मङ्गलग्रहस्य नामकरणं मार्स (MARS) इति कृतमस्ति, यस्य तात्पर्यं युद्धकालीनमार्सल(MARSHAL)शब्देनास्ति । एवं मङ्गलग्रहस्य विशेषदशायामनिष्टफलोत्पत्तिस्तैरपि स्वीक्रियते । भारतीयज्योतिषशास्त्रेण तु मङ्गलशनैश्चरादीनां दुष्टग्रहाणां कुप्रभावतो रक्षायै अनेके उपाया निर्दिष्टाः सन्ति, तथा तेषां विशेषमन्त्रैः स्नानेन दानेन होमेन बलिना च तत्प्रसन्नता प्रदर्शिताऽस्ति । तथा च—

स्नानैर्दानैर्हवनबलिभिस्तत्र तुष्यन्ति खेटाः ।

उपसंहारः

प्रायः सर्वेषु शास्त्रेषु परिभाषिकशब्दानां भवत्यावश्यकता, या हि तस्य शास्त्रस्य विशेषताऽस्ति । एतदनुसारमेव पुराणेष्वपि पारिभाषिकशब्दानां महान् प्रयोगोऽस्ति । यथा सर्ग-प्रतिसर्ग-मन्वन्तर युग-कल्प-पर-परार्द्ध-सन्धि-सन्ध्यंशादयः शब्दाः । व्याकरणनियमव्युत्पत्य-

---

१. श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृद्ध्यायुःपुष्टिकामो वा तथैवाभिचरन् पुनः ॥
(वि० पु० ९२।२)

२. ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ।
प्रथमोऽयुतहोमास्याल्लक्षहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः ॥
(तत्रैव ९२।५½)

३. ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः ।
पूजिताः पूजयन्त्येते निर्दहन्त्यवमानिताः ॥
(तत्रैव ९२।७९)

४. यथा बाणप्रहाराणां कवचं वारकं भवेत् ।
तद्वद्दैवोपघातानां शान्तिर्भवति वारिका ॥
(तत्रैव ९२।८०)

५. ग्रहयज्ञत्रयं गेहे लिखितं यत्र तिष्ठति ।
न पीडा तत्र बालानां न रोगो न च बन्धनम् ॥
(तत्रैव ९२।१५६)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नुसारं लोकव्यवहारे सामान्यरूपेण योऽपि अर्थः सम्भवेत्, परन्तु पुराणेषु प्रयुक्तानामेषां शब्दानां स एवार्थोऽभिमतो भविष्यति, यो हि व्यासपरिभाषया निश्चितो भवेत् । अतः पुराणानामनुशीलनसमये तेषां यथार्थेष्वर्थेषु अवश्यं ध्यानं प्रदेयम्, अन्यथा वैपरीत्यभ्रमोऽनिवार्यतया सम्भवेत् । एवञ्च कस्यापि ग्रन्थस्य वास्तविकमभिप्रायं व्यञ्जयितुं तद्ग्रन्थे प्रदत्तपारिभाषिकशब्दानामावश्यकता भवति । भूगोल-खगोलयोस्तु पारिभाषिकशब्दानामधिकं मूल्यं महत्त्वमावश्यकता च वरीवर्ति, यतो हि तत्सम्बन्धिनं प्रत्येकं भावं व्यक्तीकर्तुं भूयो भूयः पारिभाषिकशब्दानां भवति प्रयोग आवश्यकः । पारिभाषिकशब्दानामर्थसीम्नो निर्द्धारणं ग्रन्थकारस्येच्छायामस्ति निर्भरम् । स यं शब्दं यावद् व्यापकं कर्तुं वाञ्छति, तं तावत् स्वेच्छापूर्वकं करोति । अस्मिन् विषयेऽन्यस्य कस्यचिद् विचारस्तस्मिन् नियन्त्रणं कर्तुं न प्रभवति । अतः पौराणिकभूगोलविषयकपारिभाषिकशब्दानामर्थसीमा पौराणिकभाषानुसारमेव मन्तुं शक्यः । लोकव्यवहारे भूमण्डलशब्दस्यार्थः कामं पृथ्वीमण्डलं भवेत्, किन्तु पुराणेषु भूमण्डलशब्दस्य परिभाषा कृताऽस्ति यत् सूर्यो यावद्दूरं स्वकीयं तापमुपस्थापयितुं शक्नोति; तथा ताराभिः सह चन्द्रमा वा यावत्पर्यन्त दृश्यते तावद् विस्तृतं स्थानं भूमण्डलमुच्यते । तथाहि—श्रीमद्भागवते भूमण्डलायामविशेषो यावदादित्यस्तपति यत्र चासौ ज्योतिषां गणैश्चन्द्रमा वा दृश्यते (५।१६।१); विष्णुपुराणेऽप्युक्तमस्ति यत् सूर्यकिरणानां यावत् प्रकाशो जायते तथा चन्द्रमसो रश्मयो यावत्पर्यन्तमुपतिष्ठन्ते तावत्प्रदेशस्य नाम पृथ्वी वर्तते । स च समुद्र-नद-नदी-पर्वत पर्यन्तः कथं न स्यात् । अनयैव दृष्ट्या पृथिव्या दैर्घ्यविस्तारौ पञ्चाशत्कोटियोजनपरिमितावुक्तौ स्तस्तथा सप्तसमुद्राणां वर्णनमप्यनयैव दृष्ट्या कृतमस्ति[1] ।

---

१. रविचन्द्रमसोर्यावन्मयूखैरवभासते ।
ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ।। (वि०'पु० २।७।३)

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गतिभक्षणार्थकः √चर् [चर] : अर्थविज्ञानम्

डॉ० भागीरथप्रसादत्रिपाठी 'वागीशः शास्त्री'
अनुसन्धानसंस्थाननिदेशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालये

√चर् (चर) १।५५८ गत्यर्थः, भक्षणेऽपि (प)। वोपदेवस्तु त्रिष्वर्थेषु पठति धातुमिमम्—'गमनेऽदने आचारे' इति। एवमाचारार्थोऽधिकोऽन्यवैयाकरणानामर्थनिर्देशनात्। वस्तुतस्तु चर्धातोर्गतिभक्षणरूपावर्थावेव मुख्यौ। गतेर्व्यापकत्वादाचारादीनां तत्रैवान्तर्भावः, अन्यथाऽऽचारार्थवद् अनन्तानामर्थानामिहोल्लेखेन गौरवादिति धातुपाठेष्वर्थद्वयस्यैव संकेतः। चुरादौ (२०५) संशयार्थकश्चर्धातुर्दृश्यते। रलयोरभेददर्शनाच्चल्धातुरस्यैव भेदः।

१. ऋ० (१, २४, ६) 'नेमा आपो अनिमिषं चरन्तीः' इत्यत्र चर्धातोः प्रवाहरूपेण गमनमर्थः, अपां गमनं नाम प्रवाह इतीह जलशब्दसंनिधानात् सामान्यगत्यर्थकश्चरधातुर्विशिष्टगत्यर्थको जातः। चल्धातुः कम्पनरूपेऽर्थे पठितः। चर्धातुस्तस्यार्थमभिव्यनक्ति—'चरत् पतत्रि' (ऋ० ३, ५४, ८) इत्यत्र 'चरत् = चञ्चलं पशुजातम्, पतत्रि = पक्षिजातम्' इति सायणः। सरीसृपकर्तृकस्य चर्धातोरिङ्गणमर्थः—वा० रा० (२, २८, १९)।

२. गगने गमनमुड्डयनम्। अयमर्थः संचरणशब्देनापि प्रकटीक्रियते, सम्यक् चरणेन तथार्थाभिव्यक्तेः। ऋ० (६, ५८, ३) 'यास्ते पूषन्नावो अन्तःसमुद्रे हिरण्ययीरन्तरिक्षे चरन्ति' इत्यत्र समुद्रान्तरिक्षयोरुभयोश्चरणं नाम संचरणम्। ऋ० (१०, १०२, ८) 'शुनमष्ट्राव्यचरत् कपर्दी इत्यत्र, ऋ० (१०, ५४, २) 'यदचरस्तन्वा वावृधानः' इत्यत्र च संचरणरूपोऽर्थश्चर्धातोः। आख्यातचन्द्रिकायां भट्टमल्लेन चर्धातोः संचाररूपोऽर्थो दर्शितः (२, ३, १२१)।

३. 'गावो यवं प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश्चरन्तीः' इत्यृग्वेदे (१०,२७,८) 'सहगोपाः = पशुपालकेन सहिताः, चरन्तीः = घासं भक्षयन्तीः' इत्यर्थः सायणेन कृतः, यवादिपदसंनिधानात्। वा० रा० (१, ४०, २६)—

ते तु सर्वे महात्मानो भीमवेगा महाबलाः।
ददृशुः कपिलं तत्र वासुदेवं सनातनम्॥

हयं च तस्य देवस्य चरन्तमविदूरतः।
प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन॥

इत्यत्र कपिलस्याविदूरतो हयस्य चरणं नाम घासभक्षणम्। पशवो घासं भक्षयन्तः शनैः शनैरग्रेसरन्त्यपीति तेषां चरणेन भक्षणरूपोऽर्थो गृह्यते, मनुष्याणामिव तेषामविचरणत्वात्। पशूनामेतादृश्या प्रवृत्त्या जातस्य चर्धातोर्भक्षणार्थस्य मनुष्येष्वप्यारोपः। वा० रा०(२,२०,५)–

अबुद्धिर्बत नो राजा जीवलोकं चरत्ययम्।
यो गतिं सर्वभूतानां परित्यजति राघवम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यत्र सर्वभूतानां गते राघवस्य परित्यागो हि जीवलोकस्य भक्षणमेवेत्यन्तःपुरस्त्रीणामाशयः। वा० रा० (२, २०, ५)—

अद्य त्विदानीं रजनीं पुत्र मा गच्छ सर्वथा।
एकाहं दर्शनेनापि साधु तावच्चराम्यहम्॥

दशरथस्योक्तिरियं रामं प्रति। 'त्वया सह साधु भोक्ष्यामि' इति तदाशयः। त्रिष्वेव स्थलेषु तिलकटीकायामपि भक्षणरूपोऽर्थः प्रतिपादितश्चरधातोः। चरति (४, ४, ८) इति पाणिनीये सूत्रे चर्धातोर्गतिभक्षणरूपावर्थौ। अत एव हस्तिना चरति हास्तिकः, शकटेन चरति शाकटिक इतिवद् दध्ना चरति = भक्षयति दाधिक इति प्रयोगेऽपि ठग् जायते। णिच्यपि भक्षणार्थे चर्धातोः प्रयोगो दृश्यते। वा० रा० (२, ४५, ३३)—

ततः सुमन्त्रोऽपि रथाद् विमुच्य
श्रान्तान् हयान् संपरिवर्त्य शीघ्रम्।
पीतोदकांस्तोयपरिप्लुताङ्गम्
अचारयद् वै तमसाविदूरे॥

इत्यत्र सुमन्त्रः पीतोदकांस्तोयपरिप्लुताङ्गान् हयान् तमसाविदूरेऽचारयत् = भक्षिततृणान् अकारयद् इत्यर्थः। महाभारते (१२, ९, २१)—

अल्पं वास्वादु वा भोज्यं पूर्वालाभेन जातुचित्।
अन्येष्वपि चरंल्लाभमलाभे सप्त पूरयन्॥

इति वानप्रस्थभिक्षुवद् जीवनयापननिश्चये युधिष्ठिरस्य 'अल्पं वास्वादु वा भोज्यम्' इत्युक्त्या चर्धातोः सुस्पष्टं भक्षणमर्थः। हिन्दीभाषायां 'चरना' 'चराना' इत्युभयत्र भक्षणरूपोऽर्थः। तत्रापि पशूनां घासादिभक्षणप्रसङ्गे धातोरस्य प्रयोगो जायते, न तु मनुष्याणां भोजनप्रसङ्गे। शनैः शनैर्बहुभक्षणमुद्दिश्य बहुभोजिनं प्रत्यपीदृशः प्रयोगो दृश्यते क्रियमाणः। हरिवंशपुराणेऽपि द्रष्टुं शक्यते (द्र० २, ५५, ३२)।

४. ऋ० (१, ५७, ४)—

'इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसः'

इत्यत्र 'प्रभूतधन ! अत एव बहुभिर्यजमानैः स्तुत ! हे इन्द्र ! ये च वयं त्वामारभ्य = आश्रयतयावलम्ब्य चरामसि = चरामः = यागे वर्तामहे' इति शब्दार्थः। इह चर्धातोर्वर्तनमर्थः। मनसा सह प्रयुज्यमानस्य चर्धातोरपि वर्तनमर्थः (ऋ० ७, १०४, ८) 'यो मा पाकेन मनसा चरन्तम्' = शुद्धेन मनसा वर्तमानम् इत्यर्थः। 'अन्वग्रं चरति क्षेति बुध्नः' इत्यृग्वेदे (३, ५५, ७); यज्ञेषु सम्यग् राजमानोऽग्निरन्वग्रम् = दिवि सूर्यभूतस्तत्र वर्तत इति सायणः। 'अग्रं मुख्यं भागं चरति = भक्षयति' इत्यर्थमप्याह सः। ऋ० (७, ४६, ३)—

'या ते विद्युदवसृष्टा दिवस्परि क्ष्मया चरति।'

इत्यत्र दिवस्परि = अन्तरिक्षसकाशाद् अवसृष्टा = विमुक्ता विद्युत् = अशनिरूपा हेतिः, क्ष्मया = क्षित्या क्षितौ वा चरति = 'वर्तते' इति वर्तनरूपोऽर्थश्चर्धातोः। नैषध० (१८,११०)-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'भुज्यमाननवयौवनाऽमुना पारसीमनि चचार सा मुदाम्'

इत्यत्र भुज्यमाननवयौवना दमयन्ती मुदाम् = आनन्दानां पारसीमनि = चरमावस्थायाम् अवर्ततेति वर्तनरूपोऽर्थश्चर्धातोः। वस्तुतः कर्माभावे चर्धातुः स्थाधातुवदर्थं प्रकटयति। किन्तु स्थाधात्वर्थे तथा स्वारस्यं नास्ति यथा वर्तने। अत एव वृत्तचरित्रयोः पर्यायवाचकता।

५. ऋ० (१,५२,६) 'परीं घृणा चरति तित्विषे' इत्यत्र चर्धातुर्व्याप्त्यर्थकः, घृणायाः शत्रुजयलक्षणाया दीप्तेस्तथात्वेनौचित्यात्।

६. यत्रान्तर्भूता अनेकाः क्रिया भवन्ति, तत्र क्रियासामान्यवाचकेन कृधातुना भावाभिव्यञ्जना। एतादृशेषु स्थलेषु टीकाकारैः 'यथा स्यात् तथा' इति लिख्यते। महाभारते (१४,१९,१६)—

तस्योपदेशं वक्ष्यामि यथावत् तन्निबोध मे।
यैर्द्वारैश्चारयन् नित्यं पश्यत्यात्मानमात्मनि॥

तस्य = योगशास्त्रस्योपदेशप्रसङ्गे यैर्द्वारैः = चित्तनिग्रहोपायैः, आत्मानम् = चित्तम्, आत्मनि = देहे यथा स्यात् तथा चारयन् = अन्तर्मुखं कुर्वन्निति चर्धातुः क्रियासामान्यवाचकस्य करणस्यार्थमाविष्करोति। तत्रैव १३,२२,१३)—

अधीयानः पण्डितं मन्यमानो
यो विद्यया हन्ति यशः परेषाम्।
प्रभ्रश्यतेऽसौ चरते न सत्यं
लोकास्तस्य ह्यन्तवन्तो भवन्ति॥

इत्यत्र सत्यम् = यज्ञादिकम् अव्यभिचरितफलं कर्म न चरते = न करोतीत्यर्थः संपद्यते। वा० रा० (१,४६,३) 'साहं तपश्चरिष्यामि' इत्यत्र 'चरिष्यामि' इत्यस्य 'करिष्यामि' इत्यर्थः। अनुष्ठानविधानादिशब्दैर्विवरणं भवितुं नार्हति, तयोर्निश्चितार्थत्वात्। करणरूपार्थेन च सर्वविधानां तपसामभिव्यक्तिः, न तु सीमितानाम्। मनु० (२,१८७)—

'अवकीर्णिव्रतं चरेत्' इत्यत्रावकीर्णिव्रतानुष्ठानेऽन्तर्भूतोपक्रियाणां प्रकटनाय कृधातुना व्याख्यानं साम्प्रतम्। वस्तुतस्त्विह 'आङ्' इत्युपसर्गपूर्वकस्यार्थस्य वाचकश्चर्धातुः। किन्तु तेनार्थेन स्पष्टताभावे कृधातुद्वारा विवरणोपपत्तिः। स्थूलतस्तु नैयत्येऽनुष्ठानाचरणादीनां याथातथ्येन प्रयोगः क्रियत एव। वा० रा० 'तपश्चचार' इत्यत्र तिलकटीकाकर्त्रा 'ततापः' इति विवृण्वता क्रियासामान्यवाचकः कृधातुर्निर्दिष्टः, तपसैव तस्योक्तत्वेन क्रियामात्रवाचकत्वादिति।

७. यद्यपि मनु० (२,१८५)—

सर्वं वापि चरेद् ग्रामं पूर्वोक्तानामसंभवे।

इत्यत्र कस्यापि पदस्य संनिधानाभावे चर्धातुर्याचनार्थकः, तथापीतः पूर्वं—

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु।
अलाभे त्वन्यगेहानां पूर्वं पूर्वं विवर्जयेत्॥

इत्यस्य श्लोकस्योपन्यासेन भिक्षार्थसंबन्धात्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

८. मनु० (९, ३०६) 'प्रविश्य सर्वभूतानि यथा चरति मारुतः'। सर्वभूतान्तः प्रविश्य मारुतस्य विचरणं संभवतीतीह चर्धातुर्विचरणार्थकस्तदाह कुल्लूकभट्टः—'यथा प्राणाख्यो वायुः सर्वजन्तुष्वन्तः प्रविश्य विचरति' इति। तत्रैव (७,२५) 'यत्र श्यामो लोहिताक्षो दण्डश्चरति पापहा' इत्यत्र शास्त्रप्रमाणावगतस्य श्यामवर्णस्य लोहितनयनाधिष्ठातृदेवताकस्य दण्डस्य विचरणमेव साधीयः।

९. मनु० (२,१६३)—

सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते।
सुखं चरति लोकेऽस्मिन्नवमन्ता विनश्यति॥

इत्यत्र 'प्रतिबुद्धः सन् सुखपूर्वकं कार्येषु प्रवर्तते' इति प्रवृत्तिरूपोऽर्थश्चर्धातोः। यद्यपि विचरणादिरूपा अर्था भवितुमर्हन्ति, तथापि लौकिकानां सामान्यक्रियाणां शयनप्रतिबोधनादीनां दर्शनेन कार्यप्रवर्तनरूपस्यार्थस्य निश्चयो विज्ञातव्यः।

१०. मनु० (२,४८)

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद् भैक्षं यथाविधि॥

इत्यत्र कुल्लूकभट्टः—'चरेत् = याचेत' इति, तन्न मनोरमम्, भैक्षपदेनैव याचनार्थस्योक्तत्वात्। मनु० (२,१८२) 'भैक्षं चाहरहश्चरेत्' इत्यत्र च तेनैवार्जनार्थस्य निर्णीतत्वाद् इति भैक्षपदसंनिधानाच्चर्धातुरर्जनार्थकः।

११. मनु० (२,२४९)—

एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः।
स गच्छत्युत्तमस्थानं न चेह जायते पुनः॥

इत्यत्र ब्रह्मचर्यव्रतस्योल्लेखादनुष्ठानरूपोऽर्थो निर्धारणीयश्चरधातोः। ब्रह्मचर्ये च विधिनिषेधानामाचरणं विहायावान्तरक्रियादीनामसंनिवेश इति नास्थेयं विवरणं कृधातुना। एवमेव महाभारते (१२, २१४, १)—

अत्रोपायं प्रवक्ष्यामि यथावच्छास्त्रचक्षुषा।
तत्त्वज्ञानाच्चरन् राजन् प्राप्नुयात् परमां गतिम्॥

इत्यत्र ब्रह्मचर्यस्योपायो दर्श्यत इति तत्त्वज्ञानात् चरन् = अनुतिष्ठन् इत्यर्थः। तत्रैव त्रयोदशे श्लोके—'रागोत्पन्नश्चरेत् कृच्छ्रम्' इत्यत्रापि ब्रह्मचर्योपायं कुर्वन्नपि यदि समुत्पन्नरागः स्यात्, तर्हि कृच्छ्रम् अनुतिष्ठेद् इत्यर्थः।

१२. मनु० (६,६८)—

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत्॥

इत्यत्र हिंसापरिहारपूर्वकं पृथिव्यां भ्रमणं विज्ञप्तम् इति चर्धातोरिह पर्यटनरूपोऽर्थः। इह यद्यपि तादृशं किमप्युपपदं नास्ति यस्य साहाय्येन चरधातोर्भ्रमणरूपमर्थं पार्येत निश्चेतुम्,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथापि प्रसङ्गस्य पर्यालोचनेन तथार्थविनिश्चयः। भ्रमणमपि गतिरिति धातोरर्थेनैव तस्य गतार्थतेति चेद्, न, सामान्यगमनाद् भ्रमणस्य पर्यटनस्य वा वैशिष्ट्यात्। अत एव भ्रमधातुरनवस्थाने पठितः, न तु गमने। 'चेरतुः खरदूषणे' इति भट्टि० (५,१) 'भ्रान्तौ' इति जयमङ्गलः।

१३. वा० रा० (२, ३५, ३३) 'परिवादो हि ते देवि महाँल्लोके चरिष्यति' इत्यत्र प्रचरणरूपोऽर्थश्चर्धातोरिति प्रोपसर्गाभावेऽपि तदन्वितार्थसंपत्तेः। तत्रैव (२, ६६, २६)—

गते तु शोकात् त्रिदिवं नराधिपे महीतलस्थासु नृपाङ्गनासु च।
निवृत्तचारः सहसा गतो रविः प्रवृत्तचारा रजनी ह्युपस्थिता॥

इत्यत्र 'रविः सहसा निवृत्तचारः = निवृत्तकिरणप्रचारः' इति चर्धातोः प्रचाररूपोऽर्थः। तत्रैव (२, ८५, १३) 'शाश्वती खलु ते कीर्तिर्लोकाननु चरिष्यति' इत्यत्र 'चरिष्यति = प्रचरिष्यति' इति तिलकटीका।

१४. मनु० (२, २३) 'कृष्णसारस्तु चरति मृगो यत्र स्वभावतः' इत्यत्र चरणेन विचरणं नाभिप्रेतम्, न च घासादिभक्षणमेव। इहैकान्ततश्चरणं नाम वासोऽभीष्टः, अध्युषितदेशेनातिमात्रसंयोगात्। एवमेव वाल्मीकीये रामायणे (४, ५१, ७; ८)—

काञ्चनानि च पद्मानि जातानि विमले जले।
कथं मत्स्याश्च सौवर्णाश्चरन्ति सह कच्छपैः॥

इतीह निवासोऽर्थः, तरणार्थेन तेषामल्पकालसम्बन्धात्।

१५. मनु० (९, २८७)—

'समैर्हि विषमं यस्तु चरेद् वै मूल्यतोऽपि वा'

समैः = सममूल्यदातृभिः सहोत्कृष्टापकृष्टद्रव्यप्रदानेन वैषम्यपूर्वकं चरणं नाम व्यवहरणम्। इह 'मूल्यतः' इति पदस्य सांनिध्येन प्रसङ्गेन च व्यवहारार्थो निर्णेतुं पार्यते। 'सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च' इति मनु० (८, ३६२), चारयन्ति = व्यवहारयन्तीत्यर्थः।

१६. वा० रा० (२, २८, १५)—

कार्यस्त्रिरभिषेकश्च काले काले च नित्यशः।
चरतां नियमेनैव तस्माद् दुःखतरं वनम्॥

इति रामोक्तिः सीतां प्रति। चरतां नियमेनैव नित्यशः काले काले च त्रिरभिषेकः कार्यः। इह चर्धातोरर्थो नास्ति स्पष्टः—किं चरताम् इति जिज्ञासासमाध्यभावात्। 'काले काले' इति प्रसङ्गाद् इह चर्धातोः कालक्षेपरूपोऽर्थः। तदुक्तं तिलकटीकायाम्—'चरताम् = कालक्षेपं कुर्वताम्' इति।

१७. वा० रा० (२, ६१, २३) 'द्विजातिचरितो धर्मः शास्त्रे दृष्टः सनातनः' इत्यत्र चर्धातुराचरणार्थकः। गीता० (३, २६) 'पापं चरति पूरुषः' इत्यत्र शाङ्करभाष्ये चरति = आचरतीत्यर्थः। नीलकण्ठस्तु करोतीति व्याख्यानमाह, तन्न युक्तम्, धर्मपापयोराचरणविषयत्वात्। 'धर्मं करोति' 'धर्ममनुतिष्ठति' इत्यादीनां विवरणम् आङ्पूर्वकेण चर्धातुनैव कर्तुं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

युक्तम् । आवरणानुष्ठानकरणादीनामर्थानामैक्येऽपि 'धर्मकरणम्' इत्यस्य स्थाने 'धर्माचरणम्', 'यज्ञाचरणम्' इत्यस्य स्थाने यज्ञानुष्ठानम् इत्यादिप्रयोगाणामौचिती ।

१८. महाभारते (१२, १२३, ७) 'सन्निकृष्टांश्चरेदेतान् न चैतान् मनसा त्यजेत्' इत्यत्र धर्मार्थकामानां चरणं नाम सेवनम् । यद्यपि धर्मस्यानुष्ठानं भवतीति धर्मार्थकामानामनुष्ठानं स्यात्, तथापि तदितरद्वयस्याननुष्ठानात् सेवनार्थं उक्तः । 'धर्मं चरति' (४, ४, ४१) इत्यत्र तत्त्वबोधिनीकारः—'चरतिरिहाऽऽसेवायां न त्वनुष्ठानमात्रे' इति । गीता० (२, ६४) 'रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन्' इत्यत्र 'चरन् = सेवमानः' इत्यर्थः । हरिवंशे (३, १९, १७)—

अरूपी रूपसंपन्नो धातुभिः सह संगतः ।
अन्यश्चरति भूतेषु कामकारकरो वशी ॥

इत्यत्र सूक्ष्मतरत्वाच्चान्तर्यामिरूपेणान्तर्देहान्तः स्थित्वा चरति = विषयान् भुङ्क्ते, कामकारकरत्वात् (= स्वतन्त्रेच्छत्वात्) । तत्रैव (३, २७, ४४)—

त्वमेव वसुधायुक्तो विश्वं चरसि सीमया ।
एकीकृत्य गणान् सर्वान् संक्षिप्यामुत्र संभवः ॥

इत्यत्र वसुधायुक्तो भौमप्राणिरूपेण चरसि = विषयान् सेवसे, सीमया = मर्यादया नियमेनेति चर्धातुः सेवनार्थः, गणानाम् = इन्द्रियादीनामुल्लेखात् ।

१९. हरिवंश० (३, १८, २८)—

अव्यक्ताद् व्यक्तिमापन्नं स्वेन भावेन भारत ।
अन्तःस्थं सर्वभूतेषु चरन्तं विद्यया सह ॥

इत्यत्र चर्धातोः प्रकाशनरूपोऽर्थः, ब्रह्माकारचित्तवृत्तिरूपविद्यापदोपादानाद् इति ब्रह्माकारचित्तवृत्त्या सह चरन्तम् = प्रकाशमानमित्याशयः । एवमेव तत्रैव (३, १६, ८)—

विकारपुरुषोऽव्यक्तो ह्यरूपी रूपमाश्रितः ।
चरत्यचिन्त्यः सर्वेषु गूढोऽग्निरिव दारुषु ॥

इत्यत्र 'विकारपुरुषो मात्रादिव्यक्तः, रूपम् = दृश्यमाश्रितः सन्, चरति = दृश्यं प्रकाशयति' इति प्रकाशनरूपोऽर्थः, अग्न्युपमया तथार्थप्रतीतेः ।

२०. भट्टि० (१०, ८) 'ह्वलता जनेन बहुधाचरितं चरितं महत्त्वरहितं महता' इत्यत्र 'चरितम्' इत्यस्य चेष्टितमित्यर्थः, चरितस्य = चेष्टितस्याऽऽचरणात् । इदं चेष्टितमेव चरित्रम् ।

२१. नैषध० (२१, ९०) 'यत् तव स्तवविधौ विधिरास्ये चातुरीं चरति तच्चतुरास्यः' इत्यत्र चातुरीशब्दोपादानेन चर्धातोः प्राप्तिरूपोऽर्थः, चातुरीं करोतीत्यस्य विवरणेन भिन्नाभिप्रायात् ।

२२. भारोपीयभाषाणां मूलधातुरस्ति—तालव्यः केल्-केल इति परिवर्तनवेष्टनसंचरणाद्यर्थकः । (कर्तव्यकार्यानुष्ठाने) धर्मादिवर्तनार्थेऽयं धातुरवेस्ताभाषायां प्रयुक्तः—चरइति (Caraiti) इति । तत्रैव चरान (Carana) इति च कार्यक्षेत्रवाचकः शब्दः । पारसीक-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाषायां तु ध्यानप्रवृत्तिपोषणकृषिसंस्कृतिवाचकः पर्युपसर्गपूर्वकः 'परिकरा' इति शब्दः। तत्र चकारः ककारत्वेन प्रयुक्त इति मूलधातावेवेङ्गितम् (द्र० जूलियसपाकर्नीः ६३९ पृ०)।

२३. प्राकृतभाषायां ज्ञानरूपोऽर्थोऽधिकः—चरइ (उव, महा) इति। हिन्दीभाषायां संस्कृतभाषावद् भ्रमणविचरणाद्यर्थे, पशूनां क्षेत्रेषु भ्रमणपूर्वकं घासादिभक्षणेऽर्थे प्रयोगः। कालान्तरे भ्रमणपूर्वकभक्षणार्थस्य चरधातोर्भ्रमणाभावेऽपि प्रयोगः समजायत। इदानीं गावः शङ्कुबद्धा अपि गमनाभावेऽपि चरन्ति = भक्षयन्ति। ते च तत्रैव 'चारा' भक्षणीयं प्राप्नुवन्ति। तत्र च स्थिताः सन्त एव घासादिकं चरन्ति। इदमेव 'चारा' = (भक्षणीयम्) उपायार्थेऽपि प्रयुज्यते—'अब कोई चारा नहीं रहा' इति। अयमेव 'चारा'शब्दः पारसीकभाषाया 'बे' (सं०, वि०) इत्यस्य सहकारेण 'बेचारा' = निरुपायार्थको जातः। भक्षणार्थिका 'चरना' इति क्रिया पशूनां संबन्ध एव व्यवह्रियत इति मनुष्याणां सम्बन्धे प्रयोगो निन्दार्थको भवति। प्रादेशिकभाषायामपि तथैव दृश्यते—

पड़ पड़ कें पड़ा भये, चर चर हो गये लाठ।
बाप ने पूँछी का पड़े, सोरा दूनी आठ॥ इति।

एवं तावच्चर्धातोरिह त्रयस्त्रिंशदर्थाः पर्यालोचिताः—१. प्रवाहः (कम्पनम्), २. उड्डयनम् (संचरणादि), ३. भक्षणम्, ४. वर्तनम्, ५. व्याप्तिः, ६ करणम्, ७. याचनम्, ८. विचरणम्, ९ प्रवर्तनम्, १०. अर्जनम्, ११. अनुष्ठानम्, १२. पर्यटनम् (भ्रमणम्), १३. प्रचरणम्, १४. वासः (निवासः), १५. व्यवहारः, १६. यापनम् (कालक्षेपः), १७. आचरणम्, १८. सेवनम् (आसेवा), १९. प्रकाशनम्, २०. चेष्टा, २१. प्राप्तिः, २२. ध्यानप्रवृत्तिपोषणकृषिसंस्कृतयः, २३. ज्ञानं चेति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाषालक्षणलक्ष्यीकरणम्

(सुशीला सर, ३९ शक्तिनगरम् दिल्ली–७)

संस्कृतभाषेयं चिरकालादाचार्याणां विवेचनविषयतां गता वर्ततेऽस्मिन् देशे। पाणिनिना एकया व्यवस्थितप्रक्रियया संस्कृतभाषा विवेचिता।

पतञ्जलिमतानुसारेण भाषायां विद्यमानाः शब्दार्थसम्बन्धाः लोकप्रमाणिताः सन्ति।

भर्तृहरिर्भाषायास्तात्त्विकस्वरूपमेवं वदति—

सत्यमाकृतिसंहारे यदन्ते व्यवतिष्ठते।
तन्नित्यं शब्दवाच्यं तच्छब्दत्वं न तु भिद्यते॥

स भाषातत्त्वं सृष्ट्याः सत्यत्वं नित्यरूपत्वञ्च स्वीकरोति। इयं परिभाषा दार्शनिकी, यत्र भाषाया अर्थतत्त्वमस्तित्वञ्च संकेतितमस्ति। अनेन सूच्यते एषामाचार्याणां मते भाषा केनचिदपि समाजेन स्वीकृता वाचिकप्रतीकानां व्यवस्थास्ति।

एवं कथयितुं शक्यते यद् भाषा मुखोच्चारितयादृच्छिकप्रतीकानाञ्च एका व्यवस्था वर्तते। यां माध्यमीकृत्य समाजोऽयं विचारविनिमयादिकं स्वव्यवहारं व्यवस्थितरूपेण संसाधयति।

मुखोच्चारितप्रतीका ध्वनिप्रतीका एव सन्ति। एषां ध्वनीनां संघटनायामेका व्यवस्था भवति। एषा व्यवस्था च भाषाविशेषस्य व्याकरणमित्युच्यते। एकस्या भाषाया व्याकरणम् अन्यभाषाव्याकरणाद् भिन्नं वर्तते। इयं भिन्नता ध्वनौ व्यवस्थायाश्चोभयत्र भवति।

२. ध्वनिः—कश्मीरभाषायाः ध्वनिसमूहः संस्कृतस्य ध्वनिसमूहाद्भिन्नोऽस्ति। भाषाविशेषस्य ध्वनेर्न्यूनतमखण्डं तद्भाषायाः स्वनिमानः (वर्णाः) इति कथयन्ति। 'स्वनिम'पदवाच्यस्य वर्णस्य लक्षणं भाषावैज्ञानिकैरित्थं क्रियते—

भाषाविशेषस्य सा जातिः 'स्वनिम' इति कथ्यते, या भाषायाः एवंविधाभ्योऽन्यजातिभ्यो भिन्ना भवेत्। अथ च यस्याः सदस्या मिथः परिपूरका मुक्तवितरणे च वर्तमाना भवेयुरिति। 'स्वनिमानः' (वर्णाः) स्वरात्मका व्यञ्जनात्मकाश्च भवन्ति।

कश्मीरभाषायाः स्वरात्मकस्वनिमानो निम्नलिखिताः सन्ति।

२. १. स्वरात्मकध्वनयः—

डेनियलजोन्जप्रतिपादितानां कार्डिनलस्वराणामुपस्थापनमुपजीव्याधुनिकानां संस्कृतकश्मीरभाषयोः स्वराणां व्याख्या एवं शक्यते कर्तुम्।

कार्डिनलस्वराः कस्या अपि भाषाविशेषस्य स्वरा न सन्ति। किन्त्वयमस्ति स आधारो यमधिकृत्य विभिन्नभाषाणां स्वराणामध्ययनं शक्यते कर्तुम्। अत एवोच्यते कार्डिनलस्वरा भाषाविशेषस्य स्वरेभ्य एकं तुलायन्त्रमस्ति, अथवा तुलायन्त्रवत् कार्यं करोति। जोन्जेन अष्टानां प्रधानानां कार्डिनलस्वराणां कल्पना कृता।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथा च--(i) ई (u) ऊ रेखोपरि तालु। (a) अ s (d) आ इत्यस्याधो मुखविवरस्य निम्नभाग इत्यवगम्यते। (i) ई (e) ए (z) ऐ (a) अ s रेखाया मुखविवरस्याग्रभागः, (u) ऊ (o) ओ (ɔ) ऑ (d) आ रेखाया मुखविवरस्य पश्चभाग इति। इत्थं 'ई' 'ए' 'ऐ' 'अऽ' इमे ध्वनयः अग्रस्वराः, 'ऊ' 'ओ' 'ऑ' 'आ' इमे च ध्वनयः पश्चस्वराः परिगणयितुं शक्यन्ते।

प्रधानकार्डिनलस्वरेषु सर्वेषामग्रस्वराणामुच्चारणकाले ओष्ठयोराकृतिः अवर्तुला भवति। तद्विपरीततया सर्वेषां पश्चस्वराणामुच्चारणकाले ओष्ठयोराकृतिः वर्तुला ज्ञायते।

ई, ऊ इत्यनयोरुच्चारणकाले मुखविवरं पूर्णसंकुचितं भवति। अर्थात् जिह्वा तालुप्रदेशस्य पर्याप्तसमीपमागच्छति। अत इमौ स्वरौ संवृतौ (संकुचितौ) इत्युच्यते। तद्विपरीततया 'आ' इत्यस्योच्चारणे मुखविवरं पूर्णविकसितं भवति, अर्थात् जिह्वा मुखविवरस्याधोभागेन संलग्ना भवति। अनेनेमं स्वरं विवृतं (विकसितम्) कथयितुं शक्नुवन्ति। धीरेन्द्रवर्मणापि संवृतविवृतेत्यनयोः शब्दयोः प्रयोगः अस्मिन्नेवार्थे कृतः।[1]

एते संस्कृतस्वरा निम्नचित्रेण इत्थं व्याख्यातुं शक्यन्ते—

	अग्रवर्तुलाकारः		पश्चवर्तुलाकारः	
	ह्रस्वः	दीर्घः	ह्रस्वः	दीर्घः
संवृतम्	इ	ई	उ	ऊ
अर्धविवृतम्	०	ए	०	ओ
विवृतम्	अ	आ	०	०

चित्र संख्या (१)

चित्रे (०) अयं संकेतः शून्यस्थाने प्रयुक्तः।

कश्मीरभाषायां (ई, ए,) इति द्वावग्रस्वरौ (उ, औ, ऑ,) इति त्रयः पश्चस्वराः (उ, ओ', आ) इति मध्यस्वराः सन्ति। अत्राप्यग्रस्वराणामुच्चारणकाले ओष्ठ्योरवस्था अवर्तुलाकारा, पश्चस्वराणामुच्चारणे वर्तुलाकारा वर्तते। मध्यस्वराणामुच्चारयितुः ओष्ठावपि अवर्तुलाकारो ज्ञायते। इमे अष्टौ स्वराः ह्रस्वदीर्घोभयरूपेणोपलभ्यन्ते कश्मीरभाषायाम्। निम्नचित्रेण एते स्वरा इत्थं व्याख्यातुं शक्यन्ते—

	अग्रवर्तुलाकारः		मध्यवर्तुलाकारः		पश्चवर्तुलाकारः	
	ह्रस्वः	दीर्घः	ह्रस्वः	दीर्घः	ह्रस्वः	दीर्घः
संवृतम्	इ	ई	उ	ऊ	उ	ऊ
अर्धसंवृतम्	ए'	ऐ'	ओ'	ओ	ओ'	ओ
विवृतम्	०	०	अ	आ	अँ	ऑ

चित्रसंख्या (२)

१. हिन्दी भाषा का इतिहास, पृष्ठ १०१।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एषां षोडशस्वराणां सिद्धिः निम्नतालिकया क्रियते—

ह्रस्वः		दीर्घः	
कश्मीरी	संस्कृतम्	कश्मीरी	संस्कृतम्
इ फिर	न्यस्य	ई फीर	पर्यवर्तत
ए' गे'ज	संकुच्	ऐ हेर	सोपानम्
अ तर	उत्तर	आ तार	पारं कारय
उ गुर	तुरगः अश्वः	ऊ गूर	गोपः
ओ' तो'र	उदतरत्	ओ तोर	पारं गमितः
अँ सँद	सरलः	आँ साँद	सपादः
| |		| |	
उ तुर	कर्तरनम्	ऊ तूर	शीतः
।, ।,		।, ।,	
ओ तोर	उदतरत्	ओ तोर	पारं गमिता

इति ।

२. २ व्यञ्जनात्मकध्वनयः—

संस्कृतस्य व्यञ्जनानि वैज्ञानिकविधिना क्रमबद्धानि सन्ति । प्रतिवर्गं समानमुच्चारस्थानं संकेतयति । वर्गाक्षरञ्च प्रयत्नं द्योतयति । अर्थात् कवर्गस्योच्चारणस्थानं कण्ठः, पवर्गस्य चोच्चारणस्थानमोष्ठौ स्तः । प्रयत्नमाधारीकृत्य वर्गस्य प्रथमव्यञ्जनम् अघोषाल्पप्राणः, द्वितीयः अघोषमहाप्राणः, तृतीयः घोषाल्पप्राणः, चतुर्थः घोषमहाप्राणः पञ्चमश्च नस्योऽस्ति । कवर्गादारभ्य पवर्गपर्यन्तं सर्वे ध्वनयः स्पर्शध्वनयः सन्ति । यवरलाः अन्तस्थाः, कथ्यन्ते । शषसहाः उष्माणश्च । कश्मीरभाषायां वर्गचतुर्थव्यञ्जनानि न सन्ति । तत्र भाषायां केवलं द्वावेव 'नासिक्य'ध्वनी स्तः । यथा—दन्तनासिक्यः [न] ओष्ठनासिक्यश्च [म] इति । ईश्वरकौलस्य ग्रन्थे कश्मीरशब्दामृतेऽपि संकेत उपलभ्यते । तत्राप्रसिद्धवर्णेषु 'ज' इत्यस्योल्लेखं परिगणनं कृत्वापि ईश्वरकौलेन निर्दिष्टमस्ति "ञकारश्च प्रसिद्धोच्चारणतया न शब्दाप्यते ।"

ञकारस्योच्चारणं साम्प्रतं सर्वासु भारतीयासु साम्प्रतिकभाषासु विलुप्तमिव दृश्यते । चञ्चलादिसंस्कृतशब्दानां यदा हिन्द्यादिभाषासु प्रयोगः क्रियते, तदा लेखे ञकारोऽपि लिख्यतेऽनुस्वारचिह्नस्यापि प्रयोगः दृश्यते लिपौ, तथापि उच्चारणे सर्वत्र नकारस्यैवोच्चारणं प्रसिद्धम् । आधुनिकभारतीयभाषाप्रभावप्रभावितैः सर्वैरेव विद्वद्भिरपि संस्कृते 'चञ्चल' व्यञ्जनादिशब्देषु ञकारः नोच्चार्यते । तथैव कश्मीरीभाषायामपि परम्परा समापतिता । कश्मीरभाषायां द्वे स्पर्शसंघर्षिव्यञ्जने [च, छ,] अतिरिच्येते । ययोरुल्लेखः 'कश्मीरशब्दामृतम्' ग्रन्थे प्राप्यते । इमे व्यञ्जने संस्कृतभाषायां नैवोपलभ्येते । अनयोरुच्चारणस्थानं दन्त्याम् । उच्चारस्थानप्रयत्नौ अधिकृत्य कश्मीरभाषाया व्यञ्जनानि निम्नाङ्कितचित्रेण स्पष्टीक्रियते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२. २. १. कश्मीरीव्यञ्जनानि—

			ओष्ठ्यम्	दन्त्यम्	वर्त्स्यम्	तालव्यम्	मूर्धन्यम्	पश्च-तालव्यम्	जिह्वामूलीयम् कण्ठ्यम्
अप्रवाही	स्पर्शी	अल्प-प्राणः	प		त		ट	क	
		महा-प्राणः	फ		थ		ठ	ख	
		अल्पप्राणः घोषः	ब		द		ड	ग	
	स्पर्श-संघर्षी	अल्प-प्राणः	०		च	च			
		महा-प्राणः	०		छ	छ			
		अल्पप्राणः घोषः			०	ज			
प्रवाही		नासिक्यम्	म		न				
	अन्तःस्थ्यम्	अकम्पितम्	व		ल	य			
		कम्पितम्			र				
	ऊष्मा	अघोषः			स	श			
		घोषः			ज				ह

चित्रसंख्या (३)

२. २. १. १. संयुक्तव्यञ्जनानि—

कश्मीरभाषायां [ब्, त्, द्, ड, ग, र, ज] अन्यव्यञ्जनैः सह संयोज्य संयुक्तव्यञ्जनानि निर्मातुं शक्नुवन्ति । एषु [ब्, ड्, ज्,] इत्येतानि केवलं नासिक्यव्यञ्जनेभ्यः पश्चादागन्तुं शक्नुवन्ति । अथ च [ग्] इति [र्, न्] इत्यनयोः पश्चात् प्रयुज्यते । यथा—

१—(छॅम्ब) 'तिगडम' । [अम्ब] 'आम्रः'

२—(सॅनुमर्ग) 'स्थानस्य नाम' ।

३—(तिह्न्द) 'तेषाम्' ।

४—(पो'न्ज) 'वानरः' ।

५—(ह्वंग) 'श्रंगः' ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कश्मीरभाषायां व्यञ्जनत्रययुतानि संयुक्तव्यञ्जनानि अत्यल्पानि सन्ति । अत्र प्रायः त्रयाधिकानि संयुक्तानि व्यञ्जनानि नैव सम्भवन्ति । एतादृशं पदमल्पीयोऽस्ति यत्र भवति संयुक्तं व्यञ्जनमयम् । यथा—

| ,
(ओन्द्रम्) 'अन्त्रम्' ।

२, २, २, मात्रास्वराः—

'कश्मीरशब्दामृते' प्रायः अकारान्ताः शब्दाः उकारान्तरूपेण लिखिताः दृश्यन्ते । यथा—[गुर्] 'अश्वः' इत्यत्र [गुरु] इति प्राप्यते[1] । ग्रियर्सनेनापि इदं भूमिकायां संकेतितम् । केचिद्विद्वांसः अन्तिमोकारमेकं रहस्यास्पदं ध्वनिं स्वीकुर्वन्ति । ग्रियर्सनः स्वस्य "ए मैन्युएल आफ कश्मीरी लेंग्वेज" नामकग्रन्थे अमुं रहस्यात्मकध्वनिं मात्रास्वरनाम्ना प्राह स्म । "वेली" 'मोर्गेन्सटायरने' आभ्यामपि मात्रिकस्वरः कथितः ।[2] काचरुमहोदयस्य मतमस्ति[3] कश्मीरी-भाषायां शब्दस्य प्रारम्भिकान्तिमेषु च संयुक्तव्यञ्जनेषु श्रुतेरावश्यकता भवति । इयं श्रुतिः परिवेषे आधृता भवति । सम्भवतः इयमेव श्रुतिः मात्रास्वरसंज्ञया प्रोच्यते ।

२, २, ३, स्वरसमतालता—

स्वरसमतालता कश्मीरीभाषायाः एका वैलक्षण्यमादधाना प्रकृतिः । बह्वाक्षरिकशब्देषु यदि प्रथमाक्षरस्वरः वर्तुलाकारमुखेनोच्चारितो भवेत्तर्हि अन्याक्षरस्वराः अपि वर्तुलाकारमुखे-नोच्चारणार्हा एव उपलभ्यन्ते ।

यथा—

१—[पोर्] 'अपठत्' इत्यर्थके पूर्णभूतस्य प्रत्ययः [मुत्] इति संयुज्य आगतः [पोर्मुत्] पठितवानित्यर्थके इत्येवोच्चार्यते । अस्यैव शब्दस्य स्त्रीलिङ्गरूपेण विधीयते चेत् प्रत्यक्षरे स्वरः समानरूपेण परिवर्त्यते ।

यथा—

(पोर्) इत्यस्य स्त्रीलिङ्गे रूपं [पोर] इति भवति । (पोर्मुच्) अत्र पूर्णभूतस्य [मुत्] प्रत्ययस्य स्थाने [मुच्] प्रत्ययः संयुज्यते ।

पुलिङ्गे (पोर) इत्यस्य स्वरः वर्तुलाकारमुखोच्चार्यः, अतः प्रत्ययोऽपि वर्तुलाकारमुखो-च्चार्यस्वरयुक्तः प्रयुज्यते ।

स्त्रीलिङ्गे (पोर्) इत्यस्य स्वरः अवर्तुलाकारमुखोच्चारणीयो जायते, अतः प्रत्ययोऽपि अवर्तुलाकारमुखोच्चार्यस्वरयुक्तः प्रयुज्यते । सम्भवतः इमामेव स्वरसमतालतामाधारीकृत्य आचार्यैः शब्दान्ते मात्रिकस्वरः कल्पितः ।

---

१. कश्मीरशब्दामृते—पृ० ३ ।
२. ए रेफरैन्स ग्रामर आफ कश्मीरी, पृष्ठ ६२, ६३ ।
३. ए रेफरैन्स ग्रामर आफ कश्मीरी, ब्रज बी० काचरु, पृष्ठ ६३ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

३, भाषाव्यवस्था—

भाषायाः पदानि प्रातिपदिकधातुप्रकृतिभूतान् वर्णानधिकृत्य निर्मितानि भवन्ति। भाषायाः रचना वाक्यैर्भवति। वाक्यानां विभागं पदानि कथयन्ति। पदानि च शब्दमूलानि। शब्दानां मूलं वर्णः। अतः यदा भाषाविशेषस्य व्यवस्था विचार्यते तदा इमानि सर्वाणि विचारपथमागच्छन्ति। वाक्यसंरचनापि पदानां व्यवस्थाधीना भवति। पदव्युत्पत्तिव्याख्या भाषायाः विविधानां प्रक्रियाणामन्तर्गत्यैव कर्तुं शक्यते। कश्मीरभाषायाः संज्ञापदं संस्कृतभाषाया इव लिङ्गवचनकारकप्रक्रियाभिः प्रभावितं भवति।

३, १ लिङ्गप्रक्रिया—

संस्कृतभाषायां त्रीणि लिङ्गानि सन्ति। यथा—पुंल्लिङ्गं, स्त्रीलिङ्गं, नपुंसकलिङ्गं। प्राकृतभाषाविकासकालादेव नपुंसकलिङ्गस्य प्रयोगः विलुप्तः। कश्मीरभाषायां द्वे लिङ्गे स्तः। यथा—पुंलिङ्गं स्त्रीलिङ्गं। पुंलिङ्गमाधारीकृत्य स्त्रीलिङ्गसिद्धिः क्रियते। अत्र 'कश्मीरशब्दामृतम्' ग्रन्थात् सूत्राणि दीयन्ते। यैः प्रक्रिया स्पष्टीभविष्यति।

यथा—

'मनुष्यजातेः सर्वत्र वाय्' ।६।२।

अर्थात् ईश्वरकौलेन प्रायः जातेः भेदद्वयं दर्शितम्। तन्मते एका जातिः सम्प्रदायसिद्धा, यथा विप्रादिः; द्वितीया व्यवसायप्रयोज्या, यथा—लोहकारस्वर्णकारादिः। अत्र पशुपक्ष्यादीनां जातिः तेन जातित्वेन न प्रोक्ता। अत्र सूत्रेऽपि विशेषतः मनुष्यशब्दकथनात्। तयोरेव द्वयोः जात्योः स्त्रीलिङ्गेन व्यवहारे कर्तव्ये सति 'वाय' प्रत्ययः संयुज्यते।

यथा—

१—[दरवाय] 'दर', साम्प्रदायिकजातिनाम।

१—[खारवाय] 'लोहकारस्त्री' व्यवसायात्मकजातिनाम।

'अनादरार्थे क्वलय' ।६।३।

मनुष्यजात्यर्थकाद् शब्दात् स्त्रीलिङ्गात् अनादरे द्योत्ये (क्वलय) 'कॅलय' प्रत्ययो भवति।

यथा—

१—[छानक्वलय] छानकॅलय 'तक्षकस्त्री'।

२—[वातलक्वलय] वातलकॅलय 'चर्मकारस्त्री'।

'खरश्च' ।६।६।

खरशब्दः भाषायां गर्दभाय प्रयुज्यते। तत एव स्त्रीलिङ्गे द्योत्ये ऊमात्रागमो विकल्पेन भवति। अयमूमात्रागमः स्वरसमतालतायाः एव अवगन्तव्यः।

यथा—

१—[खर्] 'गर्दभी'।

पक्षे—

२—[खरिज्] 'गर्दभी'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'लान्तानां जः' ।६।७।

विशेष्यविशेषणपदानामुकारसहितानां लकारान्तानां शब्दानां लकारस्य जकारादेशः भवति। अत्र वृत्तौ दृश्यते काचित् त्रुटिः। अत्र 'उलु' प्रत्ययस्य लकारस्य जादेशविधानं विवक्षितमस्ति। उलुप्रत्ययश्चोकारान्तो न तु लान्तः। अतोऽत्र विवक्षितार्थप्रतिपादनाय उकारान्तानां लकाराणामितीदृशोऽर्थो वाच्यः। इमम् उकारं स्वरसमतालतायां स्पष्टितम्।

यथा—

|

१—[वोज्] 'ऊर्मिका'।

|

२—[मोज्] 'माता'।

'त्र्यक्षरादीनामुलोप उलोश्च' ।६।८।

यस्मिन्शब्दे त्र्यक्षराणि भवेयुः। तत्र यः 'उलु' प्रत्ययः स्यात्तस्य उलुप्रत्ययसम्बन्धिनः उपधायाः उकारस्य लोपो वर्तते। अत्रापि दृश्यते सूत्रवृत्तौ त्रुटिः। उलुप्रत्यय उपधायामुकाराभावात्। अत उलु-प्रत्ययाद्युकारस्य लोप इत्यर्थो वाच्यः।

यथा—

पुं०	स्त्री
१—[गादुल्]	(गादुज्) 'दक्षा'
	|
२—(फुटुल्)	(फुटुज्) 'पोटलिका'।

'कवर्गान्तानां चवर्गः' ।६।६।

उकारयुक्तानां कवर्गान्तानां पुंलिङ्गानां शब्दानां स्त्रीलिङ्गे चवर्गादेशो भवति।

यथा—

पुं०	स्त्री०
	|
१—[वतुक्]	[वतुच्] 'वर्तिका'।
, |	, |
२—[होख]	[होछ्] 'शुष्का'।

'तवर्गान्तानामप्रसिद्धः'। ६। ११।

तवर्गान्तानां पुंलिङ्गानां शब्दानां स्त्रीलिङ्गविषये संस्कृते अप्रसिद्धः चवर्गादेशो वर्तते।

यथा—

पुं०	स्त्री०
|,	|,
१–[मोत्]	[मोच्] 'उन्मता'।
२–[क्वथ्] कॅथ	[क्वछ्] कॅछ 'मारिका'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'कंगोऽल्पार्थे राकारश्च' । ६ । १२ ।

यस्मिन् पात्रे अग्नयो निधीयन्ते तदग्निधानिका कंगित्युच्यते। तस्मादेव कंगशब्दादल्पार्थे 'र' प्रत्ययः सर्वत्र भवति । आदेः स्वरस्याकारादेशश्च भवति ।

यथा—

१–[कांग्र्] 'हसन्तिका' अथवा कांगडीति हिन्द्याम् ।

'स्त्रियां ञनौ च' । २ । १ । ५१ ।

मनुष्यसंज्ञया स्त्रीलिङ्गस्य सम्बन्धे सति सम्बन्धिलिङ्गादेकत्वबहुत्वयोः 'ञ्' 'ञ' प्रत्ययौ भवतः ।

यथा—

पुं०	स्त्री०
१–[मनु]	[मनुञ्] 'इत्यस्य नाम्नः' ।
२–[रामु]	[रामुञ् 'रामस्य' ।

'हस्तशब्दान्नित्यमिञ्' ६ । १९ ।

हो'स्त (हस्त) शब्दः गजे प्रयुज्यते । अस्मात् शब्दान्नित्यं स्त्रीप्रत्यये 'इञ्' प्रत्ययो भवति ।

यथा—

पु०	स्त्री०
१–[हो'स्त]	[होस्तिञ्] 'हस्तिनी' ।
२–[काव]	[काविञ्] 'काकी' ।

'कावनागवूंटभ्यश्च' ६ । २० ।

एभ्यः शब्देभ्योऽपि 'इञ्' प्रत्ययो नित्यं प्रयुज्यते ।

यथा—

पुं०	स्त्री०
१–[नाग]	[नोगिञ्] 'सर्पिणी' ।
२–[वूंट]	[वूंटिञ्] 'उष्ट्रा' ।

'अन्यतोऽपि पशुजातेः' ।

अत्राप्यर्थः स्पष्टः । भाषायां खरशब्दः गर्दभाय प्रयुज्यते । तत्रैव 'इञ्' प्रत्यये इत्थं रूपं भवति । यथा—

१–[खरिञ्] 'गर्दभी' ।

'मनुष्यजातेरञ्' । ६ । २८ ।

मनुष्यजात्यर्थकात् शब्दात् स्त्रीविषये 'अञ्' प्रत्ययो भवति । प्रायः अकारान्तानां पुरुषवाचकानां शब्दानामेव अयं नियमः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यथा—　　पुं०　　स्त्री०

१–(वटु)　　(वटञ) 'ब्राह्मणी' ।

३. १. १, एतेषां सूत्राणां सिद्धिकरणानि अधस्ताद् दीयन्ते ।

सूत्र सं०—[दर] [कौल] 'दर' 'कौल' साम्प्रदायिकजातिनाम [खार] व्यवसायात्मकजातिनाम, लोहकारः ।

६।२　[दरवाय्] [कौलवाय्] 'दर' 'कौल' जातिस्त्रियौ (खारबाय) 'लोहकारस्त्री' ।

[खर] 'गर्दभः' ।

| ,

६।६　[खोर्] 'गर्दभी' ।

[वोल] 'छिद्रः' [मोल्] 'पिता' [ज़ोल्] 'जाला' ।

२।१।३०　[वोलि्] – [मोलि्] – [ज़ोलि्] – ।

२।१।६९　[वालि्] – [मालि्] – [ज़ालि्] – ।

|　|　|

२।१:७०　[वालि्] – [मालि्] – [ज़ालि्] – ।

|　|　|

६।७　[वाजि्] – [माजि्] – [ज़ाजि्] – ।

६।६　[वोज्] 'उर्मिका',[मोज्] 'माता', [ज़ोज्] 'जालाः, सिद्धम् ।

[गाटुल्] 'दक्षः', [फुटुल्]'पोटलिकः' [च़कुल्] 'चक्रिकः' ।

६।८　[गाटल्] – [फुटल्] – [चकल्] – ।

६।७　[गाटज्] – [फुटज्] – [च़कज्] – ।

|　⋮　|

६।६　[गाटुज्] 'दक्षा', [फुटुज्]'पोटलिका', [च़कुज्] 'चक्रिका', सिद्धम् ।

[वतुक्] 'वर्तिकः', [हो'रव्] 'शुष्कः', [ड्यूंग] 'तन्तुगुटिकाः' ।

६।९　[वतुच्] – [होछ्] – [डींज्] – ।

६।८　[वत्चु] – [०] – [०] – ।

|

६।६　[बवुच्], 'वर्तिका', [हो'छ्] 'शुष्का', [डींज्] -तन्तुगुटिका' सिद्धम् ।

|

[मोत्] 'उन्मतः' [क्वथ्] 'मारिकः' [व्वरुद्] 'पुनर्भूः' ।

| ,

६।११　[मोच्] – [क्वछ्] – [व्वरुज्] – ।

| ,　|

६।६　[मोच्] 'उन्मता',[क्वछ्] मारिका, [व्वरुज्] – सिद्धम् ।

सिद्धरूपम्–[मनु] 'इत्यस्य नाम', [रामु] 'रामः [श्यामु] 'श्यामः' ।

५

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२।१।५१ [मनुञ्] 'इत्यस्य नाम' [रामुञ्ञ्] 'रामः' [श्यामुञ्] श्यामस्य ।

[होस्त्] 'गजः' [काव्] 'काकः' [नाग्] 'सर्पः' [वूंट्] उष्ट्रः ।

६।१६ [हस्तु इञ्] 'हस्तिनी' — — — — —

६।२० [०] – [काव् इञ्] – [नाग् इञ्] – [वूंट् इञ्] –

१।३ [हस्तिञ्] – [कांचिञ्] 'काककी', [नौगिञ्] 'सर्पिणी', [वूंटिञ्] उष्ट्रा । सिद्धम् ।

[वटु] 'ब्राह्मणः' [मुसलमान्] 'म्लेच्छः'

६।२८ [बटञ्] 'ब्राह्मणी' [मुसलमानञ्] 'म्लेच्छस्त्री' ।

६।३ [क्वलय] 'कॅलय स्त्री' अनादरेण प्रोक्ते सति । अयं शब्दः नित्यस्त्रीलिङ्गः ।

इत्येते शब्दाः साधिताः ।

एवं लिङ्गप्रक्रियया संज्ञापदेषु परिवर्तनं भवति । अत्र कश्मीरभाषायां 'बाय्' 'क्वलय्' 'उलु' 'र' 'ञ्' 'इञ्' 'अञ्' प्रत्ययाः स्त्रीद्योतका भवन्ति । लकारान्तस्य जकारः, कवर्गान्तानां चवर्गादेशः, तवर्गान्तानां संस्कृते अप्रसिद्धश्चकारादेशः स्त्रीलिङ्गे भवन्ति । एतत् सर्वं दर्शितम् ।

३, १, २, कानिचित् स्त्रीलिङ्गपदानि ईदृशान्यपि सन्ति, येषां प्रकृतिः पुंल्लिङ्गशब्दो नास्ति । अर्थाद् ये नित्यस्त्रीलिङ्गशब्दाः भवन्ति । यथा—

पुं०	स्त्री०
१—[दान्द] 'वृषभः'	[गाव्] 'गौः' ।
२—[रुन्] 'पतिः'	[क्वलय] कॅलय 'पत्नी' । इत्यादिः ।

३, २, वचनप्रक्रिया—

संस्कृते त्रीणि वचनानि भवन्ति । यथा—एकवचनम्, द्विवचनम्, बहुवचनञ्च । कश्मीर-भाषायाञ्च वचने अपि द्वे एव स्तः । यथा—एकवचनम्, बहुवचनञ्च ।

'एकानेकाभ्यां द्वे द्वे वचने' ८।१।४

अत्र पूर्वं निगदितमेव यत् प्रातिपदिकेषु वचनेनापि परिवर्तनमागन्तुं शक्नोति । सूत्रोदा-हरणाभ्यां स्पष्टीक्रियते—

'अकारान्तानां प्रथमैकबहुत्वे लिङ्गवत्' २।१।१ ।

प्रथमायामकारान्तानां लिङ्गानामेकवचनं बहुवचनञ्च स्त्रीपुंलिङ्गयोर्लिङ्गवद् विज्ञेयम् । 'लिङ्गवद्' शब्देन मूलशब्दः कश्मीरशब्दामृतस्य ग्रन्थकारस्याभिमतः ।

यथा—

प्र० एक व०	प्र० बहु० व०
१—[ड्यक]	[ड्यक] 'ललाटानि' ।
२—[मामयः]	[माम] 'मातुलाः' ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'ऊदन्तानां पुंसि' ।२।१।२।

ऊकारान्तानाञ्च लिङ्गानां प्रथमाया एकवचनं वहुवचनञ्च लिङ्गवत् (मूलशब्दवत्) भवति पुंलिङ्ग एव। किन्तु तेषु पूर्ववर्णसम्वन्धिनः स्वरस्य स्थानेऽप्रसिद्धः संस्कृतेऽप्राप्तः स्वरोः विधीयते। स च प्लुताकारवद् उच्चार्यते।

यथा--

प्र० ए० व० प्र० बहु० व०

| |

१--[दोन्] [दोन्] 'करकाः'।

'व्यञ्जनान्तानां च' ।२।१।३।

व्यञ्जनान्तानां पुंलिङ्गानां प्रातिपदिकानां प्रथमैकवहुत्वे लिङ्गवद् भवतः।

यथा-- प्र० ए० व० प्र० बहु० व०

१--[दय्] [दय्] 'ईश्वराः'।

'बहुत्वेऽकारागमः' ।२।१।११।

व्यञ्जनान्तानाम् [इद्] ऊदन्तानाञ्च स्त्रीलिङ्गानां प्रथमाया वहुवचनेऽकारागमो भवति।

यथा-- प्र० वहु० व० (स्त्री०)

[पच्य]

'कृतादेशानामूमात्रा आगमः' ।२।१।१६।

यत्र यत्र वचने व्यञ्जनान्तानां लिङ्गानामादेशः कृतः स्यात्, तत्र ऊमात्राया आगमो भवति स्त्रीलिङ्गे।

यथा--

|

१--(सोच्) 'आशाः'।

|

२--(रोच्) 'रात्रीः'।

अत्राप्यूकारस्य स्वरसमानतायाः प्रभाव एव अवगन्तव्यः, पुंल्लिङ्गेऽप्युकारस्य सत्ताया ज्ञेयः। पुंलिङ्गे बह्वाक्षरिकशब्देषु यदा अन्तिमाक्षर उकारः स्यात्, तदा उकारः अकारे परिवर्तते।

यथा-- प्र० एक० व० प्र० बहु० व०

१--[गगुर्] [गगर] 'मूषकाः'।

|

२--[वातुल्] [वातल] 'चर्मकाराः'। इति

अनया साधितवचनप्रक्रियया ज्ञापितं भवति यत् प्रातिपदिकं वचनेन प्रभावितं भवति।

३, २, १, एतेषां सूत्राणामुदाहरणानि साध्यन्ते—

पुंल्लिङ्गे—प्र० एकव०—

|

सूत्र सं० [ड्यक) 'ललाटम्' [होज्] 'नाविकः' [माम] 'मातुलः'।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्र० बहु० व०—

२।१।१ [ड्यक] 'ललाटानि' [होंज्] 'नाविकाः' [माम] 'मातुलाः' ।

स्त्री० प्र० एकव०

[व्यञ] 'भगिनी' [अछ] 'नयनम्' [गट्ठ] 'अन्धकारम्' ।

स्त्री० प्र० बहु० व०—

२।१।१ [व्यञ['भगिन्यः' [ओछ] 'नयने' [गट्ठ] 'अन्धकाराः' ।

पुं० एकव०—

[दोन्] 'करकः' ।

प्र० बहु० व०—

२।१।२ [दोन्] 'करकाः' ।

पुं० प्र० एकव०—

[दय्] 'ईश्वरः' [खर्] 'गर्दभः' [पोश्] 'पुष्पः' ।

प्र० वहु० व०—

२।१।३ [दय्] 'ईश्वराः' [खर्] 'गर्दभाः' [पोश्] 'पुष्पाणि' ।

स्त्री० प्र० एकव०—

[पोट्] 'फट्टिका' [होट्] 'काष्ठं' [लोट्] 'पुच्छम्' ।

प्र० बहु० व०—

२।१।११ [पट्] [हट्] [लठ्]

२।१।२२ [पच्] [हच्] [लच्]

२।१।३० [पचि] [हचि] [लचि]

१।१० [पच्य] 'फट्टिकाः' [हच्य] 'काष्ठानि' [लच्य] पुच्छानि ।

पुं० प्र० ए० व०—

[गुर्] 'अश्वः' [शुर्] 'वालः' [खुर्] 'असामञ्जस्यम्' इत्यादिः ।

३, ३, कारकप्रक्रिया—

सम्बन्धं सम्बोधनं च परित्यज्य संस्कृतभाषायां पट् कारकाणि दृश्यन्ते विभक्तयश्च सह ।

"कर्ता कर्म च करण च सम्प्रदानं तथैव च ।
अपादानाधिकरणे इत्याहुः कारकाणि षट् ॥"

क्रियाजनकं हि कारकमुच्यते । सम्बन्धे या षष्ठी तस्यां क्रियाजनकता नास्ति, अतः सम्बन्धषष्ठ्याः कारकत्वं न स्वीकृतम् । यद्यपि देवदत्तकर्तृकेऽध्ययने 'देवदत्तस्याध्ययनम्'

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पुस्तककर्मके चाध्ययने 'पुस्तकस्याध्ययनम्' इत्यादि प्रयोगेषु कर्तरि कर्मणि च षष्ठी दृश्यते, तथाप्यत्र तु देवदत्तपुस्तकार्थः कर्तृकर्मकारकरूप एवेति, न कारकस्य षड्भेदस्वीकृतौ कापि न्यूनतेति ।

कश्मीरभाषायाः कारकप्रक्रियां स्पष्टीकुर्वता ईश्वरकौलेन सम्बन्धस्य सम्बोधनस्य च कारकरूपेणोल्लेखः कृतः । संस्कृते सर्वाः कारकविभक्तयः प्रातिपदिकेन सहैव संयुज्यन्ते । कश्मीरभाषायां तिस्रः कारकविभक्तयः एव प्रातिपदिकेन साकं युक्ता भूत्वा आगच्छन्ति । तथा चावशिष्टपञ्चकारकविभक्तिषु विभक्तिः परसर्गश्च प्रयुज्येते । याः कारकविभक्तयः प्रातिपदिकेन सह युज्यन्ते, ता यथा—कर्ता, कर्म सम्बोधनञ्च ।

कारकैः (विभक्तिभिः) परसर्गैश्च मिलितैरर्थः स्पष्टीभवति, तानि यथा—करणम्, सम्प्रदानम्, अपादानम्, सम्बन्धः अधिकरणञ्च । अत्र कानिचिद् रूपाणि सदृशानि सन्ति । तत्र अर्थतो विभिन्नत्वं परसर्गे भवति । एतानि सर्वाणि कारकाणि परसर्गश्च अधस्ताद् दीयन्ते । आदिमानि त्रीणि कारकाणि, यानि प्रातिपदिकेन सह मिलन्ति, निर्दिश्यन्ते ।

कर्ता	पु० ए० व०	[–अ न]
	,, बहु० व०	[–अ व]
	स्त्री० ए० व०	[–इ]
	,, बहु० व०	[–अ व]
कर्म	पु० ए० व०	[–अ स]
	,, बहु० व०	[–अ न]
	स्त्री० ए० व०	[–इ]
	,, बहु० व०	[–अ न]
सम्बोधनम्	पु० ए० व०	[–आ]
	,, बहु० व०	[–अ व]
	स्त्री० ए० व०	[–ई]
	,, बहु० व०	[–अ व]

ते विभक्तिपरसर्गाः ये प्रातिपदिकान्ते संयुज्यार्थान् अभिव्यञ्जन्ति । यथा अधस्ताद् दीयन्ते—

करणम्	पु० ए० व०	[– उनि सूत्य । दस्य ।]
	,, ब० व०	[– अव सूत्य । दस्य]
	स्त्री०ए० व०	[– इ हुन्दि सूत्य]
	,, ब० व०	[– अव हुन्दि सत्य]
सम्प्रदानम्	पु० ए० व०	[–उ सुन्दि खोतरु पुछ्य]

CC-0. Sampurnanand University Collection. Digitized by eGangotri

	,, बहु० व०	[– अन हुन्दि खोतरु पुछ्य]
	स्त्री० ए० व०	[– इ हुन्दि खोतरु ,,]
	,, ब० व०	[– अन हुन्दि खोतरु ,,]
अपादानम्	पु० ए० व०	[– उ प्यठ्]
	,, ब० व०	[– अव प्यठ्]
	स्त्री०ए०व०	[– इ प्यठ्]
	,, ब० व०	[– अव प्यठ्]
सम्बन्धः	पु० ए० व०	[– उ सुन्द]
	,, ब० व०	[– अन हुन्द]
	स्त्री०ए०व०	[– इ हुन्द]
	,, ब० व०	[– अन हुन्द]

अत्र सम्बन्धकारके जडार्थवाचकानां प्रातिपदिकानां पु० एकवचने [– उक्] तथा च स्त्रीलिङ्गे [इच्] विभक्तिः इष्यते ।

अधिकरणम्	पुं० ए० व०	[– अस मंज़ । प्यठ । निश]
	,, ब० व०	[– अन मंज़ । प्यठ । निश]
	स्त्री०ए० व०	[– इ मंज़ । प्यठ । निश]
	,, ब० व०	[– अन मंज़ । प्यठ । निश]

३. ३. १. एतेषां कारकाणां परसर्गाणाञ्च प्रयोगः प्रातिपदिकेन निर्दिश्यतेऽधः ।

मूलशब्दः [गोबुर] 'बालः' [व्यञ्जनान्तः] पुंलिङ्गः

	एक० व०	बहु० व०
कर्ता	गोबुरन्	गोबुरव
कर्म	गोबुरस	गोबुरन्
करणम्	गोबुरनि सूत्या दस्या ।	गोबुरव सूत्य दस्य
सम्प्रदानम्	गोबुरु सन्दि खातरु । पुछ्य	गोबरन हुन्दि खातरु । पुछ्य
अपादानम्	गोबुरुप्यठ्	गोबरव प्यठ्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सम्बन्धः	गोब्रुरु सुन्द	गोब्रुरन हुन्द
अधिकरणम्	गोब्रुरस मंज । प्यठ । निश	गोब्रुरन मंज । प्यठ । निश
सम्बोधनम्	गोब्रुरा	गोब्रुरव

मूलशब्दः (कूर्) 'कन्या' (व्यञ्जनान्तः) स्त्रीलिङ्गः

	एक० व०	बहु० व०
कर्ता	कोरि	कोर्यव
कर्म	कोरि	कोर्यन
करणम्	कोरि हन्दि सूत्य	कोर्यव हन्दि सूत्य
सम्प्रदानम्	कोरि हन्दि खातरु	कोर्यन हन्दि खातरु
अपादानम्	कोरि प्यठ्	कोर्यव प्यठ्
सम्बन्धः	कोरि हुन्द	कोर्यन हुन्द
अधिकरणम्	कोरि मंज । प्यठ । निश	कोर्यन मंज । प्यठ । निश
सम्बोधनम्	कूरी	कोर्यव

इत्थं लिङ्गेन वचनेन कारकविभक्तिभिश्च प्रातिपदिके सम्भाव्यमानं परिवर्तनम् ईश्वरकौलेन दर्शितम् ।

४. उपसंहारः

भाषाया लक्षणं लक्षयता मया कश्मीरभाषायाः संज्ञापदानां किञ्चिद् वैशिष्ट्यं प्रस्तुतम् । क्रियापदानामपि प्रचुरतया वैशिष्ट्यमस्ति, येषां विवेचनमन्यत्र सम्भाव्यते ।

कश्मीरभाषा दार्दिकपरिवारस्य भाषाऽस्ति, या आर्यभाषापरिवारस्य चैकः सेतुबन्ध इवास्ति । भाषाविज्ञानस्य काञ्चिद् विशिष्टप्रक्रियां स्पष्टीकर्तुं विदेशिभाषाणामुदाहरणानि प्रस्तूयन्ते । एतान्युदाहरणानि प्रायः कश्मीरभाषायां प्राप्यन्ते । अतः कश्मीरभाषायाः प्रक्रियाणां परिज्ञानाय तेषां निरूपणमावश्यकमस्ति ।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तात्पर्यवृत्तिविमर्शः

प० श्री वायुनन्दनपाण्डेयः, व्या० सा० आचार्यः, प्राध्यापकः साहित्यविभागे,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालस्य

तत्रभवान् वाग्देवताऽवतारो मम्मटः स्वकृतकाव्यप्रकाशे विलक्षणशब्दार्थौ काव्यमिति[1] काव्यस्वरूपमभिधाय तद्विधेयघटकार्थस्वरूपनिरूपणावसरे वाचक-लाक्षणिक-व्यञ्जकशब्दानां क्रमाद् वाच्य-लक्ष्य-व्यङ्ग्या ,अर्थाः सन्तीत्यभिधाय[2] सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वाद् वाक्यार्थस्यापि व्यञ्जकतया तद्विभागाकरणान्न्यूनतापत्ति परिहरन् "तात्पर्यार्थोऽपि केषुचित्"[3] इति सूत्रयाञ्चक्रे ।

अत्रायमभिसन्धिः—यथा पदार्थो व्यञ्जकः, तथा वाक्यार्थोऽपि । अन्वयरूपे वाक्यार्थे पदानां शक्तिस्वीकारे गौरवम्, (लाघवात् पदानां पदार्थमात्रे शक्तिः, अन्वयानामनेकविधत्वात् तत्र शक्तिस्वीकारे गौरवात्, अन्वयांशस्यान्यलभ्यत्वाच्च) । परं वृत्ति विनार्थबोधनेऽतिप्रसक्तिः स्यात्, अतः पदार्थानां मिथोऽन्वयरूपे वाक्यार्थे शब्दस्य तात्पर्याख्या वृत्तिरभ्युपगन्तव्या । तत्प्रतिपाद्यस्यार्थस्य तात्पर्यार्थत्वव्यपदेशः । स च आकाङ्क्षा-योग्यता-सन्निधिवशाद् जात्यादिरूप-पदार्थानां परस्परमन्वये वाच्यार्थभिन्नः प्रत्येकपदवृत्त्यविषयः पदसमूहगम्यो वाक्यार्थं इत्यभिहितान्वयवादिनां मतम् ।

तत्र जिज्ञास्यते—क इमेऽभिहितान्वयवादिनः ? मीमांसकाः, नैयायिकाः, वैयाकरणाः, वेदान्तिनः, आलङ्कारिका वा । (अन्यत्र दर्शनेषु प्रायः शब्दार्थविचारस्याप्रस्तुतत्वात्) तत्र वाक्यार्थविचारकुशला मीमांसका भाट्टाः प्राभाकराश्च ।

तत्र प्राभाकरास्तु—अन्विताभिधानवादिनः; तद्यथा प्रकरणपञ्चिकायां शालिकनाथः[4]—पदेभ्य एव वाक्यार्थप्रतीतिर्यथा भवति, तथा प्रभाकरगुरोर्मतं वयं निवध्नीम'[5] इति प्रतिज्ञायाह—पदार्थ एव प्रधानम्, गुणभूतार्थान्तरान्वितो वाक्यार्थ इत्युच्यते, न च पदार्थानामनेकत्वादनेके वाक्यार्था इति वाच्यम्, प्रधानपदार्थस्यैकत्वात् । इत्थं पदार्थानामन्वयो न वाक्यार्थः, किन्त्वन्विताः पदार्था एव वाक्यार्थः । यद्यपि वृद्धव्यवहारेणैव सर्वाश्शब्दव्युत्पत्तयो जायन्ते, वाक्यैरेव च

---

१. काव्यप्रकाशे प्रथमोल्लासे १ सूत्रम् ।
२. का० प्र० द्वि० उ० ६ सूत्रम् ।
३. का० प्र० द्वि० उ० ७ सूत्रम् ।
४. प्रकरणपञ्चिकायां सवृत्तिकवाक्यार्थमातृकायाः प्रथमपरिच्छेदे १ श्लोकः ।
५. तत्रैव द्वितीयः श्लोकः—

प्रधानगुणभावेन लब्ध्वाऽन्योन्यसमन्वयात् ।
पदार्थानेव वाक्यार्थान् संगिरन्ते विपश्चितः ।। इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वृद्धव्यवहारो भवति, तथापि यत्पदावापे यस्यार्थस्यावापः, यदुद्धारे चोद्धारस्तस्मिन्नेवार्थे तस्य पदस्य वाचकशक्तिर्निश्चीयते । न चैवमन्वितार्थप्रतीतिः कथमिति वाच्यम्, अन्वितपदार्थस्यैवावापोद्धाराभ्यां पदानामन्वितेष्वर्थेषु सामर्थ्यस्वीकारात् ।[1]

मम्मटोऽप्यन्विताभिधानवादिनः प्रभाकरस्य मते वाक्यार्थो वाच्य[2] एवेति निरूपयति । अन्यत्र च तन्मतमुपपादयन्नाह यद् बालकः[3] शक्तिग्रहवेलायां मध्यमवृद्धमुद्दिश्य गामानयेति उत्तमवृद्धस्य वाक्यप्रयोगात् सास्नादिमद्व्यक्तिमानयति सति मध्यमवृद्धे तच्चेष्टया तस्य वाक्यस्य तदर्थबोधकतामनुमिनोति । पश्चाद् गां नयाश्वमानयेति प्रयोगे गवापसरणमश्वाहरणं च दृष्ट्वाऽन्वयव्यतिरेकाभ्यां क्रियापदार्थान्विते कारके कारकपदस्य, कारकपदार्थान्वितक्रियायां च क्रियापदस्य शक्तिं निश्चिनोति । अतो बालस्य प्रथमत एवान्वितबुद्धिर्जायते । न च गौरवादन्वयांशः परित्यज्यत इति वाच्यम्, प्रथमज्ञातस्योपजीव्यत्वेनोपजीव्यपरित्यागानौचित्यात् । इत्थं प्रभाकरमते विशिष्टा एव पदार्था वाक्यार्थः, न तु पदार्थानां वैशिष्ट्यम्, अतस्तन्मतानुयायिनोऽन्विताभिधानवादिनः कथ्यन्ते ।

भाट्टमीमांसकाः सन्त्यभिहितान्वयवादिनः, तेषां मते पदैरनन्वितोऽप्यभिहितोऽर्थोऽन्वितार्थप्रतिपत्तेर्निमित्तं भवतीति पदानां पारम्पर्येणान्वितेष्वपि हेतुत्वम्[4], तथापि तेऽन्वितेऽर्थे पदानां शक्तिं न स्वीकुर्वन्ति, न वा पदार्थानामन्वयबोधाय तात्पर्याख्यां वृत्तिमङ्गीकुर्वन्ति, ते लक्षणयैव वाक्यार्थं प्रतिपादयन्ति ।

इदमत्र तात्पर्यम्—पदेनाभिधया प्रतिपादिता अर्था वाक्यतात्पर्यानुपपत्त्या आकाङ्क्षायोग्यता-सन्निधिवशाद् विशिष्टं रूपं स्वान्वयमनुभावयन्तीति वाक्यार्थो लक्ष्य[5] एव, पदेन यद् बोध्यते तद्वाच्यम्, पदार्थेन यद् बोध्यते तल्लक्ष्यमिति नियमात् ।

अत्र केचन संशेरते[6]—वाक्यार्थो न लक्ष्यः, स्वार्थस्यापरित्यागात् । लक्षणा तत्रैव भवति

---

१. प्रकरणपञ्चिकायां सवृत्तिकवाक्यार्थमातृकायाः प्रथमपरिच्छेदे ७ श्लोकः—
   ओप्यन्ते चोद्ध्रियन्ते च स्वार्था अन्वयशालिनः ।
   अन्वितेष्वेव सामर्थ्यं पदानां तेन गम्यते ॥
२. का० प्र० द्वि० उ० ७ सूत्रस्य वृत्तौ ।
३. का० प्र० प० उ० शब्दवृद्धाभिधेयांश्चेत्यादि ।
४. न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
   तन्मात्रावसितेष्वेषु पदार्थेभ्यः स गम्यते ॥
   श्लोक वा० अधि० ७, श्लोकः २२९ तमः ।
   वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
   पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥
   श्लोक वा० अधि० ७, श्लोक ३४३ तमः
   भाष्यकारः शबरस्वामी च पू० मी० १-१२५ ।
   पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि अथेदानीमवगताः सन्तः वाक्यार्थमेव गमयन्ति ॥ इति ।
५. 'वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेति न स्थितिः' इति वार्त्तिककारा मिश्रमहोदयाः ।
६. प्र० प० सवृत्तिकवाक्यार्थमातृकायाः प्रथमपरिच्छेदे ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्र स्वार्थस्य परित्यागः, यथा 'गङ्गायां घोषः' इत्यादाविति, तन्न, लक्षणीयानुरोधात् क्वचित् स्वार्थस्य त्यागः, क्वचित् संग्रहः, तद्यथा—'पौर्णमासीं यजेत' इत्यादावेकवचनानुपपत्त्या पौर्णमासीशब्दो यागवचनो यागसमुदायलक्षणार्थः । न च समुदायपरिग्रहे समुदायित्यागः, तदाश्रयत्वात् तस्य । एवमेव निषादस्थपत्यधिकरणे[1] पूर्वपक्षे षष्ठयर्थलक्षणा स्यादित्युच्यते, न तत्र प्रकृत्यर्थस्य त्यागोऽप्यापद्यत इत्यादिदर्शनात् स्वार्थापरित्यागेऽपि युक्तैव लक्षणा । अत एव—

वाच्यस्यार्थस्य वाक्यार्थे सम्बन्धानुपपत्तितः ।
तत्सम्बन्धवशप्राप्तस्यान्वयाल्लक्षणोच्यते ॥[2]

इति लक्षणां लक्षयन् शालिकनाथोऽपि सङ्गच्छते । इत्थं भाट्टमते वाक्यार्थो लक्ष्य एव ।

आचार्यखण्डदेवश्च—यद्यपि पदपदार्थयोः सम्बन्धो नित्यः, तथापि वाक्यार्थानां वाक्यैः सह सम्बन्धः सङ्केतितः । अतो वाक्यार्थज्ञानं सङ्केतग्रहसापेक्षम्, वक्त्रिच्छाघटिततात्पर्यज्ञानसापेक्षं च । अतस्तात्पर्यज्ञाने वक्तृपुरुषसम्बन्धस्तस्मिंश्च भ्रमप्रमादसम्भवान्न विधिवाक्यानामैकान्तिकं प्रामाण्यम् । अपि चानन्तवाक्यार्थसाधारणपदानां वाक्यार्थविशेषे सम्बन्धासम्भवश्चेत्याशङ्क्य—"पदैरभिहिता एव पदार्थाः स्वबोध्यसम्बन्धरूपया लक्षणया वाक्यार्थभूतां भावनां समभिव्याहारविशेषबलाद् विशिष्य बोधयन्ति । तथा च "यजेत स्वर्गकामः" इत्यादौ स्वर्गकामनिष्ठा यागकरणिका स्वर्गभाव्यिका प्रवर्तनाविषयिणी भावना" इत्यादिरीत्या भावनाविशेष्यकबोधस्य सर्वविधिष्वैकरूप्येण न तदानन्त्यप्रयुक्तसम्बन्धाग्रहः । तात्पर्यं च शब्दगत एव धर्मविशेषः । तद्ग्राहकश्चाध्ययनादिविध्यादिरेवेति न पुरुषसम्बन्धप्रयुक्तं विधीनामप्रामाण्यम्" इत्याह[3] ।

वाञ्छेश्वरयज्वा च—सम्बन्धस्येति प्रतीकमुपादाय मतत्रयमुपस्थापयामास । तत्र प्रथमं वैयाकरणानां मतं वाक्यस्य वाक्यार्थे शक्तिरिति । द्वितीयं मतमन्येषां ये मुक्तशरन्यायेनैकयैवाभिधया पदार्थस्मृतिं वाक्यार्थबोधं च स्वीकुर्वन्ति । तृतीयं मतं परेषां प्रस्तौति ये वाक्यस्य वाक्यार्थे तात्पर्यरूपवृत्त्यन्तरमङ्गीकुर्वन्ति[4] इति ।

पार्थसारथिमिश्रः—वाक्यार्थो लक्ष्य एवेत्यभिधत्ते, न चाङ्गीकरोति तात्पर्याख्यां वृत्तिं वाक्यार्थबोधाय । स इत्थं ब्रूते—"वाक्यं पदानि वा साक्षाद् वाक्यार्थबुद्धिं न जनयन्ति, अपि तु पदाभिहितैः पदार्थैः वाक्यार्थो लक्ष्यते" इति । तन्मते पदे पदार्थे च पृथक् पृथक् शक्तिः, पदार्थाभिधाने पदशक्तिः, वाक्यार्थाभिधाने पदार्थशक्तिरिति शक्तिद्वयी । प्रमाणयति चात्र श्लोकवार्तिकम्—"आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति" (७-११४) इति । यद्यप्येकत्र—

प्राथम्यकरणं यत्तु तद्विपर्ययसाधनम् ।
ये तात्पर्याभिधातृत्वे तेऽप्यनैकान्तिकीकृते ॥[5]

---

१. मी० द० ६-१-१० ।

२. प्र० प० वा० वृ० २ मा० ।

३. भाट्टदीपिका १ अ० १ पा० ६ अधि "उत्पत्तौ वा वचनाः स्युरर्थस्यातन्निमित्तत्वात्" इति २४ सूत्रे ।

४. भाट्टचिन्तामणौ तट्टीकायाम् ।

५. न्यायरत्नमालायाम्, वाक्यार्थनिर्णये १५ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति सङ्ग्रहश्लोके तात्पर्यवृत्तेर्नाम गृहीतम्, तथापि पूर्वपक्षतया, सिद्धान्ते तु तस्मान्न वाक्यं न पदानि साक्षाद् वाक्यार्थबुद्धिं जनयन्ति, किन्तु पदस्वरूपाभिहितैः पदार्थैः, संलक्ष्यतेऽसाविति सिद्धमेतदित्युदाहृतं[1] तेन। तत्त्वचिन्तामणौ यदपि तात्पर्यप्रतिपादनमुपलभ्यते, तदपि लक्षणावृत्तिप्रतिपादकम्। तद्यथा--स्वार्थसम्बन्धिनि तात्पर्यमेव लक्षणा। तत् तात्पर्यं च तत्प्रतीतिमुद्दिश्योच्चरितत्वमिति[2] न पुनः पदार्थान्वयबोधाय स्वीकृततात्पर्यशक्तेस्तत्र प्रतिपादनमिति। वाचस्पतिमिश्रस्तत्त्वबिन्दौ--(२२ पृष्ठे) अन्विताभिधानवादिमतं प्रतिपादयन् प्रथमावगतानां पदानामभिधायकानां वाक्यार्थप्रत्ययोपजनपर्यवसिततात्पर्यवृत्तीनामेकमेवाकाङ्क्षायोग्यतासत्तिरूपोपाध्युपायगृहीतार्थान्तरान्वितस्वार्थाभिधानसामर्थ्यमित्यादिना तात्पर्यवृत्तिमुपपाद्यापि कल्पनालाघवं यत्र तत्पक्षं रोचयामहे (२४ पृष्ठे) इत्युक्त्वा (२९ पृष्ठे) तात्पर्यवृत्तिस्वीकारे गङ्गापदं तीराभिधायि भवेदिति लक्षणोच्छेदापत्तेः। यदि तत्र तत्परस्यापि न तदभिधानमित्युच्यते तदितरत्रापि समानमित्यादिना निरास्थत।

आचार्यखण्डदेवो मीमांसाकौस्तुभे स्पष्टतस्तात्पर्याख्यां वृत्तिं स्वीचक्रे, परं लक्ष्यार्थस्य शाब्दत्वप्रतिपादनाय, न तु वाक्यार्थप्रत्यायनायेति तत्प्रकरणतोऽवसीयते। तद्यथा--न चैवं विभक्त्यर्थस्याभिधेयार्थान्वयित्वव्युत्पत्तिभङ्गः। 'गङ्गायां घोषः' इत्यादौ लक्ष्येऽप्यर्थेऽधिकरणत्वाद्यन्वयदर्शनेन तादृशव्युत्पत्तेरेवासिद्धेः। अतो वृत्त्या प्रकृत्युपस्थापितार्थान्वयित्वमेव विभक्त्यर्थस्य क्वचिदाद्यबोधे, क्वचित् पाष्ठिकबोधे व्युत्पत्तिसिद्धम्। इदमेव फलबलेन कल्पनीयम्।

यदपि चार्थस्य लक्षकत्वपक्षे लक्ष्यस्याशाब्दस्य विभक्त्यर्थानन्वय इत्युक्तम्, तदप्यस्मिन् पक्षे तात्पर्याख्यवृत्तिविषयकत्वेन शाब्दत्वस्य लक्ष्येऽपि स्थापयिष्यमाणत्वादकिञ्चित्करमिति [तदर्थत्वात् प्रयोगस्याविभागः (१-३-३५) सूत्रे आकृत्यधिकरणे १५० पृष्ठे]।

न्यायसुधायां द्वितीयाध्यायस्य प्रथमे पादे भावार्थाधिकरणे (५७२-७३ तमयोः पृष्ठयोः) भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयते। एष ह्यर्थो विधीयते (२-१-१४) इति सूत्रव्याख्याने भट्टसोमेश्वरस्तन्त्रवार्त्तिकस्य गम्यमानेति प्रतीकमुपादाय गम्यमानाया अपि भावनायास्तद्वाचिनश्चाख्यातस्यापेक्षया तात्पर्यावगतिरिति तात्पर्यसूचनायापेक्षोक्ता गम्यमानस्यापि तात्पर्यवृत्त्या शाब्दत्वात् सामानाधिकरण्योपपत्तौ कर्त्रधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्षमाणत्वेन तात्पर्यवृत्त्या शाब्दीभूतयेत्यर्थं इत्यादिना तद्ग्रन्थे यदपि तात्पर्यवृत्तेः स्फुटप्रतिपादनम्, तदपि पक्तव्यमित्यादिकृदन्तस्थलेऽवाच्याया अपि भावनायाः शाब्दत्वप्रतिपादनायेति।

न्यायरत्नाकरे वाक्याधिकरणे "साक्षाद् यद्यपि कुर्वन्ति" (३४२ श्लोके) इति श्लोकवार्त्तिकव्याख्याने पार्थसारथिमिश्रो वाक्यार्थावगतौ तात्पर्यं स्वीकरोति। यद्यथा-"पदार्थरूपस्य प्रमाणान्तरसिद्धत्वात्। तन्मात्रप्रतिपादनं निष्फलम्, अतः पदार्थावसिताऽभिधाव्यापाराणामपि पदानां तत्रानवसिततात्पर्याणां वाक्यार्थावगतावेव तात्पर्यमिति युक्तं तेषां क्रियार्थेन समाम्नायः" इति।

---

१. तत्रैव वा० नि० अन्तिमं वाक्यम्।

२. तत्त्वचिन्तामणौ--अन्यमतम् ६८६ तमे पृष्ठे।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वेदान्तिनस्तु प्रायो भाट्टानुसारिणोऽत्र लक्ष्यन्तेऽभिहितान्वयवादिनः, तथापि तेषां मते वाक्यार्थो लक्ष्य एवेति तद्यथा चित्सुखाचार्योऽभिहितान्वयवादेऽन्विताभिधानवादिभिरारोपितं गौरवदोषमुद्धर्तुमाशङ्कते[1]।

नन्वभिहितान्वयवादे तिस्रः शक्तयः कल्पनीया भविष्यन्ति। तथाहि १—पदानामर्थस्वरूपानुभवजननशक्तिः, २—अर्थानां चान्योन्यान्वयप्रत्यायनशक्तिः, ३—तदाधानशक्तिश्च। पदानामर्थस्मारकत्वपक्षेऽपि प्रथमां विहाय द्वितीयतृतीयशक्त्योरवश्यकल्पनीयत्वाद् शक्तिद्वयं कल्पनीयम्। अन्विताभिधानवादे पदानां परस्परान्वितार्थाभिधायिनी शक्तिरेकैव कल्पनीयेति कल्पनालाघवम्, अतोऽन्विताभिधानवादपक्ष एव श्रेयानिति चेत्, मैवम्; अन्विताभिधानवादेऽपि स्वार्थाभिधायिनी, अर्थान्तराभिधायिनी, अन्वयाभिधायिनी चेति तिसृणां शक्तीनां पदेऽवश्यकल्पनीयत्वात्।

न चोभयोः समानशक्तिकल्पनागौरवे विनिगमकाभावादन्विताभिधानपक्ष एव श्रेयानिति वाच्यम्। अभिहितान्वयेऽन्वितार्थप्रत्यायनाय प्रयुक्तानां पदसमूहानां समभिव्याहारसामर्थ्यात् पदस्मारितार्थानां मिथोऽन्वयस्य लक्षणयैवोपपत्तेरनन्यलभ्यस्य च शब्दार्थत्वात्, तत्र शक्तिकल्पनस्य वैयर्थ्यात्। तदुक्तम्—

विशिष्टार्थप्रयुक्ता हि समभिव्याहृतिर्यतः। इति।

धर्मराजाध्वरीन्द्रस्तु[2] वाक्यार्थज्ञाने आकाङ्क्षा-योग्यताऽऽसत्तयस्तात्पर्यज्ञानं चेति चत्वारि सहकारिकारणानीत्युदाजह्रे। तत्तात्पर्यं च न तत्प्रतीतीच्छयोच्चरितत्वम्, मौनिश्लोकादर्थज्ञानशून्यपुरुषोच्चरितवेदाच्चार्थप्रतीतेरप्रसङ्गात्। अपि तु तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्। अर्थात् पदार्थसंसर्गानुभवजननयोग्यत्वं तात्पर्यम्। न चैवमपि केनचित् पुरुषेण लवणानयनप्रतीतीच्छया सैन्धवमानयेति वाक्यं प्रयुक्तम्, परं तद्वाक्यस्याश्वसंसर्गप्रतीतिजनने स्वरूपयोग्यतासत्त्वाद् लवणपरत्वज्ञानकालेऽप्यश्वसंसर्गभानापत्तिरूपदोषस्तदवस्थ एवेति वाच्यम्, तदितरप्रतीतीच्छयाऽनुच्चरितत्वमपि तात्पर्यं प्रति विशेषणत्वात्। इत्थञ्च तत्प्रतीतिजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयाऽनुच्चरितत्वं तात्पर्यमिति फलितम्। अत्र मात्रपदनिवेशादुभयप्रतीतीच्छयोच्चरिते नाव्याप्तिः। तत्प्रतीतिमात्रजननयोग्यतायाश्चावच्छेदिका शक्तिः, न तत्प्रतीतीच्छयोच्चरितत्वम्, अव्युत्पन्नोच्चरितवेदवाक्यादावव्याप्तेः। न च शक्तिकल्पने गौरवम्, अस्माकं मते सर्वत्र कारणेषु कार्यानुकूलशक्तेः स्वीकारादित्याह। एवञ्च तन्मते वाक्यार्थो न लक्ष्यः, अपि तु शब्दज्ञानजनकं तत्प्रतीतिजनकत्वेत्याद्युक्तरूपं तात्पर्यम्, अत एव शब्दप्रमाणं निरूपयन्—प्रमाणान्तराबाधिततात्पर्यविषयीभूतपदार्थसंसर्गबोधकं वाक्यं प्रमाणमिति लक्षयाञ्चक्रे।[3] वह्निना सिञ्चेदिति वाक्यस्य प्रामाण्यापत्तिपरिहाराय प्रमाणान्तराबाधितेत्युक्तम्।

---

१. तत्त्वप्रदीपिकायाम् (चित्सुख्याम्)।

२. वेदान्तपरिभाषायामागमपरिच्छेदे।

३. यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणमिति तत्रैवोक्तेः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैयाकरणाश्च नाभिहितान्वयवादिनः, तेषां मते निरवयवं वाक्यं निरवयवस्य वाक्यार्थस्य वाचकमिति । ते वाक्येऽपि शक्तिं स्वीकुर्वन्ति । तद्यथा वैयाकरणभूषणसारे कौण्डभट्टः[१]—हरेऽव, विष्णोऽवेत्यादौ "एङः पदान्तादति" इत्येकादेशे सति पदयोर्विभागस्य दुर्ज्ञेयत्वात् प्रत्येकपदाज्ञानेऽपि समुदायशक्तिज्ञानाच्छाब्दबोधात् समुदायेऽपि शक्तिस्वीकार आवश्यकः । वस्तुतो यथा पदेभ्यः पदार्थबोधः, तथा वाक्येभ्यो वाक्यार्थबोध इति पदेषु पदार्थशक्तिरिव वाक्येषु वाक्यार्थशक्तिः स्वीकरणीयेति पदस्फोटवाक्यस्फोटौ व्यवस्थितौ ।

न च वाक्यार्थस्यापूर्वत्वात् कथं तत्र शक्तिग्रह इति वाच्यम्, पदेऽपि पर्यनुयोगस्य तुल्यत्वात् । न च पदशक्तिः पदार्थांशे ज्ञाताऽन्वयांशेऽज्ञातैवोपयुज्यत इति कुब्जशक्तिवाद इति वाच्यम्, वाक्यशक्तिरज्ञातैवोपयुज्यत इति वादाभ्युपगमस्य तुल्यत्वात् ।

अपि च घटः कर्मत्वमानयनं कृतिरित्यतस्तादृशशाब्दबोधाभावाद् घटकर्मकमानयनमिति बोधे घटार्थकप्रातिपदिकोत्तरकर्मत्ववाचकविभक्तेः, ततो धातोः, तत आख्यातस्य समभिव्याहारः कारणमिति कार्यकारणभावज्ञानवतो बोधात् तज्ज्ञानमपि हेतुरिति चेत्, सिद्धो वाक्यस्फोटः ।

वस्तुतस्तु यथैकारोकार-ऋकारादिवर्णेषु प्रतीयमाना अपि अवयवा न सन्ति, तथैव पचतीत्यादौ वर्णा न सन्ति, अतो न वर्णसमूहः पदम् । एवं वाक्यात् पदानां भेदो नास्ति । इत्थं च वाक्यखण्डमेव । तद्यथा—

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥

इत्याह[२] ।

परमलघुमञ्जूषायां नागेशभट्टा अप्यखण्डं वाक्यस्फोटमाहुः । तत्र वर्णपदस्फोटयोस्तु यथैकस्याकाशस्य घटाकाशो महाकाश इत्यौपाधिको भेदः, यथा चैकस्यैव चेतनस्यौपाधिको जीवेश्वरभेदः, जीवानां च परस्परं भेदः, यथा वा मुखे मणिकृपाणदर्पणव्यञ्जकोपाधिवशाद् दैर्घ्यवर्तुलत्वादिभानम्, तद्वदौपाधिकं भानम् ।[३] तत्र शास्त्रप्रक्रियानिर्वाहाय वर्णस्फोटादयः कल्पिता एव, "उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिताः" इति न्यायात् ।[४]

लघुमञ्जूषायां च सर्वं वाक्यमखण्डमेव । तत्र पदानि कल्पितान्येव । पदात् पदार्थबोध इत्यङ्गीकारे क्रियासामान्यान्विते शक्ताच्चैत्रपदाद् विशेषबोधे लक्षणा स्यात् । न च विशेषोऽपि सामान्यान्तर्गतत्वाच्छक्य एवेति वाच्यम् । शक्तिग्रहपदार्थोपस्थितिशाब्दबोधानां समानप्रकारकत्वनियमवत् समानविशेष्यकत्वनियमस्यापि स्वीकारात् । सामान्यरूपेण विशेषबोधेऽपि लक्षणेति प्रकाशोक्तेः[५] ।

किञ्च, पदानां सत्यत्वे सत्यस्य च नियतत्वे राजरूपार्थप्रत्यायकस्य 'राजा, राजानम्, राज्ञा, राजनि' इत्यादावनियतत्वं न स्यात् । महाभाष्ये 'आशितः कर्ता' (अष्टा० सू०

१. वैयाकरणभूषणसारे ६३।६४ कारिके ।
२. वै० भू० सारकारिका—६६ ।
३. परमल० म० स्फोटविचारे ।
४. तत्रैव शक्तिविचारे ।
५. ल० म० बौद्धार्थस्य वाच्यत्वनिरूपणे ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

६-१-२०७) इत्यत्र पदानामसत्यत्वं दर्शितम् । तत्र ह्युक्तं "न लक्षणेन पदकारा अनुवर्त्याः" इति पदविभागस्यासत्यत्वादेव हि तदनुवर्तननिषेधः सङ्गच्छते । अपि च पदानां सत्यत्वे तेषां स्वतः सिद्धत्वात् पदानि कुर्वन्तीति पदकारा इति समाख्यापि विरुध्येत । ।

न च पदार्थानामभावे 'धवखदिरपलाशाः' इत्यत्र बहुवचनं कथमिति वाच्यम्, गर्गा इत्यत्र यथैक एव गर्गशब्दो बहुषु वर्त्तते तथा शब्दशक्तिमहिम्ना द्वन्द्वस्यापि बहुषु वृत्तेः ।

किञ्च पदानां सत्यत्वे अश्वकर्णादावश्वाद्यर्थप्रतीत्यापत्तिः । 'इदं रूढम्, इदं यौगिकम्, इदं योगरूढम्' इत्याद्यपि शास्त्रकृत्कल्पनैव विशिष्टार्थबोधार्था । शब्दपरिज्ञाने शास्त्रमुपायः, ज्ञातेषु तेषु प्रयोजनस्य सम्पन्नत्वात् तत्परित्यागः । तदुक्तं हरिणा--

उपादायापि ये हेयास्तानुपायान् प्रचक्षते ।
उपायानां च नियमो नावश्यमवतिष्ठते[1] ।। इति ।

वाक्ये शक्तिस्वीकारादेवार्थवत्त्वात् प्राप्तां प्रातिपदिकसंज्ञां समासग्रहणनियमेन वार्य्यते । न च पदानामनर्थकत्वाद् सत्त्वाच्चार्थवत्सूत्रेण कथं प्रातिपदिकत्वं तेषामिति वाच्यम्, असत्यस्यैव शास्त्रप्रक्रियानिर्वाहाय कल्पितत्वात् । तदुक्तं हरिणा—

शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते ।
उपायाः शिक्षमाणानां बालानामुपलालनाः ।
असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते[2] ।। इति ।

अखण्डमेव वाक्यं बोधकमखण्डार्थस्येति युक्तमेव । तदुक्तं हरिणा —

यथैवानर्थकैर्वर्णैर्विशिष्टोऽर्थोऽभिधीयते ।
पदैरनर्थकैरेवं विशिष्टार्थोऽभिधीयते ।।
न हि किञ्चित् पदं नाम रूपेण नियतं क्वचित् ।
पदानामर्थरूपं च वाक्यार्थादेव जायते[3] ।। इति ।

वाक्येऽखण्डत्वं चापृथगुपस्थितिजनकत्वम्, अर्थेऽखण्डत्वं चापृथगुपस्थितिविषयत्वमिति ।

एवञ्चाभिहितान्वयोऽन्विताभिधानं संसर्गो वाक्यार्थः, संसृष्टाः पदार्थाः, स इत्यादिर्जातिः पदार्थो व्यक्तिर्वेति सर्वं तत्तच्छास्त्रवासनावशात् कल्पितमेवेति ।

ननु तत्तच्छास्त्रप्रणेतारः किं तत्त्वज्ञा उत न? आद्ये कथं तदुक्तपक्षाणामसत्यत्वम्, अन्त्ये पामरोक्तिवत् तेषामश्रद्धेयत्वापत्तिरिति चेत्, उच्यते--यद्यपि ऋषीणां दर्शनं तत्त्वविषयं भवति, तथापि तत्त्वभूतेन वस्तुना व्यवहारसम्भवाद् व्यवहारकाले तेऽप्यदृष्टतत्त्वसदृशा नानाप्रकारैर्व्यवहरन्ति । अत एव घट इत्युक्ते वैशेषिकोऽतिरिक्तमवयविनं बुध्यते, सांख्यो गुणसमूहम्, बौद्धादिः परमाणुसमूहमिति । तदुक्तं हरिणा---

ऋषीणां दर्शनं यच्च तत्त्वे किञ्चिदवस्थितम् ।
न तेन व्यवहारोऽस्ति न तच्छब्दनिबन्धनम्[4] ।। इति ।

---

१. ल० म० बौद्धार्थस्य वाच्यत्वनिरूपणे उद्धृतम् ।
२. तत्रैव ।
३. तत्रैव ।
४. ल० म० कुञ्जिकाटीकायामुद्धृतं स्फोटभेदनिरूपणे ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र वाक्यार्थस्यापेक्षिकं सत्यत्वम्, सर्वव्यवहारस्यासत्यविषयत्वात् ।

वाक्यार्थश्च प्रतिभामात्रविषयः । प्रतिभा च जन्मान्तरसंस्कारजापि । प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थ इति व्यवहारः ।

न च पदपदार्थकल्पनायामपि 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यादौ क्रियाकारकभावसम्बन्धस्य विभक्त्यैवोक्तत्वेन को वाक्यार्थ इति वाच्यम्, पदार्थानां परस्परविशेष्यविशेषणभावरूपान्वयस्य वाक्यार्थत्वात् । तद्ग्रहश्च क्वचिदुपदेशेन क्वचिच्चाकाङ्क्षावशादिति । प्रथमतो वाक्यार्थेऽवगते कल्पितान्वयव्यतिरेकाभ्यां पदानां स्वार्थमात्रपरत्वावगमादन्वयरूपे वाक्यार्थे वाक्यशक्तिरवतिष्ठते । तदुक्तं हरिणा—

वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्षया । इति ।

भाट्टपादैरप्युक्तम्—

न विमुञ्चन्ति सामर्थ्यं वाक्यार्थेऽपि पदानि नः ।
वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैव च दृश्यते[1] ॥ इति ।

अत्र 'लक्ष्यमाणः' इत्यस्य प्रतीयमान इत्यर्थः, 'दृश्यते' इत्यस्य प्रतीतिविषयत्वेनानुभूयत इत्यर्थः । न च वाक्यार्थे वाक्यस्य लक्षणेति चेन्न, वाक्यबोध्यान्वयस्य सम्बन्धरूपत्वेन तत्र तत्र वाक्यबोध्यस्य सम्बन्धस्य पदार्थस्य वा सम्बन्धग्रहाननुभवेन वाक्यबोध्यनिरूपितसम्बन्धमूलिकायास्तद्रूपाया वा लक्षणाया असम्भवात्; अनुपपत्तिप्रतिसन्धानमन्तरापि वाक्यार्थबोधेन लक्षणाया अप्रसक्तेः । न च तात्पर्यविषयीभूतवाक्यार्थानुपपत्तिर्लक्षणायां बीजमिति चेन्न, नियमतः पूर्वं तात्पर्यज्ञानस्यापि कल्पनापेक्षया शक्तिकल्पनस्यैवौचित्यात् । अत एवोक्तं भट्टपादैः—

वाक्यार्थमितये तेषां प्रवृत्त्या नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्[2] ॥ इति ।

एवञ्च सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितिरित्यत्र लक्ष्य इत्यस्य लक्षणया बोध्य इति नार्थ अपि तु प्रतीतिविषय इत्यर्थोऽस्तीति शेषः ।

एवं खलु तेषां मतेऽखण्डं वाक्यमेव वाचकमर्थश्चाखण्ड एव वाच्य इति । पदार्थानामन्वयकल्पना तेषां मते दूरेऽपास्ता । शास्त्रप्रक्रियानिर्वाहाय कल्पितपदार्थयोरन्वयग्राहिका वाक्यशक्तिः । सा चाकाङ्क्षाभास्या, वाक्यसमयग्राहिका चाकाङ्क्षेत्युक्तेः । एवं तावद् वैयाकरणानां मते तात्पर्यवृत्तेरनङ्गीकार इति ।

प्राचीनाः परमप्राचीनाश्च ये वैयाकरणास्ते त्वभिधातिरिक्तां कामप्यन्यां वृत्तिं नाङ्गीकुर्वन्तीति विदितचरमेव विपश्चिताम् ।

नैयायिका अपि प्राचीननव्यभेदेन द्विधा विभक्ताः सन्ति । तेषु नव्यनैयायिकास्तु पदार्थानामन्वय आकाङ्क्षाभास्य इति वदन्ति । तदुक्तं गदाधरभट्टाचार्येण—'शाब्दबोधे चैकपदार्थेऽपर-

१. ल० म० स्फोटभेदनिरूपणे उद्धृतम् ।
२. तत्रैवोद्धृतम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पदार्थस्य संसर्गः संसर्गमर्यादया भासते'।[1] तत्र 'संसर्गमर्यादया भासते' इत्यस्य आकाङ्क्षाभास्य इत्यर्थः, संसर्गस्य मर्यादा यया सा तया = आकाङ्क्षयेत्यर्थात्। शक्तिवादे च--सङ्केतो वृत्तिरिति स्वीकार आधुनिकसङ्केतस्यापि वृत्तित्वं निर्वहति। तथा च तात्पर्यस्यापि वृत्तित्वं स्यात्, यतो हि 'इदं पदमिममर्थं बोधयतु" इत्येवंरूपेण यद्बोधकत्वेन पदविषयकत्वम्, तदेव सङ्केतत्वम्, तस्य तात्पर्येऽपि सत्त्वात्। न चेष्टापत्तिः, लक्षणास्थले तात्पर्येणैव बोधे लक्षणोच्छेदापत्तेरित्याद्याशङ्क्य पदार्थोपस्थितिरूपव्यापारेण शाब्दबोधोपयोगित्वस्यैव वृत्तित्वात् तात्पर्यस्य साक्षादेव शाब्दबोधोपयोगितया न तस्य वृत्तित्वमिति समादधे[2]।

प्राचीननैयायिकेषु जयन्तभट्टः स्वकीयोद्भटवैदुष्येण निराकृत्य शङ्कापङ्कं तात्पर्यं याथातथ्येन निरूपयाञ्चक्रे[3]। तद्यथा—

दोषोऽन्विताऽभिधाने यः सामान्येऽपि स तादृशः।
दोषतुल्यो विशेषेऽपि यश्चोक्तोऽभिहितान्वये[4]॥ इति।

केचन सामान्येनान्विताभिधानं मन्यन्ते, विशेषतश्चाभिहितान्वयं वदन्ति। अर्थाद् गोशब्दः स्वार्थमनवगतविशेषगुणक्रियासामान्यान्वितमभिधत्ते तावति अन्विताभिधानम्। शुक्लादिगुणविशेषसम्बन्धस्तु पदान्तरादवगम्यते। सोऽयं विशेषोऽभिहितान्वये इत्येतदपि दोषोपहतमेव।

न च भवताऽपूर्वमेवोच्यते, अन्विताभिधानेऽभिहितान्वये च दोष इति; एवं सत्याभिधानिको व्यवहार एव सङ्कुलः स्यात्, सर्वत्र दोषसम्भवादिति वाच्यम्, संहत्यकारीणि पदानीत्युक्तेः (समुदितैः पदैरेकस्य वाक्यार्थस्य प्रत्यायनात्)। वाक्यार्थश्च विशेषणीभूतपदार्थसंसृष्टः कश्चित् पदार्थ एव। न चैवमन्विताभिधानपक्ष एव भवता प्रतिपाद्यते। पदानि संहत्यान्वितमर्थं सम्पादयन्ति, नान्वितमभिदधतीत्युक्तेः। किमुच्यते पदानि वाक्यार्थं तथोत्पादयन्ति यथा मृदादयो घटमिति ? न ज्ञापकत्वात् पदानां न कारकत्वम्। तर्हि किमिदं पदानां संहत्यकारितेति ? पदानि समुदितान्यन्वितमर्थं प्रत्याययन्ति, नान्वितमभिदधति। नाभिधाशक्तिरन्वयमभिदधाति, अपि तु तात्पर्यशक्तिः पदार्थानामन्वयबोधिका निराकाङ्क्षप्रत्ययोत्पादनसमर्था। तथा हि—

अन्यथैव प्रवर्तन्ते प्रत्यक्षाद्युद्भवा धियः।
अर्थं पूर्णमपूर्णं वा दर्शयन्तः पुरः स्थितम्॥
अन्यथैव मतिः शब्दे विषयेषु विजृम्भते।
प्रतिपत्तुरनाकाङ्क्षप्रत्ययोत्पादनावधिः॥
अत एव पदं लोके केवलं न प्रयुज्यते।
नहि तेन निराकाङ्क्षा श्रोतुराधीयते मतिः[5]॥ इति।

---

१. व्युत्पत्तिवादे शब्दखण्डे।
२. न्यायमञ्जरी (गौतमसूत्रस्य तात्पर्यविवृतिरूपा) ३७० पृष्ठतः ३७२ पृष्ठं यावत्। तात्पर्यशक्त्याऽन्वितप्रतीतिरिति प्रघट्टके।
३. शक्तिवादे गदाधरः, पृ० ८।
४. न्या० म०।
५. न्यायमञ्जरी।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अभिधातिरिक्तोऽयं तात्पर्यात्मा व्यापारः सर्वैः संसर्गवादिभिरप्रत्याख्येया संसर्गश्च वाक्यात् प्रतीयते, न चाभिधीयते ।

न च संसृष्टाभिधाने सति संसर्गः प्रतीयते नान्यथेति वाच्यम्, संहत्यकारित्वादेव संसर्गावगतिसिद्धेः । नहि संहत्यकरणमसंसृष्टं च कार्यं क्वचिद् दृश्यते । अपि च प्रकृतिप्रत्ययौ परस्परापेक्षमर्थमभिदधाते, न च प्रकृत्या प्रत्ययार्थोऽभिधीयते, नियोगस्य धातुवाच्यत्वात् । न च प्रत्ययेन प्रकृत्यर्थोऽभिधीयते, यागादेर्लिङ्वाच्यत्वानुपपत्तेः, न च तौ पृथक् पृथक् स्वकार्यं कुरुतः । एवं पदान्यपि परस्परापेक्षीणि संहत्य कार्यं करिष्यन्ति, न च परस्परमर्थमभिधास्यन्ति । वाक्यान्यपि प्रकरणपातीन्येवमेव । तदुक्तम्——

प्रकृतिप्रत्ययौ यद्वदपेक्षेते परस्परम् ।
पदं पदान्तरं तद्वद् वाक्यं वाक्यान्तरं तथा[1] ॥इति ।

अयमेव पक्षः श्रेयान् यत् संहत्यकारित्वं पदानामसङ्कीर्णार्थत्वं च । अन्यथाऽन्विताभिधानवादिमते 'गामानय'इति वाक्यघटकस्य गामिति पदस्यानयनान्वितस्वार्थबोधकत्वम्, आनयनपदस्य च गवान्वितानयनबोधकत्वम् । एवञ्च गामिति पदस्यैव गोकर्मकमाहरणमित्यर्थस्वीकारे, आनयनपदं व्यर्थं स्यात् । पदानां संहत्यकारितापक्षे तु नायं दोषः, यतो हि पदानि समुदितान्वितमर्थं प्रत्याययन्ति, नान्वितमभिदधति । तद्यथा——

निरपेक्षप्रयोगेऽयःशलाकाकल्पना भवेत् ।
तदन्विताभिधाने तु पदान्तरमनर्थकम् ॥
संहत्यकारिपक्षे तु दोषो नैकोऽपि युज्यते ।
तेनाऽयमुपगन्तव्यो मार्गो हि हतकण्टकः ॥ इति ॥

अतः——

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता ।
तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः ॥
तेनाऽन्विताभिधानं हि नास्माभिरिह मृष्यते ।
अन्वितप्रतिपत्तिस्तु वाढमभ्युपगम्यते[2] ॥ इति ।

पदानां न स्वार्थाभिधित्सयैव समुच्चारणम्, अपि तु प्रधानं कार्यमेव कर्तुम् । तदुक्तं श्लोकवार्त्तिके वाक्याधिकरणे भट्टपादैः——

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥ ३४३ ॥ इति ।

इत्थं गौतमसूत्रतात्पर्यविवृतिरूपन्यायमञ्जरीकर्तुः श्रीजयन्तभट्टस्य मते तात्पर्यवृत्तिः सिद्धा, प्रमाणयति च स्वमतं तन्त्रवार्त्तिकेन——

---

१. न्यायमञ्जरी ।
२. तत्रैव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पदात् प्रभृति या चैषा प्रज्ञाज्ञातुर्विजृम्भते ।

पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यति ॥ इति ।

(त० वा० अ० १, पा० ३, सू० ३०)

आलङ्कारिकशिरोमणिर्ध्वनिसम्प्रदायप्रवर्तक आनन्दवर्धनाचार्यो मुख्यतया व्यञ्जनामेव निखिलविप्रतिपत्तिनिरासपूर्वकं साधयति, तथाप्येकत्र ध्वन्यालोके (तृतीय उद्योते ४९२ पृष्ठे) अप्रस्तुतप्रशंसायां वाच्यस्य क्वचिद् विवक्षितत्वम्, क्वचिदविवक्षितत्वम्, क्वचिदुभयमिति त्रिविधां वन्धच्छायामुपपाद्य वाच्यस्याविविक्षितत्वे—"कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्" इत्यादि पद्यमुदाहृत्याह—नहि वृक्षविशेषेण सहोक्तिप्रत्युक्ती सम्भवत इत्यविवक्षिताभिधेयेनैवानेन श्लोकेन समृद्धासत्पुरुषसमीपवर्तिनो निर्धनस्य कस्यचिन्मनस्विनः परिदेवितं तात्पर्येण वाक्यार्थीकृतमिति प्रतीयत इति । तेन वाक्यार्थस्तात्पर्यार्थ इति सिद्धम् ।

आलङ्कारिकेषु सहृदयजनमनःप्रकाशमानस्य ध्वनेरालोकसुखानुभवाय लोकलोचननियोजननिपुणा अभिनवगुप्तपादाचार्याः स्वोपज्ञे लोचने वाच्यव्यङ्ग्ययोः स्वरूपभेदमुपपादयन्तः "भ्रम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण" इत्यादौ वाच्योऽर्थो विधिरूपः, व्यङ्ग्योऽर्थो निषेधरूप इति भ्रम मा भ्रमीरिति विधिनिषेधरूपयोरर्थयोरेकदाऽभिधेयता भवितुं नार्हति, घटतदभावयोरिव तयोर्विरोधात् । विरुद्धयोस्तयोर्युगपद् बुद्धिपथानारोहितत्वात् । नापि क्रमेण वाच्यता, अभिधाया विधिरूपार्थं बोधयित्वा विरामात् पुनर्निषेधरूपार्थवोधने व्यापाराभावादित्याद्यभिधाय संशेरते—ननु यत्र तात्पर्यं तद्धि वाक्यार्थः, तात्पर्यविषयश्चात्र भ्रमणनिषेधः, अतस्तस्यैव विवक्षितत्वाद् भ्रमणविधौ पर्यवसानमनाप्नुवती पदनिष्ठा विवक्षितार्थप्रतीतिजननसामर्थ्यरूपतात्पर्यात्मिका शक्तिर्वाक्यार्थीभूतस्य निषेधस्य प्रतीतिं विपरीतलक्षणया करोति, तन्न वाच्याद् भिन्नोऽर्थ इति । ततः सिद्धान्तयासुः[1]—नैतद् युक्तम्, लोके हि शब्दस्याभिधा-तात्पर्य-लक्षणारूपास्त्रयो व्यापाराः संवेद्यन्ते । गोत्वादिसामान्यरूपेषु पदार्थेषु गवादिपदानामभिधाव्यापारः । अभिधा च सङ्केतग्रहसहकारेणार्थावगमशक्तिः । सङ्केतश्च जातावेव, न व्यक्तौ, व्यक्तीनामानन्त्याद् व्यभिचाराच्च । तत आकाङ्क्षादिवशाद् गुणप्रधानभावेन मिथःसम्बद्धे विशेषरूपे वाक्यार्थे तात्पर्यशक्तिः । मुख्यार्थबाधादिसहकार्यपेक्षार्थप्रतिभासनशक्तिर्लक्षणा शक्तिः । तत्राभिधाशक्तिर्मुख्यार्थं बोधयित्वोपक्षीणा । द्वितीया (तात्पर्यशक्तिः) च पदार्थानां मिथोऽन्वयं बोधयित्वोपक्षीणा । मुख्यार्थबाधाद्यभावेन तृतीयशक्तेर्लक्षणाया अत्रावसर एव नास्तीत्यतश्चतुर्थव्यापारो ध्वननात्मा (तच्छक्तित्रयोपजनितार्थावगममूलजाततत्प्रतिभासपवित्रितप्रतिपत्तृप्रतिभासहायाऽर्थद्योतनशक्तिर्ध्वननव्यापारः) अनपलपनीय[2] एवेति ।

इत्थमिमे तात्पर्यशक्तिं विना वाक्यार्थबोधाभावमाहुः तद्यथा--तदन्यथानुपपत्तिसहायार्थावबोधनशक्तिस्तात्पर्यशक्तिरिति । (तदन्यथा = तस्यास्तात्पर्यशक्ते रन्यथा = प्रकारान्तरेण,

---

१. ध्वन्यालोके लोचने प्रथमोद्योते भ्रम० इत्यादिपद्यव्याख्यानावसरे पृ० ५६ ।

२. ध्वन्यालोकलोचने प्रथमोद्योते वाच्यव्यङ्ग्ययोः स्वरूपभेदप्रतिपादनावसरे क्वचिद् वाच्ये विधिरूपे प्रतिषेधरूपः, यथा भ्रम धा० इत्युदाहरणव्याख्यायां लोचने ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अभावादित्यर्थः । अनुपपत्तिः = वाक्यार्थबोधाभाव एव सहायः कारणं यस्याः सा तदन्यथानुपपत्तिसहायेति तद्व्याख्यातारः । तात्पर्यशक्तिः = स वाक्यार्थः परं प्रधानतया प्रतिपाद्यः येषां तानि तत्पराणि तेषां भावस्तात्पर्यं तद्रूपा शक्तिस्तात्पर्यशक्तिरिति) तात्पर्यवृत्तिविषये व्यञ्जनानिरासनकृतप्रयत्नयोर्धनिकयोर्धनिकधनञ्जययोर्मतं बहुविवेच्यत्वादग्रे निरूपयिष्यामः ।

वाग्देवतावताराणां साहित्तीसुधासुहितानां काव्यकलालोचनकुशलानामाकरग्रन्थनिर्माणोद्भटानां श्रीमम्मटाचार्याणामत्रोक्तय स्तु प्रथममेवावतरणिकायामुपात्ताः, तासामत्राभिमतिर्विमतिर्वेत्यग्रे तद्ग्रन्थस्वारस्येनोद्भावयिष्यामः ।

चतुर्दशभाषावारविलासिनीभुजङ्गकुलक्रमादागतवैदुष्यसरणिसनाथो विश्वनाथोऽपि साहित्यदर्पणे द्वितीयपरिच्छेद आह—

तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वियबोधने ।
तदर्थं तात्पर्यार्थं वाक्यं तद्बोधकं परे ॥[1] इति ।

तदयमभिप्रायो यत् पदानामभिधैकैकं पदार्थं बोधयित्वोपक्षीणा, अतो वाक्यार्थस्य (पदार्थानां मिथोऽन्वयरूपस्य) बोधिका तात्पर्यवृत्तिः । अनया वृत्त्या बोधितोऽर्थस्तात्पर्यार्थः, तद्बोधकं च वाक्यमित्यभिहितान्वयवादिन आहुः ।

प्रदीपकारो गोविन्दठक्कुरश्च[2]—तात्पर्यार्थोऽपि केषुचिदिति सूत्रघटकस्य "केषुचिदिति पदस्य न्यायादिनयेषु, न तु मीमांसकादिषु" इति व्याख्यामाचचक्षे । अथ चान्वयांशे गौरवात् पदशक्तिं निषिध्यान्वयांशस्तात्पर्यार्थ इति स्वोचक्रे । नागेशश्चोद्योते[3] न्यायादिनयेष्वितिपदघटकादिपदेन भाट्टमीमांसकानां ग्रहणमित्याह । तात्पयार्थ इति प्रतीकमादाय "आकाङ्क्षादिवशाद्भासमानस्य हि तात्पर्यार्थत्वेन व्यवहारः, तस्यापि पदतात्पर्यविषयत्वात्" इत्युक्त्वा स्वोक्तौ भट्टपादसम्मतिं दर्शयन्नुदाजहार—"न विमुञ्चन्ति सामर्थ्यम्" इत्यादि ।

काव्यप्रकाशविवरणे[4] च—घटं करोतीत्यनेन घटवृत्तिकर्मत्वानुकूला कृतिरित्यर्थो बोध्यते, तत्र घटशब्दस्य घटोऽर्थः, अम्प्रत्ययस्य च कर्मता, वृत्तिता न कस्यापि पदस्यार्थ इत्यपदार्थोऽपि वृत्तितातात्पर्यवशाद् अनयोः संसर्गविधया भासत इति स्पष्टम् ।

वामन्यां च—तात्पर्यार्थ इत्यस्य विवरणं तात्पर्याख्यवृत्तिप्रतिपाद्य इत्युक्तम्[5] ।

महामहोपाध्यायगोकुलनाथशास्त्री च "तात्पर्यार्थोऽपि" इत्यादिमम्मटसूत्रं व्याचक्षाणः 'केषुचित्' इत्यस्य न्यायवैशेषिकभाट्टशास्त्रेष्विति व्याचख्यौ । वाक्यार्थत्वं तु—घटेनेत्याद्यानुपूर्वीविशेषाद्यवच्छेदेन गृह्यमाणा या वृत्तिः, तज्जन्यशाब्दबुद्धिविषयत्वम्—इत्युदीर्य का सा वृत्तिरिति जिज्ञासायां तात्पर्याख्यावृत्तिरित्याह[6] ।

---

१. सा० द० द्वि० प०, कारिका २० ।
२. का० प्र० प्रदीपे द्वितीयोल्लासे तात्पर्यार्थोऽपोति सूत्रे ।
३. तत्रैव ।
४. का० प्र० द्वि० उ० ७ सूत्रे टीकायाम् ।
५. तत्रैव ।
६. तत्रैव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धनिको धनञ्जयश्च न केवलं वाक्यार्थावगतये तात्पर्याख्यां शक्तिं स्वीचक्रतुः, अपि तु सहृदयमनोमन्दिरेऽनश्वरीं प्रतिष्ठामाप्तस्य ध्वनिसम्प्रदायप्रवर्तकस्यानन्दवर्धनाचार्यस्य सिद्धान्तभूतां रसादिव्यङ्ग्यार्थाभिव्यञ्जिकां व्यञ्जनामञ्जसा निरसनायापि तात्पर्यशक्तिमुपाददाते ।

तावेवं निगदतो यत्—आकाङ्क्षायोग्यतासन्निधिविशिष्टे पदकदम्बात्मके वाक्ये प्रायो द्विधा पदान्युपलभ्यन्ते । कारकपदं क्रियापदं चाऽत एव सिद्धसाध्यपदाभ्यामभिधीयेते । वाक्यस्य तदेव विधेयं यन्न पूर्वतो निष्पन्नम्, अपि तु निष्पाद्यम्, अर्थात् साध्यं तच्च क्रियारूपम् । अतो वाक्य-प्रामाण्याय प्रतिवाक्यं क्रियापदमावश्यकम् । तत् क्रियापदं क्वचिच्छब्दत उपात्तम् । यथा 'गाम-भ्याज' इत्यादौ, क्वचिच्च प्रकरणादिवशाद् बुद्धौ सन्निहितं भवति । यथा–'द्वारं द्वारम्' इत्यादौ । उभयत्र कारकोपचिता क्रियैव वाक्यार्थः । एवं काव्येष्वपि क्वचिद् रत्यादिः स्थायिभावः शब्दत उपात्तः । यथा–''प्रीत्यै नवोढा प्रिया'' इत्यादौ । क्वचिच्च यद्विश्रम्भेत्यादौ प्रकरणादि-वशान्नियताभिहितविभावाद्यविनाभावाद् वा साक्षात् सहृदयहृदये विपरिवर्तमान इत्यादिः स्थायी तत्तच्छब्दप्रतिपाद्यैः स्वस्वविभावानुभावादिभिः संस्कारपरम्परया परां प्रौढिमानीयमानो रत्यादिर्वाक्यार्थ एव, न तु कपोलकल्पितया व्यञ्जनया साध्य इति । तद्यथा—

वाच्या प्रकरणादिभ्यो बुद्धिस्था वा यथा क्रिया ।
वाक्यार्थः कारकैर्युक्ता स्थायीभावस्तथेतरैः[1] ॥

न च पदार्थ एव परस्परान्वितः सन् वाक्यार्थो भवति । 'द्वारं द्वारम्'इत्यादौ साकाङ्क्षतया प्रकरणादिवशात् 'पिधेहि, उद्घाटय'इति वाऽध्याहृता क्रिया कारकोपचिता वाक्यार्थीभवतु नाम । इह तु 'भ्रम धार्मिक विश्रब्धः' इत्यत्र श्रुतान्वयेन निराकाङ्क्षतया कारकोपचिता भ्रमण-क्रियैव (विधिरूपा) वाक्यार्थः स्यात्, न तु निषेधरूपा मा भ्रमीरिति नञर्थस्यापदार्थत्वात् । एवम-पदार्थस्य रसादेरपि वाक्यार्थत्वं न स्यात्, तद्वाचकपदाभावात् । निराकाङ्क्षतयाऽध्याहारा-भावाच्चेति चेन्न, कार्यपर्यवसायित्वात् तात्पर्यशक्तेः । वक्त्रभीष्टकार्यप्रत्यायनपर्यन्तं तात्पर्यशक्तेः सामर्थ्यस्वीकारात् । यदि भ्रम धार्मिकेत्यत्र वक्तुर्भ्रमणनिषेधरूपोऽर्थो बोधयितुमिष्टः, तदा तद्बोधानन्तरमेव तात्पर्यशक्तेर्विश्रामात् ।

अपि च पौरुषेयमपौरुषेयं वा सर्वं वाक्यं कार्यपरमेव । कार्यपरत्वाभावे वाक्यमुन्मत्त-प्रलापवन्निरर्थकं स्यात्, तद्यथा—''यद् यदुपादेयवाक्यं तत्तत् कार्यतत्परम् । यथा घटमानयेति लौकिकं वाक्यं जलाहरणरूपकार्यतत्परम् ।'' यथा वा ''विश्वजिता यजेत'' इति वैदिकं वाक्यं स्वर्गप्राप्तिरूपकार्यतत्परम् इत्यन्वयव्याप्त्या तथा च यद् यन्न कार्यतत्परं तत्तन्नोपादेयवाक्यम्, यथोन्मत्तादिवाक्यमिति व्यतिरेकव्याप्त्या च काव्यवाक्यस्यापि कार्यपरताऽवसीयते । तदित्थम्, काव्यं कार्यतत्परम्, उपादेयवाक्यत्वात् । (अत्र काव्यत्वावच्छिन्नावच्छेदेन साध्यसिद्धिरभिमता, न तु काव्यत्वसामानाधिकरण्येनेति न व्यभिचारः) । एवं काव्यशब्दानां किञ्चित् प्रयोजनमवश्य-मनुसंधेयम्. तच्च निरतिशयसुखास्वादातिरिक्तप्रयोजनान्तरानुपलब्धेः स्वानन्दोद्भूतिरेव प्रयोजन-तया निश्चीयते । आनन्दोद्भूतिश्च काव्यशब्दोपात्तविभावादिसंसृष्टरत्यादेरेव जायते, अतः काव्य-

१. दशरूपके चतुर्थप्रकाशे का० ३७ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दस्याभिधाशक्तिर्विभावादिरूपपदार्थप्रतिपादनपरा तात्पर्यशक्तिश्च तत्संसृष्टरत्यादि (रस)-रूपवाक्यार्थबोधनपरा, रसेनाकृष्यमाणा रसप्रतीतिं जनयतीति ।[१]

न च यथा गीतादिशब्दश्रवणाद् श्रोतुः सुखं जायते, परं गीतादिशब्दा न तत्सुखस्य वाचकास्तथैव काव्यशब्दादपि रसाभिव्यक्तिः सहृदयानां जायते, परं काव्यशब्दा न रसादेर्वाचकाः सन्तीति वाच्यम् । दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् । गीतशब्दाः श्रोतॄनर्थानुसन्धानमन्तरापि सुखयन्ति, काव्यशब्दास्तु न तथा । विशिष्टविभावादिविदुषामेवानन्दानुभूतिस्वीकारात् । अतो विभावादिज्ञानार्थं परिकल्पिताभिधातात्पर्यशक्तिवशेनैव वाक्यार्थीभूतरसादेरपि प्रतीतेर्व्यञ्जनाकल्पनप्रयासस्य वैयर्थ्यात् ।

न च यत्राश्रूयमाणस्य पदस्यार्थे वक्तुस्तात्पर्यं तत्रान्योक्तिरूपिणि वाक्ये कथं व्यङ्ग्यार्थस्य तात्पर्यशक्त्यैव वाक्यार्थीभावो यथा—"कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्" इत्यत्र जडस्य शाखोटस्य निर्वेदः प्रतीयते, परं शाखोटस्य निर्वेदे तात्पर्यं न सम्भवति जडत्वात्तस्य । अतो यत्र स्वार्थे विश्रान्तं वाक्यमर्थान्तरमाश्रयते तत्र ध्वनिरेव यथा—भ्रम धार्मिक विश्वस्त इत्यत्र भ्रमणविधिरूपे स्वार्थे विश्रान्तं वाक्यं भ्रमणनिषेधरूपमर्थं प्रत्याययति, तत्र तात्पर्यशक्तेर्विधिरूपमर्थं बोधयित्वा विरताया निषेधरूपार्थबोधने पुनरुत्थानाभावाद् व्यञ्जनाऽकामेनाऽपि त्वया स्वीकर्तव्यैवेति वाच्यम् । यावत् कार्यप्रसारित्वात्तात्पर्यस्य तुलाधृतत्वाभावात् । वक्तृविवक्षितार्थप्रत्यायनपर्यन्तं तात्पर्यशक्तेः सामर्थ्यात् । पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रत्वात्तदुक्तं धनिकेन काव्यनिर्णये, दशरूपके चोद्धृतम्—

एतावत्येव विश्रान्तिस्तात्पर्यस्येति किं कृतम् ।
यावत्कार्यप्रसारित्वात् तात्पर्यं न तुलाधृतम् ॥
पौरुषेयस्य वाक्यस्य विवक्षापरतन्त्रता ।
वक्त्रभिप्रेततात्पर्यमतः काव्यस्य युज्यते[२] ॥ इति ।

परञ्च रसादिरूपार्थबोधनाय यत्तात्पर्यं धनिकः स्वीकरोति तत्तात्पर्यं वाक्यनिष्ठाभिधैवेति तदुक्तितोऽवसीयते यत्तेनैवोक्तम्—"अतो वाक्यस्याभिधानशक्तिस्तेन रसेनाकृष्यमाणा तत्तत्स्वार्थापेक्षितावान्तरविभावादिप्रतिपादनद्वारा स्वपर्यवसायितामानीयते[३]" इति । परञ्चायं सिद्धान्तो न सर्वथा स्वोपज्ञोऽपि तु लोचने व्यङ्ग्यार्थबोधाय पूर्वपक्षतयोपन्यस्तां तात्पर्यशक्तिं हृदिस्थां विधाय मीमांसकानां भट्टलोल्लटादीनां च "सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः" "यत्परः शब्दः स शब्दार्थः" इति च सिद्धान्तद्वयमुररीकृत्यैतत् सर्वं प्रपञ्चितमिति विदितचरमेव विपश्चिताम् ।

काव्यप्रकाशकर्तॄणां श्रीमम्मटभट्टानां मते "तात्पर्यार्थोऽपि केषुचित्" इति सूत्रे केषुचिदिति पदोपादानाद् वैयाकरणत्वेन च तेषां यद्यपि तात्पर्यवृत्तिर्न प्रतीयते, तथापि "केषुचित्" "अभिहि-

---

१. तत्रैवावलोके न चापदार्थस्य वाक्यार्थत्वं नास्तीत्यादि ।
२. दशरूपके चतुर्थप्रकाशे ३७ कारिकाऽवलोके ४ चतुर्थसप्तमश्लोकौ ।
३. तत्रैव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तान्वयवादिनाम्" इत्यत्र च वहुवचनेन तत्र तेषामादरोऽभिमतिश्च लक्ष्यत इति साम्प्रदायिका व्यवहरन्ति ।

न च तत्र तत्सम्मतिस्वीकारे "मातर्गृहोपकरणम्"इत्यत्र वाक्यार्थस्य व्यञ्जकत्वात्तस्य च तात्पर्यार्थत्वेन वाच्यार्थस्य व्यञ्जकत्वे तदुदाहरणप्रदर्शनमनुपपन्नं स्यादिति वाच्यम्, पदार्थ-संसर्गरूपस्य वाक्यार्थस्य व्यञ्जकत्वे सम्बन्धिनः पदार्थस्यापि व्यञ्जकत्वात् सम्बन्धिनोऽभाने सम्बन्धस्याप्यभानादिति न्यायात् । वैयाकरणमतानुसारेण वाक्यार्थस्य वाच्यत्वाच्च ।

अत एव "विशेषाः स्युस्तु लक्षिते[1]" इति सूत्रे तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्या इति, पञ्चमोल्लासे चाभिधालक्षणाभ्यां व्यञ्जनाया भेदमुपपादयताम् अभिधा-तात्पर्य-लक्षणात्मकव्यापारत्रयातिवर्ती ध्वननादिपर्यायो व्यापारोऽन-पह्नवनीय एवेत्युक्तिश्च सङ्गच्छेते ।

साहित्यदर्पणकारोऽप्यत्र प्रकाशानुयायी लक्ष्यते यतो हि "वृत्तीनां विश्रान्तेरभिधातात्पर्य-लक्षणाख्यानाम्"[2] इति प्रतिपादयति । वस्तुतो लोचनप्रकाशाभ्यां विना दर्पणस्य व्यर्थत्वाल्-लोचनप्रकाशावेवात्र प्रायेण प्रतिबिम्बिताविति ।

निष्कर्षः—एवं पूर्वोदीरितग्रन्थपर्यालोचनयाऽवगम्यते यत् प्राचीननैयायिकजयन्तभट्टा-दयस्तात्पर्यवृत्तिमन्विततार्थप्रतिपत्तयेऽङ्गीकुर्वन्ति । ततोऽन्येऽपि वाक्यार्थविचारकुशलता यथा-कथञ्चित् स्वीकुर्वन्त्येव । तद्यथाऽन्विताभिधानवादिमीमांसकैकदेशिभिर्भट्टलोल्लटप्रभृतिभिरुदाहृतः "यत्परः शब्दः स शब्दार्थः" इत्ययं न्यायस्तात्पर्यार्थो वाक्यार्थ इति प्रतिपादयति । तस्येदं तात्पर्यं यत्—उपात्तशब्दप्रतिपाद्येष्वर्थेषु यदंशे विधेयत्वं तत्र वाक्यतात्पर्यं यत्र तात्पर्यं स शब्दार्थ इति सिद्धं वाक्यार्थस्तात्पर्यार्थ इति । अपि च 'नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते' उपात्तस्यैव शब्दस्यार्थे तात्पर्यमित्यादिन्यायाश्चैतन्मूलकत्वादेव सङ्गच्छन्ते । अत एव वाचस्पतिमिश्रस्तत्त्व-बिन्दावन्विताभिधानवादिमतेऽभिधायकानां पदानां तात्पर्यवृत्त्या वाक्यार्थप्रत्यायने पर्यवसानम्[3] इति निजगाद ।

अभिहितान्वयवादिनो मीमांसकाः प्रायस्तात्पर्यवृत्तिं स्वीकुर्वन्त्येव यतो हि भट्टपाद-कारिकैव तात्पर्ये मूलतयोपन्यस्ता जयन्तभट्टेन न्यायमञ्जर्याम्—"वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्"इति । एवं पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यतीति तन्त्रवार्त्तिकं च प्रमाणतयो-द्धार । अन्येऽपि भाट्टमतानुयायिन आचार्यखण्डदेव-वाचस्पति-पार्थसारथि-भट्टसोमेश्वरप्रभृतय-स्तात्पर्यवृत्तिं स्पष्टतया स्वीकुर्वन्ति । अन्यथा पदार्थस्य लक्षकतया लक्ष्यस्य वाक्यार्थस्य शाब्दत्वं न स्यादिति । आचार्यखण्डदेवश्च भाट्टदीपिकायां वाक्यार्थज्ञानं संकेतग्रहसापेक्षम्, वक्त्रिच्छाघटित-तात्पर्यज्ञानसापेक्षं चेति जगाद । तात्पर्यज्ञाने वक्तृपुरुषसम्बन्धाद् वक्तरि च भ्रमप्रमादसम्भवाद् विधिवाक्यानामप्रामाण्यनिरासायाह तात्पर्यं च शब्दगतधर्मविशेषः । तद्ग्राहकश्चाध्ययनादिरिति । वाञ्छेश्वरयज्वा भाट्टचिन्तामणौ (तट्टीकायाम्) वाच्यस्य वाक्यार्थे तात्पर्यवृत्तिं परेषां मते स्वीचक्रे ।

---

१. का० प्र० द्वि० उ० १८ सूत्रे ।

२. सा० द० पञ्चमपरि० का० १ ।

३. तत्त्वबिन्दौ २२ पृ० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न्यायरत्नमालायां पार्थसारथिः "ये तात्पर्याभिधातृत्वे" इति न्यायरत्नाकरे च साक्षाद्यद्यपि कुर्वन्तीत्यादिश्लोकवार्तिकव्याख्यायां वाक्यार्थावगतौ तात्पर्यवृत्तिमुपपादयाञ्चक्रे ।

भट्टसोमेश्वरश्च कृदन्तस्थलेऽवाच्याया भावनायाः शाब्दत्वं तात्पर्यवृत्त्यैव प्रतिपादयामास । इत्थं प्रायोऽभिहितान्वयवादिनो भाट्टमीमांसका अन्विताभिधानवाद्येकदेशिनो मीमांसका भट्टलोल्लटप्रभृतयो वाक्यार्थस्तात्पर्यार्थ इति मन्वते । धर्मराजाध्वरीन्द्रो वेदान्ती तु शब्दज्ञानजनकं तात्पर्यमभ्युपैति ।

बौद्धाश्च वाक्यं विवक्षितार्थसूचकं वदन्तीति राजशेखरीयमीमांसातोऽवसीयते । आलङ्कारिकाश्च प्रायः सर्वेऽभिहितान्वयवादिनस्तेषु कियन्तः स्वीकुर्वन्ति । अत एव स्वच्छन्दोच्छलदच्छेति पद्यात् कविनिष्ठगङ्गाविषयकरतिभावध्वनेः प्रतीतौ सत्यामपि तत्र कवितात्पर्याभावादव्यङ्ग्यमिदं पामरश्लाघ्यं शब्दचित्रमधमकाव्यमित्युक्तम् ।

नव्यनैयायिकाश्च लक्षणोच्छेदभिया तात्पर्यवृत्तिं नाङ्गीकुर्वन्ति । ते एवं निगदन्ति यच्छाब्दबोधजनकोपस्थितिजनिका वृत्तिरतात्पर्यं तु शाब्दबोधजनकमतो न वृत्तिः । परं शाब्दबोधे तात्पर्यं कारणतया वाञ्छन्ति ।

अखण्डवाक्यस्फोटवादिनो वैयाकरणा अपि व्यवहारकाले काल्पनिकं पदपदार्थविभागमनल्पतो जल्पन्तीति तेऽप्यभिहितान्वयवादिनस्तथा चाहुरर्थवत्सूत्रे भाष्ये महाभाष्यकारा यत्—"एषां पदानां सामान्ये वर्तमानानां यद्विशेषेऽवस्थानं स वाक्यार्थ[1]" इति । प्रातिपदिकार्थसूत्रे च वीरः पुरुष इत्यत्र विशेष्यविशेषणभावस्याधिकस्य प्रतीत्या प्रातिपदिकार्थमात्राभावात् प्रथमा न प्राप्नोतीत्याशङ्क्य "पदाधिक्यं स वाक्यार्थः"[2] इत्याहुः । परं ते केवलामभिधावृत्तिमेव प्रसिद्धाप्रसिद्धार्थबोधनक्षमामङ्गीकुर्वन्ति । इत्थं वैयाकरणा नव्यनैयायिकाः प्राभाकराश्च तात्पर्याख्यां वृत्तिं नाङ्गीकुर्वन्ति कतिपये भाट्टाश्च । अत एवेयं वृत्तिरेकदेशितयोपेक्षिता प्रायो लक्ष्यते, यतो हि वैयाकरणा वेदान्तिनोऽखण्डं वाक्यमेव वाचकमखण्डोऽर्थश्च वाच्य इति सिद्धान्तयन्ति । मीमांसकैकदेशिनो मुक्तशरन्यायेनाभिधावेद्यं वाक्यार्थं निगदन्ति । प्राभाकराश्च वाक्यार्थं वाच्यमेव मन्वते । कतिपये भाट्टाश्च वाक्यार्थं लक्ष्यं निगदन्ति किन्तु सर्वैर्नाङ्गीक्रियते ।

न च यैरप्यङ्गीक्रियते तैरपि कथं वक्त्रिच्छारूपस्य तात्पर्यस्य पदनिष्ठत्वाभावात्, नैयायिकाभिमतेच्छाशक्तितोऽभेदाच्च मीमांसकमते शब्दधर्मश्चेत्तदाप्यभिधातोऽभिन्नं शब्देऽभिधातिरिक्तशक्तेरभावादिति वाच्यम्, इच्छाशक्तेरपि पदनिष्ठत्वात्पर्यनुयोगस्य तुल्यत्वात्, यथा विषयतादि, सम्बन्धेन नैयायिकाभिमतेच्छाशक्तिः पदे, तथैव तात्पर्यस्यापि स्वीकारात् ।

यदप्युक्तमभिधातोऽभिन्नं तात्पर्यं तदपि न विषयभेदात् । वाक्यार्थप्रतिपादिकाऽभिधानशक्तिः पदार्थसंसर्गप्रतिपादिका च तात्पर्यशक्तिरिति ।

नैयायिका अपि वाक्ये शक्तिं स्वीकुर्वन्तीति पदसमूहो वाक्यमर्थसमाप्ताविति पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं वाक्यलक्षणाया वाचोऽर्थलक्षणमिति न्यायभाष्याच्च प्रतीयते ।

---

१. पदार्थादन्यस्यानुपलब्धिरिति० वार्त्तिके १ अ० २ पा० २ आ० ।
२. न वा वाक्यार्थत्वादिति वार्त्तिके २ अ० ३ पा० ३ आ० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न च वाक्यार्थबोधाय तात्पर्यवृत्तिस्वीकारे शुकोच्चरितवाक्याद्बोधो न स्यादिति वाच्यम्, तात्पर्यस्य शब्दधर्मतयाऽभ्युपगतेरन्यथाऽपौरुषेयस्य वेदवाक्यस्याप्यर्थबोधानापत्तेः। एवं सति मीमांसायां क्वापि तात्पर्यवृत्तेरुपयोगो नोपपादित इति यत् केचन निगदन्ति तद् गजनिमीलिकयैवेति।

परञ्च सर्वेऽभिहितान्वयवादिनस्तात्पर्यार्थो वाक्यार्थ इति स्वीकुर्वन्ति। आकाङ्क्षादिवशाल्लभ्यस्यार्थस्य तात्पर्यार्थत्वेन व्यवहारादिति नियमात्। अत एव मम्मटाचार्यः सामान्येनाभिहितान्वयवादिनां मतमित्युक्तवान्। प्रदीपकारश्च न्यायादिनयेष्विति, गोकुलनाथश्च केषुचिदित्यस्य न्यायवैशेषिकभाट्टशास्त्रेष्विति व्याख्यामाहतुरिति। अन्विते पदार्थेऽभिधास्वीकारादन्विताभिधानवादिनो वाच्य एव वाक्यार्थ इति वदन्ति।

विविधाचार्याणां मते तात्पर्यस्वरूपम्—

प्राचीननैयायिकजयन्तभट्टादिमते तात्पर्यं वाक्यवृत्तिः।

भाट्टमते—वक्त्रिच्छारूपं तात्पर्यं न, अपि तु शब्दगत एव धर्मविशेषः। अन्यथा वेदस्यापौरुषेयत्वेन वक्तुरभावात्तदिच्छारूपतात्पर्यस्य सुतरामभावाद् वेदार्थो न स्यात्।

भाट्टचिन्तामणौ—तत्प्रतीतिमुद्दिश्योच्चरितत्वमिति।

वेदान्तिनो धर्मराजाध्वरीन्द्रप्रभृतयः—तत्प्रतीति (पदार्थसंसर्ग) जननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयोच्चरितत्वम्।

नैयायिकाः (न्या० सि० मु०)—वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्।

वैयाकरणाश्च—(परमल० म०) एतत्पदं वाक्यं वैतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम्। नानार्थस्थले लोके तात्पर्यं तु एतत्पदं वाक्यं वैतदर्थप्रत्यायनाय मयोच्चार्यत इति प्रयोक्तुरिच्छारूपमिति।

इत्थं तात्पर्यस्य त्रिविधं स्वरूपमनुभूयते—१. वाक्यशक्तिरूपम्, २. शब्दवृत्तिधर्मविशेषरूपम्, ३. वक्त्रिच्छारूपं चेति। तृतीयं पुनर्द्विविधम्, वास्तविकश्रोतृकल्पितभेदात्। तत्र "विषं भक्षय मा चास्य गृहे भुङ्क्थाः" इत्यस्य विषभक्षणादपि दुष्टमेतद्गृहे भोजनमित्यर्थः, "कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्" इत्यादौ च निर्वेदरूपोऽर्थो वक्तृतात्पर्येण वाक्यार्थीकृतः। अत एव ध्वन्यालोके—अप्रस्तुतप्रशंसायां वाच्यस्य क्वचिद् विवक्षितत्वं क्वचिदविवक्षितत्वं क्वचिदुभयमिति त्रिविधां बन्धच्छायामुपपाद्य वाच्यस्याविवक्षितत्वे कस्त्वं भोः कथयामि दैवहतकमित्यादि पद्यमुदाहृत्यात्र कस्यचिन्मनस्विनः परिदेवितं तात्पर्येण वाक्यार्थीकृतमिति निजगाद। श्रोतृतात्पर्याच्च "रुचिङ्कुरु" इत्यादावश्लीलेऽर्थे वक्तृतात्पर्याभावाद् या दुष्टता सा श्रोतृतात्पर्यादेव। एवं के यूयं स्थल एव सम्प्रति वयमित्यादौ उत्तरयितुस्तात्पर्यं के इत्यस्य जले इत्यर्थे न वक्तुर्यतो हि उत्तरं श्रुत्वा वक्ताऽभिधत्ते प्रश्नो विशेषाश्रय इति सर्वैर्ज्ञायते। अत्र श्रोतुः शक्तिविशेषो व्यक्त्युल्लासे हेतुरित्यभिदधद् रसगङ्गाधरकारोऽप्यनुकूलः। वाक्यतात्पर्यादेव भाट्टमीमांसकैर्वाक्यार्थे लक्षणा क्रियते इति तेषां तत्तन्मतप्रतिपादनावसर उद्धृततद्ग्रन्थेभ्योऽवसेयम्।

भट्टलोल्लटमुकुलभट्टधनञ्जयधनिकप्रभृतयोऽपि मीमांसकैकदेशिन एव सन्ति। श्रीभरतोक्तरससूत्रस्य भट्टलोल्लटकृतं व्याख्यानं मीमांसकमतेन व्याख्येति सम्प्रदायस्तस्य मीमांसकत्वादेव। स यत्परः शब्दः स शब्दार्थ इति न्यायाद् वाक्यार्थस्तात्पर्यार्थं इति स्वीकरोत्येव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

धनञ्जयधनिकादयस्तु स्फुटं स्वीकुर्वन्ति ।

किं तात्पर्यशक्त्या व्यञ्जना गतार्था ?

भट्टलोल्लटधनञ्जय-धनिकप्रभृतीनां मीमांसकैकदेशिनां मते शब्दश्रवणानन्तरं यावन्तोऽर्थाः प्रतीयन्ते तेषु सर्वेषु शब्दस्य तात्पर्यवृत्तिस्तात्पर्याकृष्टाभिधैव वा व्यापारोऽस्ति । एतदेवाभिप्रेत्य—"तात्पर्यं न तुलाधृतम्" "नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते" "सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः" "यत्परः शब्दः स शब्दार्थः" इत्यादयो न्याया व्यवह्रियन्ते । परञ्च ध्वनिसम्प्रदायाचार्यैः स्वप्रखरप्रतिभाभिः सूक्ष्माऽतिसूक्ष्मदृशा विचार्य निरणायि, यद् व्यञ्जनैव व्यङ्ग्यार्थबोधनक्षमा न तात्पर्यशक्तिर्न वाऽभिधेति । तद्यथा—यदुच्यते तात्पर्यं न तुलाधृतमिति तत्र जिज्ञास्यते किमिदं तात्पर्यम्, अन्वितार्थप्रतिपत्तयेऽभिहितान्वयवादिभिः स्वीकृतमन्यद्वा, आद्यस्य तु पदार्थानां संसर्गं बोधयित्वोपरमात् ।

न च विभावादिसंसर्गस्य व्यङ्ग्यार्थस्य रसादेश्च तात्पर्यशक्त्या युगपदेव प्रतीतिर्भवेदिति चेन्न, विभावादिसंसर्गरसयोः क्रमिकत्वाङ्गीकारात् । आशुभावितया क्रमस्यालक्ष्यत्वादलक्ष्यक्रमव्यङ्ग्यत्वव्यवहारो न तु क्रमाभावात् । यत्त्वत्र साहित्यदर्पणे विश्वनाथेनोक्तं यत् "तयोर्हेतुफलाभावाङ्गीकारादिति" तन्न सम्यक् । यतो हि विभावादयः कारकहेतवो ज्ञापकहेतवो वा । नाद्यः, यस्मादेष विभावादिसमूहालम्बनात्मकः । तस्मान्न कार्यः । न द्वितीयः, नायं ज्ञाप्यः, स्वसत्तायां प्रतीत्यव्यभिचारत इत्यादिना तेनैव निराकृतत्वात् । अन्यच्चेत् चतुर्थी वृत्तिः सिद्धा । परं नाममात्रे विवादः । यदि तत्परत्वं तदर्थत्वमित्युच्यते, तदा व्यञ्जनावृत्तिवेद्येऽप्यर्थे तदर्थतानपायात् स्वीकृतमेव ।

यदप्युच्यते "नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते" रसादिप्रतीतिः केनचिन्निमित्तेन जायते, निमित्तान्तरानुपलब्धेस्तत्र शब्द एव निमित्तम्; निमित्तत्वं च वृत्तिं विना शब्देऽसम्भवादभिधैव वृत्तिरतः शब्दश्रवणानन्तरं यावानर्थः प्रतीयते तत्र सर्वत्राभिधैवव्यापारः, एवञ्च वाच्या एव रसादय इति । तत्रोच्यते—रसादिप्रतीतौ यच्छब्दस्य निमित्तत्वं तत्कारकत्वं न, शब्दस्य प्रकाशकत्वात् । ज्ञापकत्वञ्चेदज्ञातस्यार्थस्य ज्ञापकत्वस्वीकारेऽव्युत्पन्नस्यापि शब्दश्रवणमात्रेणार्थप्रतीतिप्रसङ्गात् । प्रत्यक्षातिरिक्तप्रमाणस्य ज्ञातस्यैव करणत्वनियमाच्च । अतः शब्दो ज्ञातस्यैव ज्ञापक इति । ज्ञातत्वञ्च सङ्केतेनैव । सङ्केतश्चान्वितमात्रे । शब्दस्यार्थनिमित्तत्वं व्यापारसापेक्षमेव । अतो व्यङ्ग्यार्थबोधाय व्यञ्जनाव्यापारोऽभ्युपेयोऽन्यथा व्यङ्ग्यार्थं प्रति शब्दस्य निमित्तत्वनिश्चयात्कथं प्रतीतिः । अपि च व्यङ्ग्येऽर्थे सङ्केतग्रहे सति शब्दात्तदुपस्थितिः; शब्दादुपस्थितौ च सङ्केतग्रह इत्यन्योन्याश्रयदोषदूषितत्वान्नैमित्तिकानुसारेण निमित्तानि कल्प्यन्त इत्यविचारिताभिधानम् ।

यच्चोक्तं भट्टलोल्लटेन "सोयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार इति यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्यापारेण शत्रोर्मर्मच्छेदं वर्मच्छेदं प्राणहरणं च करोति तथैव सुकविना प्रयुक्तः शब्द एकेनैवाभिधाख्येन व्यापारेण पदार्थोपस्थितिमन्वयबोधं व्यङ्ग्यप्रतीतिं च जनयति इति । न चैकार्थप्रतीत्यनन्तरं शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति नियमाच्छब्दस्य विराम इति वाच्यम्, विवक्षितार्थप्रतीत्युत्तरमेव विरामाङ्गीकारात् । तत्रोच्यते—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

स दीर्घोऽभिधाव्यापारः किमेकः प्रतिविषयमनेको वा। तत्र नाद्यः, वाच्याद्यर्थरूपस्य विषयस्य भिन्नत्वात्। विषयभेदे सति तत्सम्बन्धिव्यापारभेदस्याऽप्यावश्यकत्वादिति। न द्वितीयः, वाच्यलक्ष्यव्यङ्ग्याद्यर्थरूपविषयाणां सङ्केतग्रहमुख्यार्थबाधादिवक्तृबोद्धव्यवैशिष्ट्यादिसहकारिणां च भेदाद् भिन्नजातीयत्वात्। अनेकस्मिन् व्यापारे सजातीयेऽङ्गीक्रियमाणे सति "शब्दबुद्धि-कर्मणां विरम्य व्यापाराभाव इति सिद्धान्तात् पुनस्तस्याऽप्रवृत्तेः। असजातीयो व्यापारश्चेत् सिद्धा व्यञ्जना। न च व्यापारस्य दीर्घत्वं नाम नैकत्वमेकजातीयत्वं वा, किन्तु वाक्यप्रति-पिपादयिषितचतुर्थकक्षानिविष्टार्थप्रतिपादनशैध्यूविशेष एव। अतो व्यङ्ग्यस्याभिधाविषयत्व-मस्त्येवेति वाच्यम्, व्यङ्ग्यार्थे सङ्केतग्रहाभावादभिधयाऽप्रतिपत्तेः। अथ पदार्थ-वाक्यार्थयोर्निमित्त-नैमित्तिकभावाभ्युपगमाद् निमित्तभूतेषु पदार्थेषु सङ्केतग्रहात्तन्मात्रेणैव पृथगन्त्यवाक्यार्थविषयक-सङ्केतानपेक्षया तद्वाक्यार्थप्रतीतिरभिधया भवतीति चेद्, अहो मीमांसकानां वाक्चातुर्यम्। प्रथमं प्रतीतिपथमवतीर्णतश्चतुर्थकक्षानिविष्टार्थतः पश्चादवगताः पदार्था निमित्तभावं गच्छन्तीति नूनं प्रपौत्रं प्रति नैमित्तिकत्वं मीमांसकस्य।

अथास्तु पदार्थप्रतीतिः पश्चात्तनी तथापि तद्विषयकसङ्केतग्रहस्य पूर्वं जातत्वात् तद्वारकः पदार्थानां निमित्तत्वव्यपदेशो न विरुद्ध इति चेन्न तदनुसरणोपयोगिनोऽनुक्तेः। किं च पूर्वं पदार्थेषु सङ्केतग्रहोऽपि न घटते, अन्वितानामेव सर्वदा प्रयोगात्। अथावापोद्वापाभ्यां पृथक् पृथक् पदार्थेषु सङ्केतग्रह इति चेत् सत्यम्, सङ्केतः पदार्थमात्रे एवेत्यभ्युपगमे वाक्यार्थप्रतीतिः पश्चात्त-नीति निर्विवादात्।[1]

२—अपि च, शब्दश्रवणानन्तरं यावानर्थो लभ्यते तावति शब्दस्याभिधैव व्यापारस्तदा ब्राह्मण पुत्रस्ते जातः, चैत्र कन्या ते गर्भिणी जातेत्यादिवाक्यश्रवणानन्तरं हर्षविषादादिप्रतीते-स्तयोरपि तद्वाक्यस्याभिधा स्यात्। न चानन्यलभ्यो हि शब्दार्थ इति न्यायेनात्र मुखप्रसाद-मुखमालिन्यादिलिङ्गेन लिङ्गिनोर्हर्षशोकयोरनुमानात् प्रतीतेरन्यलभ्यत्वात्तत्र नाभिधेति वाच्यम्, प्रतीतिमात्रेऽभिधाकल्पने लक्षणोच्छेदापत्तेः। न चेष्टापत्तिः, स्वसिद्धान्तविरोधात्। ननु लक्षणीयेऽर्थे मुख्यार्थबाधेनाभिधाया विच्छेदान्न दीर्घतरो व्यापार इति चेत् "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" (पू० मी० ३ अ० ३ पा० १४सू०) इति जैमिनिसूत्रासङ्गतेः। अयं भावः—सूत्रोक्तानां श्रुत्यादीनामेकत्रोपनिपाते परस्परस्य विलम्बे-नार्थोपस्थापकतया दुर्बलत्वात् पूर्वपूर्वस्य श्रुत्यादेः प्राबल्यं मीमांसकैर्निरणायि। यदि शब्दश्रुतेरनन्तरोपस्थितेषु सर्वेष्वर्थेष्वभिधैव व्यापारस्तदा सर्वेषामर्थानामभिधेयतया समकालो-पस्थितत्वादर्थविप्रकर्षादिति हेतूपादानमसङ्गतं स्यात्।

३—ननु शब्दश्रुतेरनन्तरं यावतामर्थानां प्रतीतिस्तावतां केवलयाऽभिधया न, अपि त्वा-काङ्क्षादिसापेक्षयेति श्रुतिलिङ्गादिसूत्रोक्तानां परस्परस्यार्थबोधे पूर्वपूर्वस्य सहकारित्वात् परपरार्थोपस्थाने विलम्बादर्थविप्रकर्षाभिधानमुचितमेवेति।

---

१. ध्व० लोचने, प्रथमोद्योते—भ्रम धार्मिकेति पद्यव्याख्याने पृ० ६४–६६ पर्यन्तम्।

२. का० प्र० ५ उल्लासे।

३. तत्रैव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अयमुत्पतते पत्री ततोऽत्रैव रुचिङ्कुरु" इत्यादीनामदोषतापत्तेस्तत्रासभ्यार्थस्याविवक्षितत्वात्। न च सन्धौ सति 'चिङ्कु'पदस्य लाटभाषायां स्त्रीगुह्याङ्ग(योन्यन्तर्वर्त्यङ्कुर)-वाचकत्वादसभ्यार्थस्मारकत्वाद् दुष्टत्वं तस्येति वाच्यम्, व्यङ्ग्यार्थस्याभिधेयतायां च्युतसंस्कृत्यादीनां नित्यदोषत्वं श्रुतिकट्वादीनामनित्यदोषत्वमिति व्यवस्थानापत्तेः। न चेष्टापत्तिः, सर्वेषां व्यवस्थितत्वेन प्रतिभासात्। व्यञ्जनास्वीकारे व्यङ्ग्यार्थस्यानेकविधत्वाद् श्रुतिकट्वादीनां शृङ्गारे हेयत्वेऽपि वीररौद्रादावानुकूल्येनानित्यत्वमसाधुत्वादीनां सर्वत्र त्याज्यत्वान्नित्यत्वमिति व्यवस्थितेः। न चाभिधाबोध्येऽपि शृङ्गारादौ प्रातिकूल्येन वीरादावानुकूल्येन नित्यानित्यव्यवस्था युज्यत एवेति चेन्न। रसादिप्रतीतेरभिधाबोध्यत्वाभावात्।

अपि च "द्वयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया कपालिनः" इत्यत्र कपालिन इति पदस्यानुगुण्यं न पिनाकिन इत्यत्र द्वाभ्यामपि पदाभ्यां शिवस्यैव वाच्यत्वाद्विनिगमकाभावः प्रसज्येत। न च तत्र यौगिककार्यप्रतीतिर्विनिगमिकेति वाच्यम्, योगरूढिस्थले रूढेर्योगापहारकत्वात्। न च प्रकरणाद्यभाव एव रूढेर्योगापहारकत्वनियमोऽत्र प्रीतिपरीक्षणे वटुकृतशिवनिन्दायाः प्रकृतत्वादिति चेन्न, वाच्यार्थस्य सर्वान् प्रतिपत्तॄन् प्रति नियतत्वाद् व्यङ्ग्यार्थस्य च प्रकरणवक्त्रादिसहकारेणानेकरूपत्वादनियतत्वाच्च।[1] तदुक्तं दर्पणे—

"बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम्। आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः"।[2] इति।

यदप्युच्यते[3]—यत्परः शब्दः स शब्दार्थ इति न्यायाद् व्यङ्ग्यार्थो वाच्य एवेति तदप्यापातरमणीयम्, यतो हि मीमांसकैरस्य न्यायस्यार्थः स्वयमेव निरणायि यत्—उपात्तशब्दोपस्थापितेष्वर्थेषु यदंशे विधेयत्वं तदंशे वाक्यतात्पर्यम्, यत्र तात्पर्यं स शब्दार्थस्तदंश एव शब्दस्याज्ञातज्ञापकत्वरूपप्रामाण्यमिति। न तु यत्तात्पर्यकतया शब्दः प्रयुज्यते स शब्दार्थ इति। एवं सति तात्पर्यस्यानियतत्वाद् शक्तेरप्यनियतत्वापत्तेः। न च विधेयत्वं प्रवर्तनारूपविधिविषयत्वम्, तच्च क्रियाया एव न द्रव्यादेरिति दध्ना जुहोतीत्यादौ दध्यंशेऽप्रामाण्यापत्तिरिति वाच्यम्; कारकक्रिययोः समभिव्याहारे कारकपदार्थाः प्रधानक्रियासम्पादकस्वक्रियासम्बद्धाः साध्या इव भवन्तीत्यर्थकाद् 'भूतभव्यसमुच्चारणे भूतं भव्यायोपदिश्यते' इति न्यायाद् दध्ना जुहोतीत्यादौ प्रधानक्रिया होमस्तदनुकूला दधिक्रिया पूर्वदेशसंयोगध्वंसहेतुविभागजनिकास्पन्दक्रिया तत्सम्बन्धाद् दध्यादेरपि साध्यत्वेन विधेयत्वात्। नन्वेवमपि प्रधानाया हवनक्रियाया एव विधेयता स्यादिति चेन्न, यथा तृणमिश्रितभस्मराशावग्निरदग्धमेव तृणं दहति न तु दग्धं भस्म, तथैव साध्यान्वितसिद्धेषु साध्यमेव विधीयते। अप्राप्ते शास्त्रमर्थवदिति न्यायाद् यावदप्राप्तं तावदेव शब्देन विधीयतेऽशान्तरे तु केवलमनूद्यते। यथा ऋत्विक् प्रचरणे ज्योतिष्टोमविकृतश्येनयागप्रकरणस्थवाक्ये "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इत्यत्र लोहितोष्णीषत्वमात्रं विधेयम्, "सोष्णीषा विनीत-

---

१. का० प्र० पञ्चमोल्लासे।

२. सा० द० पञ्चमपरि०।

३. का० प्र० पञ्चमोल्लास उद्धृतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वसना ऋत्विजः प्रचरन्ति" इति वाक्यादुष्णीषस्यापि प्राप्तत्वाद् लौहित्यमात्रं विधेयम्, एवं दध्ना जुहोतीत्यादौ अग्निहोत्रं जुहोतीत्युत्पत्तिवाक्याद् हवनस्य साधनद्रव्यत्वेनाक्षेपतो दध्नोऽपि सिद्धत्वेन करणत्वमात्रमेव विधेयम्। एवं सोमेन यजेतेत्यत्र सोमयागयोरुभयोर्विधिः। यदाग्नेयोऽष्टाकपाल इत्यत्र हव्यदेवता-यागानां विधेयत्वात्त्रिविधः। लोकेऽपि रक्तं पटं वयेत्यत्र गुणद्रव्यक्रियाणामेकस्य द्वयोस्त्रयाणां वाऽसिद्धावेकविधिर्द्विविधिस्त्रिविधिर्वेति यदेव विधेयं तत्रैव तात्पर्यमित्युपात्तस्यैव शब्दस्य वृत्त्युपस्थापितेऽर्थे तात्पर्यं न प्रतीतिमात्रे। येन केनापि सम्बन्धेन प्रतीतेऽर्थे तात्पर्याङ्गीकारे पूर्वो धावतीत्यादौ पूर्वत्वस्य नियतापरसापेक्षत्वादर्थापत्त्या पश्चिमपदार्थोऽपि कदाचित्तात्पर्यविषयीभूतः पूर्वपदवाच्यतां भजेतेति।

१—ननूपात्तस्यैव शब्दस्यार्थे तात्पर्यस्वीकारे विषं भक्षय मा चास्य गृहे भुङ्क्था इत्यत्र भक्षय, भुङ्क्थाः इति क्रियाद्वयघटितस्य वाक्यद्वयस्यैतद्गृहे न भोक्तव्यमित्येकस्मिन्नर्थे तात्पर्यं न स्याद् विषं भक्षयेति वाक्यार्थत्वाभावादिति चेच्छृणु—मा चास्येत्यत्र चकारेण सुहृदुक्तस्य विषं भक्षयेति वाक्यस्य स्वार्थेऽविश्रान्तस्य साकाङ्क्षतया समनन्तरोच्चारितेन मा चास्य गृहे भुङ्क्थाः इत्यनेनैकवाक्यता सूच्यते। अन्यथा गुणानाञ्च परार्थत्वादसम्बद्धः समत्वात् स्यादिति न्यायेन यथा समत्वेनाप्रधानयोः परस्परमसम्बन्ध एवं प्रधानयोरपि समत्वेन परस्परमनन्वयादेकवाक्यता न स्यात्। विषभक्षणं च न सुहृदुपदेशयोग्यमिति विषं भक्षयेति वाक्यं स्वार्थे सबाधं सद्विरोधितारूपसम्बन्धेन विषभक्षणाधिकबलवदनिष्टानुबन्धित्वविशिष्टैतद्गृहभोजनमनिष्टहेतुरतः सर्वथा मास्य गृहे भुङ्क्था इति वाक्यार्थः सम्पद्यत इत्युच्चारितशब्दस्य वृत्त्युपस्थापितेऽर्थ एव तात्पर्यं नान्यत्रातो व्यङ्ग्यार्थबोधाय व्यञ्जनावृत्तेः स्वीकार आवश्यक इति बहुशः प्रपञ्चितं ध्वन्यालोकलोचनप्रकाशदर्पणादिषु। तत एव विशेषतोऽवगन्तव्यं जिज्ञासुभिरिति।

समीक्षा—वस्तुतो व्यङ्ग्यार्थबोधाय तात्पर्यं न क्षमम्। यदि यावत्तात्पर्यमभिधाव्यापारोऽभ्युपेयते तदाऽन्यत्राऽन्यशब्दप्रयोगस्तद्धर्मप्रतिपत्त्यर्थं इति नियमाल्लाक्षणिकशब्दप्रयोगः प्रयोजनप्रतिपिपादयिषयैवेति लक्ष्यार्थस्याप्यभिधावेद्यत्वं स्यात्। अथ यदि तत्र विषयसहकारिभेदाद् व्यापारभेदस्तदाऽत्रापि समम्। वक्तृबोधव्यादिवैशिष्ट्यप्रतिभासहकारितया व्यङ्ग्यार्थविषयकत्वाच्च व्यापारभेदस्यावश्यकत्वात्। न चैवं विक्लित्त्यनुकूलव्यापाराणामधिश्रयणाद्यधःश्रयणपर्यन्तानां क्रमजन्मनां देशकालसहकारिभेदादनेकविधानां वाचकत्वेन पचत्यादीनां नानार्थकतास्यादिति वाच्यम्, गुणभूतेष्ववयवेषु क्रमजातेषु तेषु विक्लित्त्यनुकूलव्यापारे कलापेषु बुद्ध्याऽभेदकल्पनादेकक्रियेति व्यवहारात्।

यावदुद्देश्यमेकव्यापारस्वीकारेऽनावृष्टिवारणाय कृतस्य यागस्य प्राण्युत्पत्तिपर्यन्तं व्यापारोऽभ्युपेयः स्याद् यतो यागात्पर्जन्यः पर्जन्यादन्नमन्नात्प्राणिन इति कार्यकारणभावात्तेषामपि यागार्थतापत्तेः।

ननु तत्परस्य भावस्तात्पर्यमिति व्यङ्ग्यार्थोऽपि तदर्थ एवेति चेदोमिति ब्रूमः। तत्तद्व्यापारप्रतिपाद्येष्वर्थेषु तदर्थताऽनपायाद् व्यञ्जनाप्रतिपाद्येष्वपि तत्परतास्वीकारात्।

---

१. का० प्र० पञ्चमोल्लासत उद्धृतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदि विषयसहकारिभेदेऽप्येकत्वं तदा नीलपीतादावपि भेदो न स्यात् । अत एव केवलाभिधैव शब्दवृत्तिरिति वादिनो वैयाकरणा अपि प्रसिद्धाप्रसिद्धादिना शक्तिभेदं वाञ्छन्ति । अभिधेयार्थे प्रसिद्धा शक्तिर्लक्ष्यार्थेऽप्रसिद्धेति । स्फोटस्य व्यङ्ग्यत्वं निपातानां च द्योतकत्वमुररीकृतवतां वैयाकरणानां मते सिद्धैव व्यञ्जनाऽत एव नागेशो लघुमञ्जूषायां व्यञ्जनानिरूपणान्ते वैयाकरणानामप्येतत्स्वीकार आवश्यक इत्याह ।

नन्वर्थसामर्थ्याक्षिप्तत्वमेव रसादीनामित्यानन्दवर्धनोक्त्याऽस्या अर्थवृत्तित्वमेवेति चेदन्वयव्यतिरेकाभ्यां शब्दवृत्तिस्वीकाराद् रसादिप्रतिपत्तये चावश्यं स्वीकरणीयत्वात् ।

अपि च समासोक्तौ यत्र वाक्यार्थं एव तात्पर्यं तत्र उपोढरागेण विलोलतारकमित्यादौ प्रतीयमानो नायकव्यवहारः कस्य व्यापारस्य साध्यतामियादृते व्यञ्जनादिति शम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'कुमारदासस्य सौन्दर्यपरीक्षणम्[1]

डॉ० दशरथद्विवेदी, गोरखपुरविश्वविद्यालयः, गोरखपुर ।

'यावद्रसिको न भवति लोकातिक्रान्तरसास्वादभुवं नाधिशेते[2]' इति लोचनकृदभिनवभट्टोक्त्यनुसारेण सौन्दर्यतत्त्वावगाहनाय सुहृदयसहृदयेन भाव्यमिति सौन्दर्यतत्त्वमस्ति वागगोचरं किमपि लोकोत्तरं वस्तु, अस्वाद्यमनुभवगम्यमेव । यमुपलभ्य हृदि तुष्टिरिव, धृतिरिव, सुखमिव, हर्ष इव किमप्यानन्द इवाजायते तदेव सुन्दरं सौन्दर्यम् । सकलतत्त्वाध्ययनाभ्यासावगाहनानुभवानन्तरमिदमेव प्रतीयते यत्तत्त्वतस्तु द्विविधत्वमेव भजते सौन्दर्यम्—बाह्यमान्तर्यञ्च । बाह्यमेव सौन्दर्यं प्राचीना अधुनातनाश्च संस्कृतकाव्यशास्त्रप्रतिभाजुषोऽलङ्कारत्वेनेच्छन्ति[3] । वक्रताविच्छित्तिश्चमत्कृतिः सौन्दर्यमिति व्यपदेशभागयमलङ्कारशब्दस्तु संस्कृतकाव्यक्षेत्रे भारतीयपरम्परायाञ्च स्वरूपसौन्दर्यमेवाभिवदति । किन्त्वत्र साहित्यशास्त्रे त्वान्तर्यमेव सौन्दर्यं प्रधानतामुपयाति । बाह्यञ्च तस्योपकारकम्, प्रकाशकं किञ्च तत्प्रतिविम्बकल्पमेवोच्यते । एवञ्च भामहोद्भटदण्डिप्रभृतयः प्राचीनाचार्या वक्रोक्तिकाराः कुन्तकादयश्च स्वरूपसौन्दर्यं शरीरसौन्दर्यमेव वा प्रतिपादयन्ति । यथोक्तं प्रागस्मदीयपरम्परायामान्तर्यमात्मसौन्दर्यमेव वा प्रधानतया तत्त्वतया सौन्दर्यत्वेनेर्यते तदेव 'रसः' इत्युच्यते । येन च ब्रह्मास्वाद इवानन्दो जायते । पाश्चात्यास्तु रसमेव सौन्दर्यमभिदधति[4] इति । न च रस एव सौन्दर्यमिति भ्रमितव्यम्, बहवो हि पाश्चात्याः सौन्दर्यमानुभविकम् इत्यपि मन्यन्ते । श्रीबिल्डनकारमहोदयैरुक्तम्—अभिव्यक्तिरेव सौन्दर्यम् । तच्च केवलं मानसिकं पूर्णरूपेण[5] । एरिस्टाटलमहोदयाः कथयन्ति—सौन्दर्योत्पत्तिर्हि भावाज्जायते[6] । पुनश्च तैरुच्यते, भावाभिव्यक्तिरेव सौन्दर्यम् । एवञ्च यदि भावा रसा इति यथा भारतीयालोचनाशास्त्रे, तथैवात्रापि स्वीक्रियते, तर्हि माननीयमेवेदं यत् पाश्चात्त्या रसमेव प्रधानतया सौन्दर्यमामनन्ति । न चास्यायमर्थो

---

१. निबन्धोऽयम् अखिलभारतीयप्राच्यविद्यासम्मेलनस्य सप्तविंशतितमेऽधिवेशने कुरुक्षेत्रे दिसम्बरमासे १९७४ तमेशवीयवर्षे पठितः ।

२. लोचनस्य, पृ० ५२०. (चौ० संस्करणम्) ।

३. 'सौन्दर्यमलङ्कारः' इति वामनः, काव्यालङ्कारसूत्रवृत्तौ तथा चान्ये काव्याचार्याः ।

४. द्र०, ए० सी० शास्त्रिमहोदयस्य, स्टडीज इन संस्कृत एस्थेटिक्स, पृ० ३.

५. द्र०, एच्० विल्डनकारमहोदयस्य -दि फिलासफी ऑफ वेन्डेट क्रोचे' पृ०, १७२ । निबन्धेऽस्मिन् पाश्चात्यमतानि ए० सी० शास्त्रिमहोदयस्य ग्रन्थात् तथा च कृष्णचैतन्यस्य 'संस्कृतपोयटिक्स'ग्रन्थात् प्रायशः उद्धृतम् ।

६. द्र०, एस्० एच्० बाउचरस्य एरिस्टाटलस्य, 'थियरी ऑफ पोयट्रीज इन फाइन आर्ट्स' पृ० ९६ तथा च पृ० २०२ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद् भारतीयकाव्यशास्त्रेष्टस्य रसस्य पाश्चात्त्यानां सौन्दर्येण किं वा 'एस्थेटिक' इति तत्त्वेन सादृश्यमस्ति। भवतु नाम। यद्यप्यान्तर्यमेव सौन्दर्यं प्रधानम्, तथापि न विस्मरणीयमिदं यद् वाह्यमेवान्तर्यमुद्भासयति, प्रकाशयति, अधिकापयत्युद्दीपयति च। एवञ्च यथा लाङ्ग-फील्डमहोदयैरुक्तम्, सौन्दर्यं न केवलं बाह्यं न चान्तर्यमेव वस्तुतस्तूभयोरुपकार्योपकारकत्व-मेवास्ति।[1] एष एव च पन्था भारतीयैर्ध्वनिवादिभिरपि स्वीकृतः। संस्कृतकाव्यकारा बाह्यं गिरिनद्यादिकं प्राकृतिकं वस्तु प्रतिभातूलिकयानेकधा चित्रयन्तीति तन्मतौ बाह्योद्यानादि-स्वरूपादिचित्रं चेतनवतामन्तरुद्भासयतीति तयोरैकात्म्यमेवानेकधा तेषां वर्णनेषूपलभ्यते।

कविकुलगुरोः कालिदासस्याभिन्नसखोऽयं 'जानकीहरणस्य' कर्त्ता काव्यस्य कुमारदासः जात्यन्धोऽप्यन्यून एव सौन्दर्येक्षिकायां तस्माद् दीपशिखाकवेः। यतो बाह्येनैवान्तर्यस्य साक्षात्कारो भवति, तत्कोटौ च मानवपशुपक्ष्यादिरूपम्, तेषां व्यवहाराः, सकलकलालङ्कारादयश्चायान्तीति तमेवावलम्ब्यात्र कुमारदासस्य किमपि सौन्दर्यतत्त्वाभिनिवेशिमनसः साक्षात्कारः क्रियते। सौन्दर्यं बुभुक्षु खलु मानवं मनः। यद्यपि बाह्यसौन्दर्यमस्थायि, तथापि च बहवः तदेवाद्रियन्ते। रूपस्य मनोहारित्वं मनःसन्तर्पणत्वञ्चानुभवसिद्धमेव। स्वरूपस्य सम्यग्विनिवेशोऽपि कदाचित्सौन्दर्य-मेवोत्पादयति। लावण्यं संस्थानमुग्धिमेति [2]लोचनकृन्मतमनुसृत्य जानकीहरणे राज्ञो दशरथ-स्यान्तःपुरवनितानां कौशल्यादीनां स्वरूपसौन्दर्यमिह परीक्ष्यते। रमणीनां रमणीयत्वं प्रायशश्चित्तं चोरयति।[3] कौशल्या चात्र समग्रललनाश्रीसौभाग्योपेता चित्रिता दृश्यते। कथयति कविः—प्रजा-पतिना निर्माणसम्भारमेकत्र कृत्वा नेत्रे निमील्यैव मन्मथशराघाः तत्रस्तेनैव तस्या ऊरू विरचितौ किमित्याश्चर्यमन्यच्च पृथुतरास्याः श्रोण्येव मध्यस्य पृथुत्वमाहृत्य तमतिकार्श्यं प्रापयामासा अत एव रशनागुणेन सा निबध्यैव वनितया तया कौशल्यया रक्ष्यते, न पुनर्वृद्धिमाप्नुयादिति मनसि कृत्वा।[4] घटस्तनी तस्याः तथा पीवरौ यथा तयोरतिभारभरवहनक्लेशेनैव मध्यभागो नितरां कृशतां जगाम। नवोदररोमराजिस्तु तस्याश्चित्तमाकर्षयत्येव, प्रतीयते सुकेश्यास्तस्या अलकान् चित्रयतः प्रजापतेः कम्पमानकरतूलिकाग्राद् मसीरेखैवात्रोदरे पतिता।[5] एवमनेकधा कौशल्यासौन्दर्यवर्णने कुमारदासः कृतप्रयास इव परिलक्ष्यते। न चात्र तत्साफल्यमवाप्तवान् यदस्ति जानकीस्वरूपसौन्दर्योपस्थापने निशाचरवल्लभानां वा सौन्दर्यनिबन्धे। वस्तुतस्तु यावान्निपुणः दक्षश्च प्रतिभाति प्राकृतिकसौन्दर्यपरीक्षायां कुमारदासः, न तथा मानवाकृतिसौन्दर्यनिर्माणे। काव्यस्य सप्तमसर्गे जानकीस्वरूपसौन्दर्यमुपवर्णितमस्ति। रूपकाद्यलङ्कारसन्निवेशलालसतया विषयस्योपेक्षा भवति, अस्ति च तत्कुमारदासकृतजानकीचारुत्वविवेचने। तथापि रमणीयता

---

१. द्र०, हर्बर्ट सिडनीलाङ्गफील्डमहोदयस्य—'दि एस्थेटिक एटीच्यूड' पृ० १०८।
२. लोचनम्, पृ० २८४।
३. द्र०, श्री ए० सी० शास्त्री, तत्रैव पृ० ४४-४५।
४. द्र०, जानकीहरणे १।२९-३०।
५. द्र० तत्रैव श्लोकाङ्काः १।३२-३३। तथा च—

अरालकेश्या अलके विधात्रा विधीयमाने चलतूलिकाग्रात्।
च्युतस्य बिन्दोरसितस्य मार्गरेखेव रेजे नवरोमराजिः॥ (तत्रैव १।३३)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सर्वथैव हृद्या भवति । दृश्यतां तस्या नखद्युतिः कवेर्वर्णनाप्रकारम्—प्रतीयते, भास्वन्नखच्छलेन नक्षत्रसन्ततिरेव तस्याः पादयोः पतित्वा प्रार्थयति, वदनकान्त्या ताराधिपं चन्द्रं मा विमानीकुरुताम्, प्रतिमा च सीताया लावण्योपेता चित्रिता । तद्यथा—वक्षसि पीनमुष्णं च कुचद्वयम्, तस्य भारभरेण भज्यमानो मध्यभागः, पृथूरू, कामानलधूमरेखेव स्तनयोस्सीमावधिरिव नवोद्भिद्यमानरोमालिः, नीलेक्षणे, सुभ्रुवावित्यादिसर्वं विधात्रा सकलकलाभ्यासपूर्वकमेव तस्या धरणिभुवो रचयामासे । चन्द्रस्तु सीताया मुखसौन्दर्याश्रय एव शुक्लपक्षे कलाकलां प्रतिगृह्य पूर्णोऽपि तमनवाप्य क्रमेण शोकादिव कृष्णपक्षे क्षीणतां व्रजति ।[१] सौन्दर्यप्रतिपत्तये काव्येषु कवय उपमानानि गृह्णन्ति । तन्माध्यमेनैव सौन्दर्योद्भासनं भवति । जानकीमवेक्ष्य रामणीयकहृतहृदयो रामो वितर्कयति मन्ये हरिणीनां नेत्राणि नीलोत्पलानि च विरचय्य पूर्वमभ्यासं कृत्वैवास्याश्चपलमायतं नीलेक्षणं विरचितवान् विधिः । भ्रुवावस्याश्च कामारिरोषप्लुष्टस्मरकार्मुकस्य मध्यविभग्नौ किमु खण्डद्वयाविति वितर्को महान् । मन्ये च सीताया आलापमेव श्रुत्वावधीरित इव कोकिलः शोकेन कार्ष्ण्यं रोषेण च लोहिताक्षित्वं जगाम ।[२] चित्रार्पितमेवैतद्दृश्यम्, यत्र परिजनकुलैर्यान्ती जानकी तिर्यगर्द्धनिरीक्षणेन रामं कटाक्षीकरोतीति नितरां हृद्यम् ।[३]

सौन्दर्यपरिपाको भवति शृङ्गार एव कात्स्न्र्येन । प्रणयिनोर्यूनोः सीतारामयोः प्रथमप्रणयक्रीडा अनुभूताः, प्रत्यक्षीकृताः, स्वकीया इव प्रतिभासमानाः सर्वमाहरन्ति । स्वभावोक्त्यापि तावन्निरवधिः काव्यार्थः सम्पाद्यत इत्याचार्यानन्दस्योक्तिर्यथार्थतावलम्बिनी ।[४] कं नोत्सुकापयन्ति सीतारामयोः स्वभावशृङ्गारचेष्टाः । स्वकीयसर्वस्वापहरणकाले कामवस्थां गता जानकीति भृशं संदर्शनीयम्—

यद्ररक्ष दृढवस्त्रबन्धनैः स्वापकालमवलम्ब्य भर्तरि ।
तत्प्रमृष्टवति सङ्गतस्मृतिः सा रुरोद मुषितेव सस्वरम् ॥[५]

'असह्यमिदं विसृजेति' सुरतसमये व्याहृतं शुकोदीरितमाकर्ण्य जानकीव्यापारं पश्यन्तु—

रत्नतल्पनिकटस्थिते शुके सङ्गते हृदि निधाय भाषितम् ।
निःसहा तु विसृजेति जल्पति व्रीडिता परिजघान पञ्जरम् ॥[६]

एवमन्ये तयोर्व्याहाराश्च पाठकचेतसि महानन्दोत्पादनं कुर्वन्ति ।[७] 'डौस' तथान्येषां पाश्चात्त्यसौन्दर्यसमीक्षकाणां मतौ वस्तुन्येवानन्दोऽनुभूयते ।[८] लिप्समहोदयेनोक्तम्—'वस्तुन्यात्म-

---

१. वक्त्रेन्दुलीलामनुयातुमस्याः कलान्तराणि प्रतिपद्य चन्द्रः ।
पूर्णोऽपि साधर्म्यविशेषशून्यः क्रमेण शोकादिव याति हानिम् ॥ (तत्रैव ७।१३)

२. द्र०, तत्रैव ७।१४-१७ ।

३. तिर्यग्विवृत्ताननचन्द्रकान्ता रामं जघानार्द्धनिरीक्षणेन ॥ (तत्रैव ७।२१)

४. द्र०, ध्वन्यालोके, पृ० ५८४ ।

५. द्र०, तत्रैव ८।१३ ।

६. तत्रैव ८।३१ ।

७. प्रार्थितापि न चकार कानिचित् कानिचित् स्वयमपि व्यधत्त सा ॥ (तत्रैव ८।४४)

८. द्र०, कुर्ट जॉन डौस—फिलासफी आफ आर्ट (लन्दन), १९२९ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

व्यवहाराणामनुभूतिरेव सौन्दर्यानन्दमुच्यते ।[१] भूपतिर्महारथो दशरथो मृगयायां मृगेषु प्रहर्तुमुद्यतोऽपि प्रेम्णाऽन्योन्यमुखार्पिततृणकवलयोर्मृगयूथयोरुद्वीक्ष्यानन्दनिमग्नयोर्विस्मृतशराघातः स्वयमेवानन्दाब्धिविगाहमानोऽवलोकयन्नेव तस्थौ । कश्चिन्मृगयुश्चित्रकर एव वा कविः कुमारदासश्चास्यानन्दानुभवभ्रुवमेतीत्यहो कवेर्वर्णननैपुण्यम् । तत्रैव च शरप्रहारभिया पंक्तिबद्धपलायमाना दशरथस्यैकशरविद्धा सरलतयैकरेखया गच्छन्ती शरैकग्रन्थितेवात्यन्तं सुन्दरं चित्रमुपस्थापयति ।[२]

न च तदस्ति वस्तु किञ्चिद् यन्न चित्तवृत्तिविशेषं रसमानन्दं वोपजनयतीति पाश्चात्यसमीक्षका वदन्ति । तथा च स्वभावोक्त्यैवानन्तकाव्यप्रभेदत्वमुत्पद्यते ।[३] मुग्धशिशोस्तास्ताः स्वभावक्रीडाः कं न हरन्ति । बालोऽयं रामभद्रः 'रामो नास्तीह' इति तरुणीभिरुक्तः हस्तपुटेन मुखमाच्छाद्यैवानुपस्थितिं स्वकीयं विनिवेदितवानिति बालबुद्धिविलासः कस्यानन्दं नोपजनयति ।[४] मुग्धशिशोश्चित्रमेवास्मिन्नधस्तनश्लोके चित्रितमस्ति—

मुखमाहृतिधूलिगण्डयोः करघृष्टाञ्जनदानमस्य तत् ।
विबभौ सुरदन्तिनो यथा वदनं दन्तचतुष्टयोज्ज्वलम् ॥[५]

कस्ते तातः ? इति धात्रीभिरुक्तो रामः करेण नृपं विनिर्दिशंस्तस्यातीव सम्मदमातेने । कदाचिच्च मात्रा नियुक्तो भ्रातृभिस्सह पितुश्चरणौ संवाहयति । कदाचिच्च शयनीयगतस्य भूपतेर्वक्षसि स्वपितुः 'अहमेवात्र स्वापं लप्स्य' इति कलहायमानाः सर्वे एव भ्रातरः मातॄणामत्यन्तमानन्दं जनयन्ति ।[६] एतच्च सर्वं बालकानां मधुरचरित्रचित्रमेव प्रमातुश्चित्तमारोपयति सौन्दर्यसुखमनुभावयति च ।

कवयस्त्वचेतनवस्तुवृत्तान्तमेवाभिव्यक्तिकौशलेन चेतनवन्निर्माय सौन्दर्यलहरिकामुद्भावयन्ति सहृदयहृदयेषु[७] । प्रकृतेः साधनानि शैलर्तुनदनदीनिर्झरोदयास्तमयशशिसूर्यपुष्पोद्यानतरुलतापल्लवादीनि येषां माध्यमेनैव सौन्दर्योद्भासनमन्तर्दर्पणमन्तर्दर्शनं च चेतनवतां कविकर्मण्यावेद्यते । एतद्द्वारेणैव सौन्दर्यनिवहस्य साक्षात्कारो भवतीत्यत एव संस्कृतकवयः प्रायः सर्वत्र प्रकृतावेव चैतन्यमारोप्य तत्रैवानन्दमनुभवन्ति । तादूप्यमेवात्र हेतुः, सत्येव तादूप्ये चित्तविस्तारश्चित्तचमत्कारो वा भवति । कुमारदासोऽपि प्रकृतिमाध्यमेनैव सौन्दर्यतत्त्वावेक्षणं कृतवानत एव तत्रैवास्य सौन्दर्येक्षिका दृष्टिरपि परीक्षणीया, वर्णनीया च भवति । भारतीयास्तथा

१. द्र०, कृष्णचैतन्यस्य, संस्कृत पोयटिक्स, पृ० ५५, तत उद्धृतम् ।
२. अन्योन्यवक्त्रार्पितपल्लवाग्रग्रासं नृवीरस्य कुरङ्गयुग्मम् ।
प्रियानुनीतौ भृशमिष्टचाटुचेष्टस्य घाताभिरतिं निरासे ॥ तत्रैव १।५७, तथा ५८ ।
३. ध्वन्यालोके, पृ० ५२६ तथा च दण्डिप्रभृतय आचार्याः ।
४. द्र०, ४।५८ ।
५. तत्रैव ४।९ ।
६. द्र० तत्रैव ४।१०-१३ ।
७. द्र०, ध्व०, पृ० २१५ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च क्रोचेमहोदया अपि मानयन्ति विनानुभूत्या नास्ति नोपलभ्यते किञ्चित् सौन्दर्यसुखं प्रकृतिसम्भारेषु[1]। अनुभूत्या रसानुभूतिरेवेष्यते। अत एव सौन्दर्यस्य प्रतीतिरपि प्रधानतया रसे सोऽपि शृङ्गार एवेति काव्यशास्त्रम्। प्रतिपादनाय चास्य कुमारदासेनापि यूनोर्विहारविलासादयो बहुधा प्रदर्शिताः। तृतीयसर्गे पृथ्वीवल्लभो दशरथः रमणीभिस्सहारामादिषु बहुधा रेमे। तत्र च कामपरवशा काचित्प्रिया प्रियतममाक्रष्टुं सुदूरोन्नतप्रदेशस्थं पुष्पस्तवकभग्नव्याजेन बाहुमूलमुपदर्शयन्ती तिर्यग् राजानमर्धनिरीक्षणेन जघानेत्यत्र पुष्पपल्लवाग्रावचयव्यापृतसरागयुवतिचित्रं सम्मुखीनमिव भवति[2]। अपरस्यास्त्वेकस्या वदनारविन्दपानप्रवृत्तनरपतिरन्यया दृष्टः कुसुमधूलिधूसराभावेऽपि तस्या नेत्रे मुखमारुतेन गोपयन्निव निजप्रणयकर्म ममार्जेति नितरां कौतुकावहम्[3]। उत्कृष्टप्रेम्णि किं किं नाकल्पयति जनः स्वप्रेयसि। राजाऽपि वल्लभामपरामुद्वीक्ष्य तन्मुख एव माधवीलतामण्डपबुद्धिं बबन्धेति भृशमेव हृद्यम्—

स्निग्धद्विजालीरुचिरं प्रियङ्गुश्यामद्युतिश्चारुतमालकान्ता।
बिभर्ति गन्धाहृतभृङ्गचक्रं सन्माधवीमण्डपमेतदास्यम्॥[4]

पद्माकरश्च वारि विगाहमानस्य रामाजनस्य नितम्बबिम्बं वीचिकराग्रेण सशब्दं कामीव व्यास्फालयति। कश्चित्तरत्तरङ्गो रामाणां पीननितम्बैः दूरमुत्क्षिप्तः अन्यस्याः तनूदरेषु प्रविष्टो हतभाग्यस्ततोऽपि मांसलस्तनैस्ताडितः सुदूरमुत्क्षिप्तः। क्षीणस्य दैवहतस्यात्र दृश्यमेव हृदयमारोहति[5]। कृत्स्न एव तृतीयसर्गः सौन्दर्यकोष इव कविना सहृदयाय समर्पितः। नृपोपभुक्तमुक्ता सरोजिनी सरोजिनीव प्रतिभाति—

सरोजिनी तत्परिभुक्तमुक्ता मूर्च्छातुरेव स्तिमिता विरेजे।
निद्राहृताम्भोजनिमीलिताक्षी रुग्णं मृणालीवलयं दधाना॥[6]

भुक्त एवास्य सौन्दर्यमाकलयितुमीष्टे। एवमेव षोडशसर्गे निशाचरयुवतिवृन्दानां हारिविभ्रमविलासा दूतीसम्प्रेषणादिव्यवहाराश्च कवेरनुभूतसौन्दर्योपस्थापनशक्तिमाविष्कुर्वन्ति। मानवतीनां युवतीनां सापराधप्रियेषु दण्डप्रकारोऽयमत्र—

स्तनतटनिहतःकरोऽवधूतः परिगदिते समधिश्रितं हि मौनम्।
विहसितमपि सान्त्वने सरोषं प्रणयिजने युवतेरयं हि दण्डः॥[7]

शृङ्गारानन्तरं करुण एव हृदि किमप्यानन्दानुभवमुपजनयति। एको रसः करुण एवेति

---

१. द्र०, क्रोचे—एस्थेटिक्स, उद्धृतं चैतन्यस्य, 'संस्कृत पोयटिक्स' इति ग्रन्थतः।
२. दूरस्थपुष्पस्तवकाग्रभङ्गव्याजेन संदर्शितबाहुमूला। तत्रैव ३।१७ तु० भारविः, किराते ८।१८।
३. द्र०, तत्रैव ३।८, तु० रघुवंशः २।१९।
४. द्र०, तत्रैव ३।२१।
५. द्र०, तत्रैव ३।३१।
६. तत्रैव ३।६०।
७. तत्रैव १६।३९।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवभूत्याचार्यस्तु करुणमेव प्रधानत्वेन प्रतिपादयति । वनगमनावसरे सीताया उक्तय: कं नावर्जयन्ति । पश्य, पथि चलन्ती कोमलाङ्गी जानकी रथं त्यक्त्वा द्वित्राण्येव पदानि गत्वा गन्तुमसहा रामं पृच्छति, अतोऽपि कियद्दूरं गन्तव्यमिति—

द्वित्राण्येव रथं त्यक्त्वा पदान्याधाय निःसहा ।
येयमन्यत्कियद्दूरमिति पप्रच्छ मैथिली ॥[1]

सत्यनुभूतावेव सौन्दर्यसमुल्लासो भवति ।[2] पाश्चात्त्यो ह्वाइडेटमहोदय: सत्यं विना सौन्दर्यमधमत्वकोटिकमिति प्रतिपादयति ।[3] भारतीयकाव्यशास्त्रकारास्तु सत्यमेव सौन्दर्यं पश्यन्ति । सत्यं शिवं सुन्दरमित्यस्यैवोद्घोषः । सौन्दर्ये सत्यस्य, शिवस्य च साक्षात्कारो भवति । कीट्सोऽपि सौन्दर्यमेव सत्यम् सत्यमेव सौन्दर्यमिति मन्यते ।[4] एतत्त्रितयमपि तपोवनेषु ऋषिकुलेषु, तापसवृन्देष्वेवात्यन्तं परिपूर्णतां याति । जानकीहरणस्य पञ्चमसर्गे वर्णिततपोवनं दृष्ट इव, अनुभूत इव, प्रत्यक्षायमाण इव प्रमातुश्चित्तमारोहति । क्वचिच्च तरुतलेपु मयूरा नृत्यन्ति तपस्विसामतालेपु । क्वचिच्च पक्षिपानायाम्भोभरितपात्राणि वृक्षाधः निवेशितानि सन्ति । प्रशुष्यमाणपुण्यवल्कलसनाथतरुकाण्डानि च क्वचिदवनमितानीव दृश्यन्ते । लोहितगण्डमण्डितप्लवङ्गमाश्चापरत्र स्वभागभूतं नीवारबलिमाहरन्ति स्वकरकमलैः । स्वाङ्कसुप्तमृगशावप्रतिबोधशङ्कया क्लान्तोऽपि चिरमधितिष्ठन्मुनिजनो नोत्तिष्ठति स्वाधिष्ठानात् । धूमधूसरिततरुषण्डाधश्च क्वचिदतिथिभ्य आसनानि विनिहितानि सन्ति । क्वचिच्च सम्पाद्यते बलिक्रिया तापसवनिताभिर्मृगाङ्गनाश्च अपरत्रालिहन्ति प्रेम्णा शावकवृन्दानि । तरुभ्रष्टपक्षिशावकसुखार्थं तापसकुमारकास्त्वन्यत्र कृतकनीडं विनिर्माय सुखस्पर्शमिषीकतूलासनविन्यासपराश्च तत्र दृश्यन्ते । खातेपु चाङ्कुरितानि दृश्यन्ते बीजानि । शुष्यन्तीमिङ्गुदीं क्रीडापरायणा मृगशावका विकीर्यमाणा दृश्यन्ते । एवमितराण्यपि तपोवनस्वरूपसुन्दरदृश्यानि कविना निगदितानि जानकीहरणे, कियच्च क्रियतां तेषां वर्णनम् ।[5] व्याघ्रस्य पुच्छं प्रगृह्य तापसकुमारकास्तस्याङ्गवृष्णबिन्दून् गणयन्तीति शाकुन्तलस्य भरतकृतव्याघ्रशिशुदन्तगणनां स्मारयति ।[6] घर्मातपसंतप्तौ हरी शाश्वतिकमप्यपहाय वैरं गजस्य फणिनश्चाश्रयमाश्रयेते—

---

१. तत्रैव १०।५०, प्रथमसर्गे श्रवणकुमारस्य करुणार्द्राणि वचांसि शोकसन्तानमुपस्थापयन्ति १।७६–८४ ।

२. ए० सी० शास्त्री, तत्रैव पृ० १२४ ।

३. ए० एन्० ह्वाइडेट (White head) एडवेन्चर्स आफ आइडियाज पृ०, ३४४.

४. कीट्स, ओडआन ग्रेसियनअर्न (Beauty is truth and truth is beauty), उद्धृतः शास्त्रिग्रन्थात् ।

५. तत्रैव ३।१–१० ।

६. प्रगृह्य पुच्छे शिशवस्तपस्विनां मसीपयः सेककृतानिवासितान् ।
यदङ्गबिन्दून्गणयन्ति चापलाद्विलोकय द्वीपिनमेनमग्रतः ॥ तत्रैव ३।२३ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इमौ हरी संहतरोषशङ्किती नितान्ततप्तौ तपनस्य दीप्तिभिः ।
तलं गजस्य स्रुतगण्डसंपदः फणातपत्रं फणिनश्च वाञ्छतः ॥[1]

काव्यं हि परमानन्दितस्योत्तममनसश्चोत्तमोत्तमानन्दफलम् ।[2] आनन्दितमेव मनो व्याप्रियते काव्यकर्मणि । तच्च कर्म अनुत्तममपि सर्वं रमणीयत्वमानयति ।[3] शोभासौन्दर्यमुच्यत इति वक्रोक्तिकाराणां मतम् ।[4] परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शोभते । रसादितात्पर्ये च नास्त्येव तद्वस्तु तदभिमतरसाङ्गतां नीयमानं न प्रगुणी भवति । न सन्त्येव वा तानि यानि न यान्ति रसाङ्गतां चेतनवृत्तान्तयोजनया ।[5] ध्वनिकारोक्तिर्जानकीहरणे च पूर्णतया घटते । अचेतनवस्तुनि चैतन्यत्वमारोप्य कुमारदासः सौन्दर्यसम्पदा सुशोभयति स्वकवितामन्दिरम् । यथाहि, वसन्तागमे सम्पीडितसर्वावयवः कण्टकितोर्ध्वदण्डो नूतनपद्मषण्डो जलान्तर्वासाच्छीतव्यथित इवातपेच्छया जलाद् बहिर्निर्ययौ । अधिगतप्रियतमापादाघात इव बन्ध्योऽप्यशोको रणन्मञ्जीरालक्तकरसरञ्जितयुवतिपादताडितोऽतिहर्षान्नवोद्गतैः पुष्पैरुद्भूतरोमाञ्च इव वसन्तेऽतितरां दृष्टिमावर्जयति । वासन्तिकसूर्यमरीचिभिरुपहतं हेमन्तमालोक्य प्रभाहतमुद्धृतारिः कमलवनं प्रीत्येव जहासे । पुष्पवत्या लतयोपगूढः पुष्पप्रभादीप्यमानः पलाशः सुहृदः कामस्य दाहाग्निसमुत्थितवसन्तराशीकृतभस्म इव नितरां वनेषु विरेजे । वसन्तातपतप्ताभिनवकिसलयाग्रमण्डितास्तरवो बहिर्निःसारितविद्रुतताम्रजिह्वा इवावलोक्यन्ते ।[6] एषु सर्वत्रैव चेतनायमानेव प्रकृतिश्चित्रिता । तथापि चात्र नोपलभ्यते कालिदासरामणीयकारामोपभोगः ।

द्वादशे सर्गे प्रफुल्लपङ्केरुहककर्कशस्तनी शरद्वनेषु रामं सेवितुमवतार्यते । शत्रुमुद्धृत्यापि सदैव सम्मानं प्रदेयं विशिष्टं च स्थानं विधेयमितिकृत्यैव कलमपालिकाः स्वकीयनेत्रस्पर्द्धिपङ्कजमुन्मुच्य शिरस्यलङ्कारीकुर्वन्तीति सौन्दर्यदर्शनस्याभिनवात्र अपूर्वेव काचित्कवेर्दृष्टिः ।[7] कं नावर्जयति चित्रं पश्य सुरभि प्रेयसीमुखं कश्चित्प्रेयानिव सारसः सुगन्धिगर्भं कमलस्य कुड्मलं चञ्च्वा बलान्निबोधयामासेति महत्सुन्दरमेतच्चित्रं लोकस्य—

निपीड्य चञ्च्वा कमलस्य कुड्मलं विबोधयामास बलेन सारसः ।
सुगन्धिगर्भं मुकुलीकृतं ह्रिया पतिः प्रयत्नादिव कन्यकामुखम् ॥[8]

---

१. द्र०, तत्रैव ३।२४ ।

२. द्र०, एल्० हन्ट, ह्वाट्जपोयट्री, शास्त्रिग्रन्थात् ।

३. पी० बी० शैली, ए डिफेन्स ऑफ पोयट्री ।

४. द्र० वक्रोक्तिजीवितम्, पृ० ५२९ ।

५. द्र०, ध्व०, पृ० ५२९ ।

६. द्र०, तत्रैव ३।११–१२ ।

७. द्र०, तत्रैव १२।६ ।

८.। द्र०, तत्रैव १२।१० ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विनाशके शत्रौ समुपागतेऽन्तरितेषु जनेषु कश्चिदेक एव विनिर्गच्छति तदवलोकनाय गतो न वेति विज्ञातुम् । शरदागमे पद्माकर एकमेव कमलं प्रथमं समुद्गतं तेषां विनाशकारका मेघा गता न वेति विनिश्चेतुम्—

सरोजमेकं प्रथमं समुद्गतं विभाति पद्माकरनाशनो घनः ।
गतो न वेतीक्षितुमम्बुजैः परैरुदेतुकामैः कृतमग्रतो यथा ॥[१]

द्वावप्येतौ श्लोकौ लोकस्य चित्रमेवोपस्थापयतः । न खल्वनयोः रमणीयत्वं वक्तुं पार्यते । सहृदय एवानन्दमनुभवितुमर्हति । वस्तुतस्त्वभिव्यक्तिरेव उक्तेः कल्पनाया वा आभूषणम् । शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानमित्यभिनवभट्टः । मानवस्य प्रकृतेश्चान्तस्सौन्दर्यतादात्म्येनैव तस्याः साफल्यमत्र । कुमारेण पूर्वप्रदर्शितयोरुभयोरपि श्लोकयोर्यदुक्तं न तत् क्वापि सुलभमन्यत्र । सौन्दर्ये सत्यारोपणमेव संस्कृतकवितायाश्चरमं लक्ष्यम् । तदेवात्र सम्यग्विनिविष्टमस्ति ।

कवयो हि प्रकृतिसम्भारेषु तथा सम्बद्धा भवन्ति यथा सौन्दर्यं स्वयमेव तेषामुपनिबन्धे प्रवाहरूपेणापतति । सौन्दर्ये चरमतत्त्वमानन्द एव । आनन्द एव सौन्दर्यम् ।[२] सूर्याचन्द्रमसोरस्तोदयेषु वैदिका अपि कवयो व्यामुह्यन्तः किमिति लौकिकाः । पश्याधस्तनश्लोके तरुणोऽयं भानुमान् सरागकरेण विबोधयति—

विरामः शर्वर्याः हिमरुचिरवापोऽस्तशिखरं
किमद्यापि स्वापस्तवमुकुलिताम्भोरुहदृशः ।
इतीवायं भानुः प्रमदवनपर्यन्तसरसीं
करेणाताम्रेण प्रहरति प्रवोधाय तरुणः ॥[३]

पठित्वैव पद्यम् केनाप्यानन्दातिशयेन चित्तविकास उपजायते । अस्तमुपयास्यंश्चायमेव भानुरस्तमस्तकमधिश्रितो भुवनं पश्यति—

सन्निगृह्य करसन्ततिं क्वचित्प्रस्थितोऽपि रविरेष रागवान् ।
अस्तमस्कमधिश्रितः क्षणं पश्यतीव भुवनं समुत्सुकः ॥[४]

जलधितटमधिरूढ एव सौन्दर्यमाकलयितुमीष्टेऽस्तमयस्य रवेरुन्मुखा मयूखा बाडवशिखा इवाभान्ति ।[५] प्रतीयते यथाग्निज्वालेवान्तरुदधेरुत्पद्यते । ताम्रसन्ध्यायाञ्च विचित्रवर्णनभोमण्डलमर्कदीपकज्जलमलीमस इव विभाव्यते[६] । उदेष्यतः चन्द्रस्य पथि दिग्वधूभिः तारकलाजकाविक्षिप्ताः सन्तीव[७] । मित्रनाशाच्च सायं दीर्घिकाणां करुणावस्था—

१. द्र०, तत्रैव १२।१९ ।
२. श्रीशास्त्री, तत्रैव पृ० १२२ ।
३. तत्रैव ३।७८ ।
४. तत्रैव ८।५६ ।
५. द्र० तत्रैव ८।६२ ।
६. तत्रैव ८।६६ ।
७. तत्रैव ८।८३ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मित्रनाशपरिरोदितास्चिरं मूर्च्छिता इव विभान्ति दीर्घिकाः ।
सुप्तपद्मविनिमीलितेक्षणा वृद्धशान्तकलहंसकूजिताः ॥[१]

मूर्च्छितां स्मारयन्न कमावर्जयति । प्रावृषि च मलिनीकृतकन्ततिः कमलिनी कामपि शोच्यतामुपगतेति भृशमत्र दर्शनीयम्—

कमलिनी मलिनीकृतकन्ततिः सकलहं कलहंसगणं जहौ ।
अविकलं विकलङ्कतनुच्छदं समदनम्मदनभ्रतनुश्रियम् ॥[२]

अपि च विकचकेतकीमध्यगो रामया रममाणः मधुपः अज्ञातवायुवर्षाघातश्चिरं सुखस्वापमाप्तवान्—

नवविबोधमनोहरकेतकी कुसुमगर्भगतः सह कान्तया ।
अविदितानिलवृष्टिभयागमः सुखमशेत चिराय शिलीमुखः ॥[३]

कियद्वा वर्ण्यते कवेरभिधानकौशलसौन्दर्यचातुरी ।

सहृदयः सर्वावस्थासु सर्वपदार्थेषु च सौन्दर्यसाक्षात्कारी भवति । वायसानां स्वभावः किमप्यशनीयं दृष्ट्वा यत्र कुत्रचित्तुण्डं घर्षन्ति । रामेण व्यापादितस्यैकगजस्य मुखमातिष्ठन् कश्चिद्वायसो मृतनिशाचरमांसादितस्तृप्तो लोहितानुलिप्ततुण्डाग्रं तत्र गजरदने घर्षति—

रक्षोवशापिशितपूरितकुक्षिरन्ध्रः काकुत्स्थबाणहतहस्तिमुखाधिरूढः ।
पर्यन्तलग्नरुधिराणि मृदुप्रणादस्तुण्डानि वायसगणो रदने ममार्ज ॥[४]

क्वचिद्युद्धमपि सुखमेवोत्पादयति । रामरावणयोर्युद्धमस्यैव समर्थनां करोति ।[५] न च सौन्दर्यमाप्यते विषयेष्वेव । सौन्दर्यधामानि चैतन्यभाजां सन्मनोवाक्कार्याण्येव । तत्रैव सौन्दर्यस्येयत्ता । मिथिलेश्वरो जानकीमुपदिशन्नान्तर्यसौन्दर्यस्य हेतुभूतं पूर्णतत्त्वमेवात्रोपस्थापयति—

परःप्रकर्षो वपुषः समुन्नतिर्गुणस्य तातो नृपतिर्नवं वयः ।
इति स्म मा मानिनि मानमागम पतिप्रसादोन्नतयो हि योषितः ॥[६]

वपुः प्रकर्षादि बाह्यमेव सौन्दर्यम् । तस्य च साफल्यमान्तर्येणैव भवति । पतिप्रसादादेव युवतीनां सौन्दर्यस्य परिपूर्णता भवति । कालिदासेनापि कुमारसम्भवे प्रतिपादितमेवैतत् । पुनश्च—

स्त्रियो न पुंसामुदयस्य कारणं ता एव तद्धामविभूतिहेतवः ।
तडिद्वियुक्तोऽपि घनः प्रजृम्भते विना न मेघं विलसन्ति विद्युतः ॥
गतापि भर्त्रे परिकोपमायतं गिरः कृथा मा परुषार्थदीपिनीः ।
कुलस्त्रियो भर्तृजनस्य भर्त्सने परं हि मौनं प्रवदन्ति साधनम् ॥[७]

---

१. तत्रैव ८।८४ ।
२. तत्रैव ११।५० ।
३. तत्रैव ११।७३ ।
४. तत्रैव ५।६० ।
५. द्र० तत्रैव १९।२० ।
६. तत्रैव ९।४, तु० कुमारसम्भवम् ५।४१ ।
७. तत्रैव ९।५–६ ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भारतीयपरम्परायामात्यन्तिकञ्च सौन्दर्यं ब्रह्मण्येव । 'तस्यैव भासा सर्वमिदं विभाति' इति दृशा दशरथोक्तं दशमसर्गे वृद्धावस्थायाः स्वरूपं येन निर्वेदो वैराग्यं वा जायते । अतोऽनन्तरञ्च तपश्चरणेन तस्यैव पूर्णसुन्दरश्रीभगवदुपलब्ध्योवान्तिमं सौन्दर्यमुपलभ्यते । यं दृष्ट्वा लब्ध्वा च नैवेतरस्य वाञ्छा चिन्ता वोपजायते सौन्दर्यस्य । स एवानन्दी भवति यश्च तमद्भुतं सौन्दर्यं भुनक्ति । यतो हि, 'रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति ।' पूर्णसुन्दरश्रीः स एव जगति चेतनाचेतनयोः सौन्दर्यस्रष्टा । क्रीडयैत्र निर्माय्यैतत्सुन्दरं जगत्तत्रैव रमते । ज्ञातारस्तत्त्वधिया तमद्भुतं सौन्दर्यधामानं पश्यन्ति । तत्तु बलवदिन्द्रियग्रामजयानन्तरमेवोपलभ्यते । अत एव निरस्तसमस्तकल्मषेण पुण्यभाक्त्वेन भवितव्यम् । रावणमुपदिशन् अङ्गदः—

इन्द्रियाणि मतिमन्तमजय्यं योजयन्ति विषयेषु विजित्य ।
तद्वशित्वमवधूय यशोभिर्यस्तनोति भुवनानि स वीरः ॥
यौवनं चलमपायि शरीरं गत्वरं वसु विमृश्य विसृष्टः ।
अन्यजन्मगततिक्तविपाकं दृष्टसौम्यमपि कर्म न धत्ते ॥[1]

× × ×

रूपवन्तमपि हन्ति जरार्तिः सङ्गमे महति चास्ति वियोगः ।
याति दार्ढ्यमपि विच्युतिमायुः पुण्यमेव निरपायि भजध्वम् ॥

इत्ययमपरमपि सौन्दर्यपक्षमुपस्थापयति । पूर्ववर्णितसौन्दर्यस्य चास्य च तदेवान्तरं यन्मधुशर्करयोरिति । कुमारदासोऽपि बाह्यसौन्दर्येणान्तर्यमुदभासयंस्तस्यान्तिमे पूर्णसौन्दर्यधाम्नि परब्रह्मणि प्राह्मावेव परिणतिं करोति । यतो हि वार्धक्ये—

मन्दशक्तीन्द्रियश्च्योतल्लालाविच्छुरिताधरः ।
अस्फुटस्मृतिचेष्टाभिर्बालव्रतमिवाचरन् ॥

× × ×

वार्धक्ये धर्मतो मूढः स्वदेहवहनेऽपि सः ।
विधित्सन्नप्यशक्तिष्ठस्तपःकीदृग्विधास्यति ॥[2]

अत एव चरमसौन्दर्यो भगवानधोक्षजः सकलसौन्दर्यकलानिधानः पूर्णधामा परमात्मैव सेवितव्यः । कुमारदासोऽपि भूयोभूयस्तमेव भजति—

तस्मै स्मरणमात्रेण तुभ्यं सद्यस्तमोनुदे ।
नमः सत्त्वमधिश्रित्य त्रैलोक्यं परिरक्षते ॥[3]

---

१. तत्रैव १५।१८–२१ ।
२. तत्रैव १०।१२-१९ ।
३. २।१६ तत्रैव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

संस्कृतं शिल्पशास्त्रम्

ति० गो० अनन्तसुब्रह्मण्यम्

व्याकरणशिरोमणिः, विद्वान् सङ्गीतभूषणम्, डिप्-इन्-टीच्, उपानुसन्धायकः,

केन्द्रीयसंस्कृतविद्यापीठे, तिरुपतिः, आन्ध्रः ।

चतुर्णां वेदानामुपवेदा अपि चत्वार एव । "ते तु ऋग्वेदस्य आयुर्वेद उपवेदः । यजुर्वेदस्य धनुर्वेद उपवेदः । सामवेदस्य उपवेदो गान्धर्ववेदः । अथर्ववेदस्य चोपवेदः स्थापत्य-[शिल्प] वेद इति प्राचीनपरम्परया उच्यते । स्थापत्यकर्मणोऽन्यानि नामानि प्राचीनैः—'वास्तुशास्त्रम्, शिल्पशास्त्रम्'' इत्यादीनि उक्तानि । कालक्रमेण परिवर्तमाने जगति संस्कृते कलाविषयकाणि त्रीण्येव शास्त्राणि प्राधान्येन प्राशस्त्यं भजन्ते । वास्तुशास्त्रम्, शिल्पशास्त्रम्, चित्रलेख्यशास्त्रञ्च । एतानि त्रीण्यप्यावश्यकानि । केचन पण्डिता वास्तुशास्त्रं शिल्पशास्त्रान्तर्गतमिति मन्यन्ते । अयमभिप्रायः प्राचीनतम इति वक्तुं शक्यते 'विज्ञानप्रपञ्चे सर्वाणि शास्त्राणि प्रत्येकस्थानं भजन्ते' किन्तु एतादृशरीत्या विभक्तुं पार्यते—

१—वास्तुशास्त्रम्—भवनम् [जनभवनम्, राजभवनम्, देवभवनञ्च] ।

२— शिल्पशास्त्रम्—प्रतिमाविग्रहनिर्माणम् ।

३—चित्रशास्त्रम्—आलेख्यम्, लेपनम्, छायाचित्रमित्यादि ।

अत्राधुना शिल्पशास्त्रं प्रत्यस्माभिरालोडनीयम् । शिल्पशास्त्रमित्युक्ते शिल्पकला इत्यपि ग्रहीतुं शक्या । शिल्पकला तावत् प्रतिमाविग्रहनिर्माणकर्म । प्रतिमानिर्माणं तु पूजार्थमेव कल्प्यते । पूजादिकर्म कर्तुं प्रतिमा तु आवश्यकी भवति । प्रतिमा नानारूपा, अभिमतदेवतारूपा च ।

गीतायाम्—

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥ इति ।

अनेन भगवद्वचनेन प्रतिमाविग्रहपूजनं वेदकालादारभ्य स्थितमिति ज्ञायते ।

प्रतिमाविग्रहपूजनमज्ञानामेव—

शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः ॥ इति वचनाज्ज्ञायते ।

प्रतिमाकल्पनं तु पाषाण–लोह–मणि–मृन्मयरूपमेव । पाषाणे प्रतिमाकल्पनस्य शिल्पशास्त्रज्ञानमावश्यकं भवति । प्रतिमानिर्माणार्थं शिलासञ्चयनकाले शिलापरीक्षा कर्तव्या । तदा केचन मन्त्रा वक्तव्याः सन्ति—

मन्त्रेणानेन चैतासामभिषेकं समाचरेत् ।
हिरण्यवर्णाः पावन्यः शुचयो दुरितच्छिदाः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति समराङ्गणसूत्रधारवास्तुशास्त्रे शिलान्यासविधावुच्यते। अतः शिल्पिनः संस्कृतस्य ज्ञानमनिर्वचनीयम्।

किञ्च—

अशास्त्रज्ञमकर्मज्ञं स्थपतिं यः प्रयोजयेत्।
न तस्य वास्तु सिद्धयेत सिद्धमप्यसुखावहम्॥
(समरा० शा० ८)

वास्तुशास्त्रे यज्ञवेदीत्यादिनिर्माणकर्मणि कर्तव्ये वेदमन्त्राणामर्थज्ञानमपेक्ष्यते। तज्ज्ञातृभिरेव यज्ञवेदयो निर्मातुं शक्याः। अत एव च शिल्पिनां संस्कृतभाषाज्ञानमनुपमम्। समराङ्गणशास्त्रे स्थपतिलक्षणावसरे—

शास्त्रं कर्म तथा प्रज्ञा शीलञ्च क्रिययान्वितम्।
लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत्॥
समुद्रं गणितञ्चैव ज्यौतिषं छन्द एव च।
शिराज्ञानं तथा शिल्पं यन्त्रकर्मविधिस्तथा॥

इत्युच्यते। (२, ३)

अत्र स्थपतीत्युक्ते दारु-पाषाण-लोह-मृन्मयप्रतिमाविग्रहकारिण एव स्वीकर्तव्याः। स्थपतीनां शिल्पिनाञ्च सर्वेषु शास्त्रेषु प्रज्ञा अनिरुद्धा।

पुराणेषु च प्रतिमाया लक्षणव्यानादय उक्ता दृश्यन्ते। मत्स्य-अग्नि-स्कान्द-गरुड-लिङ्ग-भविष्यत्-विष्णु [विष्णुधर्मोत्तर] आदिषु बहुत्र बहुशो वर्तन्ते।

१—लिङ्गपुराणे—लिङ्गलक्षणम्, अ० २६३।

२—कुण्डादिप्रमाणम्—अ० २६४।

३—अधिवासनविधिः—अ० २६५।

४—प्रतिष्ठाप्रयोगः—अ० २६६।

५—देवतामानम्—अ० २६७।

एते विषया अग्निपुराणे

विष्णोर्द्वादश रूपाणि, कूर्मादिदशावतारमूर्तिलक्षणानि निर्दिश्यते। अपि च शालग्रामाणां लक्षणानि च प्रतिपाद्यते।

आगमेषु—प्रतिमाया लक्षणमूर्तिस्वरूपादयः प्रतिपादिताः। कालिकागमे ७५ तमे पटले वास्तुशास्त्रं दृश्यते।

तन्त्रेष्वपि—शैव-वैष्णव-शाक्त-पाञ्चरात्रतन्त्रेष्वपि नानाप्रकारप्रतिमाप्रमाणनिर्माणमपि दरीदृश्यते।

शिल्पशास्त्रम्

शिल्पग्रन्था द्विविधा वर्तन्ते—दाक्षिणात्यशिल्पशास्त्रम्, औत्तराहवास्तुशास्त्रमिति, किन्तु सामान्यतो द्वयोरपि वास्तुशास्त्रमिति वक्तुं शक्यते, तथापि कतिचिद्भेदेन भिन्नं भवति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

द्राविडदेशेषु—

मानसारः, अगस्त्यस्य सकलाधिकारः, काश्यपस्य अंशुमद्भेदः, श्रीकुमारस्य शिल्पशास्त्रम्, मयासुरस्य मयमतमेते ग्रन्थाः प्रसिद्धाः ।

उत्तरदेशेषु—

विश्वकर्मवास्तुशास्त्रम्, समराङ्गणसूत्रधारः, मण्डनस्य वास्तुशास्त्रमेतानि विख्यातानि । वास्तुशास्त्रेषु भवननगरनिर्माणविषयाः प्रतिपादिता विलसन्ति । अतः शिल्पिनां स्थपतीनाञ्च वेदशास्त्रागमपुराणेतिहासादीनां ज्ञानमावश्यकं भवति । अत एव शिल्पवास्तुशास्त्रयोः संस्कृतभाषाज्ञानमनिर्वर्णनीयम् ।

अपि च, ईशानशिवगुरुदेवपद्धतिः, हरिभक्तिविलासः, अभिलषितार्थचिन्तामणिः [मानसोल्लासः], रघुनन्दनमठप्रतिष्ठापद्धतिः, हेमाद्रेश्चतुर्वर्गचिन्तामणिः, कृष्णानन्दस्य तन्त्रसार इत्यादिग्रन्थेषु प्रतिमालक्षणम्, तदुपयोगसामग्र्यश्च विशेषतया दृश्यन्ते । एतेषु ग्रन्थेषु पौराणिकागमतान्त्रिकसम्बद्धान्यविषया अपि वर्णिता दृष्टिपथमवतरन्ति ।

उपरि च चित्रकला, लेख्यलेपनसामग्री, प्रस्तरकला, वर्णनिर्लेपनमित्यादयोऽपि वर्णितास्सन्ति । शिल्पशास्त्रविदुषां संस्कृतभाषाज्ञानेन भौगोलिकप्रान्तीयशिल्पज्ञानमपि कर्तुं शक्यते । अपि च बौद्धजैनमतप्रतिमालक्षणमपि ज्ञातुमुपयुज्यते । अनेन ज्ञानेन गान्धार–नालन्दा–अमरावती–सारनाथ–मथुरेत्यादिदेशेषु विकसिताः कलाविशेषनैपुण्यविषयानपि ज्ञातुं समर्था भवन्ति । प्रतिमानिर्माणस्थापत्यशिल्पकर्मशास्त्रम् ईशवीयशताब्दीतः पूर्वमेवासीदिति ज्ञायते । वेदकालादारभ्य अस्तोति वक्तुञ्च पार्यते । गुप्तकालेऽपि च बहूनि शिल्प-वास्तुशास्त्राणि आसन्निति श्रूयते ।

किञ्च, प्रतिमाविग्रहनिर्माणविषये कश्चिद्विषयोऽवगन्तव्योऽस्ति, शिला परीक्ष्यैव प्रतिमानिर्माणार्थं स्वीकर्तव्या । शिला तावद् द्विधा वर्तते—प्रशस्तशिला, अप्रशस्तशिला चेति ।

प्रशस्तशिलाया लक्षणं विष्णुधर्मोत्तरे उच्यते—

'एकवर्णां समां स्निग्धां निमग्नां च तथा क्षितौ ।
घातातिमात्रस्फुरणां दृढां मृद्वीं मनोहराम् ॥
कोमलां सिकताहीनां प्रियां दृङ्मनसोरपि ।
सरित्सलिलनिर्धूतां पवित्रां तु जलोषिताम् ॥
द्रुमच्छायोपगूढां च तीर्थाश्रयसमन्विताम् ।
आयामपरिणाहाढ्यां ग्राह्यां प्राहुर्मनीषिणः ॥

(१०-३-५)

अप्रशस्तशिलाया लक्षणम्—

"अग्राह्यां ज्वलनालीढां तप्तां भास्कररश्मिभिः ।
अन्यकर्मोपयुक्तां च तथा क्षाराम्बुसंयुताम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्यन्तोपहतां रूक्षामपुण्यजनसेविताम् ।
तिलैः सम्भूपिता या तु विचित्रैर्विन्दुभिश्चिता ॥
रेखामण्डलसङ्कीर्णां विद्रां विमलसंयुताम् ॥"
(३-९०-६-७½)

किञ्च, शिलापरीक्षणविषयेषु केचन लेपनप्रकारा अपि सन्ति ।

विवेकविलासे—

निर्मलेनारनालेन पिष्टया श्रीफलत्वचा ।
विलिप्तेऽश्मनि काष्ठे वा प्रकटं मण्डलं भवेत् ॥

शुद्धपुरातनदध्ना, अथवा आमलमण्डेन, बिल्वफलरसेन च संकलय्य शिलोपरि लिप्यते चेत्, तदा शिलोपरिस्थधूलीपटलं निष्कास्यते । एतादृशरीत्या नानोपायाः सन्ति । अपि च दारु-परीक्षापि बृहत्संहिता-भविष्यत्-मत्स्य-विष्णुधर्मोत्तरादिपुराणेषु दृश्यन्ते । प्रतिमानिर्माणविषये दारुमन्त्रप्रयोगो विरलः, तथापि यत्र तत्र किञ्चिद् वर्तते । देवदारु-चन्दन-शमी-मधूकवृक्षादिभिः क्रियमाणायाः प्रतिमाया ब्राह्मणैः प्रतिष्ठः क्रियते चेत् प्राशस्त्यं लभते । अश्वत्थ-खदिर-बिल्व-वृक्षादिभिः क्रियमाणायाः प्रतिमायाः क्षत्रियैः प्रतिष्ठा कर्तव्या । खदिर-सिन्धुक-स्यन्दनवृक्षैः क्रियमाणायाः प्रतिमाया वैश्यैः प्रतिष्ठा कार्या । तिन्दुक–केसर-सर्ज–अर्जुन–आम्र-शालादिभिः क्रियमाणायाः प्रतिमायाः शूद्रैः प्रतिष्ठा श्लाघ्या । दारुप्रतिमाप्रतिष्ठा प्राचीनतमा विरला च । अद्यापि जगन्नाथ-बलराम-सुभद्राप्रभृतिमूर्तयो दारुमयरूपाः । एता दारुरूपा मूर्तयो द्वादश-वर्षात् परं पुनर्नवीकृत्य प्रतिष्ठापनीयाः । मद्रास्प्रान्तीयतिरुक्कोयिल्लूर्क्षेत्रस्थत्रिविक्रममूर्ति-र्दारुमयी ।

प्रासादनिर्माणे दारूणामुपकार उपयोगोऽनिर्वचनीयः । पाषाणयुगाद् दारुयुगमर्वाचीन मेव ।

मृत्तिकाप्रतिमानिर्माणम्

यथा दारु-पाषाणाभ्यां प्रतिमा निर्मीयते, तथैव मृत्तिकयापि प्रतिमानिर्माणं प्रसिद्धम् । दारुप्रतिमानिर्माणे तक्षकस्य कौशलं द्रष्टुं शक्यम्, तथैव मृत्तिकाप्रतिमानिर्माणेऽपि शिल्पिनः कौशलं द्रष्टुं शक्यते । मृत्तिकाप्रतिमानिर्मातुर्नाम 'कुम्भकारः' इति ।

अयं कुम्भकारो घटादिनिर्माता न, पुराणेषु दृश्यते—विश्वकर्मणः शूद्रभार्यायामुत्पन्ना नवकलाकारा इति । ते तावत्—१. मालाकारः, २. कर्मकारः, ३. शङ्खकारः, ४. कुविन्दकः, ५. कुम्भकारः, ६. कांस्यकारः, ७. सूत्रधारः, ८. चित्रकरः, तथा ९. सुवर्णकारः इति । एतेषु कर्मकारिषु 'कुम्भकारः' इति मृन्मयशिल्पकारस्य नाम ।

सामान्यतो मृन्मयप्रतिमानिर्माणे द्वौ भागौ स्तः—स्थूलरूपप्रतिमानिर्माणं सूक्ष्मरूपप्रतिमा-निर्माणञ्च । स्थूलरूपप्रतिमानिर्माणमपि द्विधा वर्तते–शुद्धमृन्मयीप्रतिमा, मिश्रा मृन्मयीप्रतिमा इति च मिश्रा इत्युक्ते मृदा सह अन्यानि सिकतादिवस्तूनि सम्मिश्रयन्ते ।

शुद्धा मृन्मयी त्वत्यन्तप्राचीनस्थानम् आवहति । अद्याप्युत्तरे देशे दीपावलीमहोत्सव-समये गणपति-लक्ष्म्योर्मृन्मयीं प्रतिमां कृत्वा पूजयन्ति जनपदस्था जनाः, बंगलादेशेऽपि महाकाली-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रतिमां मृन्मयीं कृत्वा पूजयन्ति । मृन्मयप्रतिमानिर्माणपद्धतयो हयशीर्षपाञ्चरात्रे समराङ्गणवास्तुशास्त्रे च दृश्यन्ते । हरिभक्तिविलासे १८ तमे विलासे—

"मृत्तिकावर्णपूर्वेण गृह्णीयुस्सर्ववर्णितः ।
नदीतीरेऽथवा क्षेत्रे पुण्यस्थानेऽथवा पुनः ॥
पाषाणशर्करालोहचूर्णानि समभागतः ।
मृत्तिकायां प्रयोज्याथ कषायेण प्रपीडयेत् ॥
खदिरेणार्जुनेनाथ सर्ज्जश्रीवेण्टकुङ्कुमैः ।
कौटजैरायसैः स्नेहैः दधि-क्षीर-घृतादिभिः ॥
आलेख्य मृत्तिकां तैस्तैः स्थाने स्थाप्य पुनः पुनः ।
मासं पर्युषितं कृत्वा प्रतिमां परिकल्पयेत्" ॥

नदीतीरात्, शस्यक्षेत्रात्, अथवा पावनस्थानात् [वल्मीकात्] वा मृदं स्वीकृत्य समभागेन पाषाणचूर्णेन, अथवा सिकतया च तथा लोहचूर्णेन वा सम्मिश्र्य, पुनः खदिर-अर्जुन-सर्ज-श्रीवेण्ट [वेतस]-कुङ्कुम-कौटज-आयसादिवृक्षाणां रसेन सह दधि-दुग्ध-घृतेत्यादिस्नेहद्रवेण च सम्यङ् मिश्रीकृत्य, सम्पिष्य च पिण्डरूपं कृत्वा एकमासपर्यन्तं स्थापयित्वा तदनन्तरं प्रतिमा कर्त्तव्या इति प्रतिपाद्यते ।

प्रतिमानिर्माणार्थं पञ्चद्रव्याणि प्रसिद्धानि---दारु-मृत्तिका-शिला [पाषाण]-धातु-रत्नादीनि । इतोऽपि मिश्रद्रव्यमपि उपयुज्यते । मृत्तिका-लोह-सुधादिभिर्द्रव्यैस्सम्मिश्र्य प्रतिमानिर्माणकार्यमद्यापि भारते शिल्पिभिः क्रियते ।

प्रतिमानिर्माणप्रतिपादका ग्रन्था बहवः संस्कृतभाषायामेव सन्ति, अतः शिल्पशास्त्रज्ञानार्थं संस्कृतज्ञानमावश्यकम् । किञ्च, प्राचीनभाषासु संस्कृतमेव प्रथमस्थानम्, मातृस्थानञ्चावहति ।

अपि च गृह-भवन-देवालय-यज्ञवेदिकादिनिर्माणविषयान् प्रतिपादयन्ति हयशीर्ष-समराङ्गण-मत्स्यपुराणादिग्रन्थाः । सर्वेषु ग्रन्थेषु शिल्प-स्थापत्य-लेख्य-लेखनादिविधयो दृश्यन्ते ।

किञ्च, प्रतिमानिर्माणे मुख्यतया वेदानां ज्ञानमावश्यकम् । देवतानिर्माणविषये वेदप्रतिपाद्यानि स्वरूप-ध्यान-मुद्रा-आयुध-वस्त्रादिलक्षणानि आवश्यकानि ।

समराङ्गणसूत्रे—

"पारम्पर्यं कौशलं सोपदेशं शास्त्राभ्यासो वास्तुकर्मोद्यमो धीः ।
सामग्रीयं निर्मला यस्य सोऽस्मिंश्चित्राण्येवं वेत्ति यन्त्राणि कर्तुम् ।

इति यन्त्रनिर्माणविषय उच्यते ।

हयशीर्षे चित्रकलां प्रति—

"चित्रं हि सर्वशिल्पानां मुखं लोकस्य च प्रियम्" इति । सर्वशिल्पस्थापत्यवास्तुशास्त्राणां मूलभूतं चित्ररेखाज्ञानम् । प्रथमतः चित्रम्, रेखाञ्च विलिख्यानन्तरमेव प्रतिमानिर्माणे प्रयत्नः कार्यः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उपरि च शिल्पशास्त्रेषु बहूनि सङ्केतनामानि संस्कृतभाषायामेव सन्ति। अतः संस्कृतज्ञानं शिल्पशास्त्रस्य मूलभूतं भवति।

प्रतिमानिर्माणविषये ज्ञातव्यांशा बहवः प्रतिमाया निर्माणे, तस्यास्स्वरूपम्, आसनम्, मुद्रा, आयुधानि, भूषणानि इत्यादीनि ज्ञात्वैव कर्तव्या प्रतिमा।

तत्प्रतिपादकग्रन्था बहवः संस्कृतभाषायामेव सन्ति। अत एवोच्यते संस्कृतज्ञानं विना एतेषां ज्ञानं न सम्भवति।

आसनविषये पातञ्जलयोगसूत्रे—दण्डासनम्, सोपाश्रयासनम्, पर्यङ्कासनम्, समसंस्थानादीनि। ज्ञानासनम्, वज्रासनम्, आलीढासनम्, अथ सुखासनादीनि बहूनि आसनानि दृश्यन्ते। पद्मासनस्य लक्षणं तु—

"ऊरुमूले वामपादं पुनस्तद्दक्षिणं पदम्।
वामोरौ स्थापयित्वा तु पद्मासनमिदं स्मृतम्"॥

एतादृशरीत्या सर्वेषामासनानां लक्षणमुच्यते। तत्तत्प्रतिमानिर्माणे तत्तद्देवतासनादिज्ञानमावश्यकं भवति। तज्ज्ञानसम्पादनार्थं संस्कृतग्रन्थानाम्, योग–गणित–ज्योतिष–नाट्यशास्त्राणां ज्ञानमनिवार्यम्।

तथैव आयुधविषयेष्वपि देवतानां नानाविधायुधानि दृश्यन्ते। यस्या देवताया यदायुधमिति सम्यग् ज्ञात्वैव प्रतिमा कर्तव्या। गदायुधे नानाप्रकारास्सन्ति। यथा—विष्णोर्गदाया नाम 'कौमोदकी' इति, तथैव शङ्खस्यापि वर्तते—

"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः" इति।

एतेन निघण्टोर्ज्ञानमपि शिल्पिनो मुख्यं भवति।

अपि च खड्गविषयेऽपि तथैव।

विष्णोः खड्गस्य नाम 'नन्दकः' इति, रावणस्य खड्गस्य नाम 'चन्द्रहासः' इति।

धनुर्विषयेऽपि च—

शिवधनुषो नाम 'पिनाकः' इति, विष्णोर्धनुर्नाम 'शार्ङ्गम्' इति। मन्मथस्य धनुषः स्वरूपम् इक्षुरितिः। अत एतासां देवतानामायुधनामादिविशेषज्ञानं प्रत्येकतया ज्ञातव्यमेव।

हलविषये नानारूपाणि सन्ति—

हली, सीरी, लाङ्गलीति, एतद्विना बलरामस्यायुधं हलम् इति श्रूयते।

उपरिनिर्दिष्टायुधेभ्यः परमन्ये बहवो नानारूपा आयुधविशेषाः सन्ति।

तथैव भूषणान्यपि। मुख्यतया हिन्दुदेवतानां भूषणादिविषयेषु समीचीननिष्कृष्टज्ञानमावश्यकम्। वराहमिहिरस्य बृहत्संहितायाम्—

"देशानुरूपभूषणवेषालङ्कारमूर्तिभिः कार्या"

इति दृश्यते।

नाट्यशास्त्रे—

"भूषणानां विकल्पञ्च पुरुषस्त्रीसमाश्रयम्।
नानाविधं प्रवक्ष्यामि देशजातिसमुद्भवम्"॥ इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अतो नाटचशास्त्रस्य ज्ञानमपि आवश्यकम् । स्त्रीपुरुषदेवतानां भेदेन भूषणादीनामपि भेदो भवति । भूषणादिज्ञानार्थं नाटचशास्त्रज्ञानमनुपमम् । यथा मानवानां वर्णाश्रमधर्मा विधीयन्ते, तथैव देवतानामपि सन्ति । ब्रह्मचारिरूपेण ब्रह्मा, यतिरूपेण शिवः, राजस्वरूपेण विष्णुः, सेनानीरूपेण स्कन्दो निर्मातव्यः ।

किञ्च, स्त्रीदेवताविषये अधिकश्रद्धा आवश्यकी । परिधानानि, अलङ्कारभूषणानि एतेषां प्रत्येकविशेषज्ञानं प्रतिमानिर्माणे मुख्यम् ।

कर्णभूषणम्, नासाभूषणम्, गलभूषणम्, शिरोभूषणम्, वक्षस्स्थलभूषणम्, कटिभूषणम्, पादभूषणम्, बाहुभुजभूषणानां ज्ञानं कर्तव्यम् । तत्रैव केशविन्यासेऽपि केशवन्धादिविषयेष्वपि ज्ञानमावश्यकम् । एतेषां ज्ञानार्थमागमशास्त्राणि अध्येतव्यानि । आगमास्तु शैव-वैष्णवभेदेन बहवस्सन्ति । आगमास्सर्वेऽपि संस्कृतभाषायामेव सन्ति ।

अथ च एकोनविंशतिमुद्रा विष्णोरुच्यन्ते ।

तन्त्रसारे—

एकोनविंशतिर्मुद्रा विष्णोरुक्ता मनीषिभिः ।
शङ्खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभाः ॥
.... शिवस्य दशमुद्रिकाः ।
लिङ्गयोनित्रिशूलाख्या मालेष्टामी मृगाह्वयाः ॥
सूर्यस्यैकैव पद्माख्या सप्तमुद्रा गणेशितुः ।
लक्ष्मीमुद्रार्चने लक्ष्म्या वाग्वादिन्याश्च पूजने ॥
अक्षमाला तथा वीणा व्याख्या पुस्तकमुद्रिकाः ।
सप्तजिह्वाह्वया मुद्रा विज्ञेया वह्निपूजने ॥ इति

अपि च ब्रह्ममूर्तिलक्षणानि, वैष्णवमूर्तिलक्षणानि शैवमूर्तिलक्षणानि च ज्ञातव्यानि । तेषां परस्परभेदा बहवस्सन्ति । शिल्पशास्त्रेषु देवतासम्वन्धिनो बहवो विषया उक्तास्सन्ति । शिल्पशास्त्रम्, वास्तुशास्त्रम्, स्थापत्यशास्त्रम्, आलेख्यशास्त्रम्, लेपनशास्त्राणां ग्रन्थाः संस्कृतभाषायामेव सन्ति, संस्कृतभाषां विना न कयापि भाषया उपनिर्दिष्टशास्त्रज्ञानं लब्धुम्, ज्ञातुं वा शक्यम् । एतेषु शिल्पशास्त्रस्य संस्कृतज्ञानमत्युपयोगि, अनिर्वचनीयञ्चानिर्वर्णनीयमपि, प्रशंसनीयञ्च। शिल्पकला दैवीकला । अतः दैवानुग्रहोऽपि आवश्यको भवति । दैवानुग्रहार्थम् आचारानुष्ठानादिकं मुख्यम् । तदर्थं च सर्वशास्त्रपुराणेतिहासानां ज्ञानञ्च आवश्यकम् । एतेषां शास्त्राणां ज्ञानसम्पादनार्थं संस्कृतभाषाज्ञानमपरिहार्यम् । शिल्पशास्त्रस्य संस्कृतस्य च सम्वन्धोऽन्योऽन्याश्रित इति शम् ।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

वैष्णवदर्शनेषु भक्तिस्वरूपविमर्शः

श्रीराजेन्द्रचन्द्रः, वैष्णवदर्शनतीर्थः,

संस्कृतकालेज, नवद्वीपम् (नदिया) पश्चिमवङ्गप्रदेशः ।

परमकारुणिकेन श्रीभगवता नृणां परमनिःश्रेयससाधनीभूतास्त्रयो योगा निरूपिताः । उक्तं हि भगवता श्रीमद्भागवत एकादशस्कन्धे—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायो नास्ति कश्चन ।। इति ।

अनेन त्रयाणामेव निःश्रेयससाधनत्वं प्रतिपादितम् । अष्टाङ्गयोगस्त्वेतत्त्रयान्तर्गत एव, अतो नोपायानां त्रिविधत्वे हानिः । तन्मध्ये कर्मयोगो न साक्षान्निश्रेयसहेतुः, "नास्त्वकृतः कृतेनैकः, "प्लवा ह्येते दृढा यज्ञरूपाः,"

यथा दृढैः कर्ममयैः क्रतुभिर्नाम नो निभैः ।
विद्यामान्वीक्षिकीं हित्वा तितीर्षन्ति भवार्णवम् ।।

इत्यादिश्रुतिस्मृतिभिः कर्मणो मोक्षं प्रत्यसाधनत्वप्रतिपादनात् । किन्तु "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिश्रुत्या चित्तशुद्धिद्वारा ज्ञानभक्त्योरुप-कारकतया परम्परयैव मोक्षसाधनत्वं कर्मणः । 'निर्भेदब्रह्मानुसन्धानरूपं ज्ञानं स्वतो मोक्षसाधनम्' इत्यत्र नास्ति कोऽपि विवादः । तथा भक्तियोगोऽपि मोक्षसाधनतयाऽङ्गीकृतः—"भक्तिरेवैनं नयति, भक्तिरेवैनं दर्शयति, भक्तिवशः पुरुषो भक्तिरेव भूयसीति", "विज्ञानघनानन्दघन-सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति" ।

"भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सताम् ।
भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् ।।"

इत्यादिश्रुतिस्मृतिभिः ।

अद्वयवादिमते "एकमेवाद्वितीयम्, तत्त्वमसि" इत्यादि तत्र धर्मादिकमुद्भावयति रज्जु-रूपाधिष्ठानज्ञानेन च यथाऽज्ञाननिवृत्त्या तत् कार्यमपीहापि निवर्तते । तथा तत्रैवाद्वयब्रह्मणि अविद्यारोपितो द्वैतप्रपञ्चः पुनर्ब्रह्मज्ञानेन निवर्तते । अधिष्ठानतत्त्वसाक्षात्कारनिवर्तितत्त्वादकार्य-प्राप्तिज्ञानानाम् । एवमुताद्वयवादिमतेऽविद्यानिर्वृत्त्या जीवब्रह्मणोर्भेदापगमेन तयोरैक्यसिद्धौ भक्तिरपि स्वतो निरस्ता भवति, न हि कश्चित् स्वयमेव स्वं भजते ।

भेदवादिनां मते—

नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां सुखं शाश्वती नेतरेषाम् ॥
अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः····भुक्तभोगामजोऽन्यः ॥
"द्वा सुपर्णा सयुजा सखाया
समानं········ ········परिषष्वजाते,
तयोरन्यः···· ···· ···· ···· ···· ॥

इत्यादिश्रुतिभिर्जीवेशयोर्भेदावगमात् तेषां मते भगवत्प्राप्तौ परमोपायभूता भक्तिरपि सुस्थिरैव भवेत् । केवलाद्वयमते च ब्रह्म निःशक्तिकमेव, किन्तु द्वैतिभिः—"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुत्या ब्रह्मणि स्वाभाविकी नित्या शक्तिरेवाङ्गीक्रियते, अतस्तन्मते शक्तिमदेव परतत्त्वं भवति; किन्तु वैष्णवाचार्याणां मते शक्तिस्वीकारेऽपि शक्तिमदाश्रितैव शक्तिः स्वतन्त्रा, शक्तिशक्तिमतोश्चाभेदात् स्वरूपान्तरभूतैव शक्तिः । एवं च न "एकमेवाद्वितीयम्" इत्यादिश्रुतिप्रतिपादिताद्वयत्वहानिः ।

एतदभिप्रेत्यैवोक्तं श्रीमता जीवगोस्वामिपादेन "अद्वयत्वभूतास्य स्वयंसिद्धतादृशातादृशतत्त्वान्तराभावात् सुशक्त्यैकसहायत्वात् परमाश्रयं तं विना तासामसिद्धत्वाच्च"इति । जीवलक्षणं तत्त्वान्ध्रुवं तादृशं चिद्रूपमपि न स्वयं सिद्धम्, मायालक्षणं तत्त्वान्तरस्थं तादृशमचिद्रूपमपि न स्वयंसिद्धम्, अतस्तादृशातादृशतत्त्वान्तराभावादद्वयत्वं सिद्धम् । एवं च एतन्मते जीवेशयोश्चिल्लक्षणया जात्यैवाभेदः, स्वरूपतस्तु भेदो वर्तते, अत एवाभेदेन चिन्तयितुमशक्यत्वाद् भेदः । भेदेन च चिन्तयितुमशक्यत्वादभेदः, तौ चाचिन्त्यावित्यचिन्त्यभेदाभेदवाद एव श्रीजीवगोस्वामिपादेन स्वीकृतः । एवं च न भेदपराणामभेदपराणां वा श्रुतीनां व्याहृतिः ।

किञ्च, जीवेशयोर्भेदस्य नित्यत्वे स्थिते तन्मते भक्तिरपि नित्यैव भवति, अतस्तन्मते मोक्षदशायामपि भक्तिरनुवर्तत एव, उद्धृतमुत श्रीधरस्वामिपादेन········भाष्ये उक्तं श्रीशङ्कराचार्यपादानां वचनम्—"मुक्ता अपि लीलया विग्रहं कृत्वा भगवन्तं भजन्ते ।" इति ।

सा च भक्तिर्नित्यापि सत्सङ्गद्वारेणाधिकानां हृदये आविर्भवति, अतः सत्सङ्ग एव भक्तेः परं निदानम्—

"भवापवर्गो भ्रमतो यदा भवेज्जनस्य तर्ह्यच्युत सत्समागमः ।
तत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥
नैषां मतिस्तावदुरुक्रमाङ्घ्रिं स्पृशत्यनर्थापगमो यदर्थः ।
महीयसां पादरजोभिषेकं ···· ···· न वृणीत यावद् ॥

इत्यादिश्रीमद्भागवतचरणजातैरवगम्यते ।

अत्र च यदा सत्सङ्गमो भवेत्, तदा भवापवर्गो भवेदिति वक्तव्ये वैपरीत्येन निर्देशस्तत्र सत्सङ्गमस्यात्यावश्यकहेतुत्वे विवक्षयेति मन्तव्यम् ।

अत्रेदं विवेचनीयम्—यत्र च नोपलभ्यते सत्सङ्गस्तत्राप्याधुनिकः प्राक्तनो वा पारस्परिको वा अनुमेय एव सः । यद्यपराधो वर्तते, तदा तद्दोषेण सत्सु निरादराणां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तादृशपुरुषाणां तद्दोषेण शान्त्यर्थं सत्सङ्गस्य भक्तिशरणतायां सतां कृपा साहाय्यमपेक्षते। निरपराधत्वे सति तु सत्सङ्गेनैव जातपरमोत्तमदृष्टीनां तेषां मनसोऽवधानाभावेऽपि तत्सङ्गमात्रमेव कारणम्। एवञ्च सत्सङ्गमन्तरेणानादिसिद्धभगवद्भजनमयनदैमुख्यवतां जीवानां भगवदुन्मुखता नैव सम्भवेत्।

न च भगवत्कृपैव भक्त्याविर्भावे प्राथमिकं कारणमिति वाच्यम्। कृपारूपश्चेतोविकारो हि परदुःखस्य स्वचेतसि बोधाज्जायते। भगवतस्तु परमानन्दरूपत्वेनापहतकल्मषत्वेन च श्रुतौ जीवविलक्षणत्वसाधनात् तेजश्शालिनि सूर्ये तिमिरायोगवत् तस्मिन्नपि तमोमयदुःखस्पर्शासम्भवेन तत्र कृपाया जन्मासम्भवः। भगवत्कृपा त्वेवात्र मम शरणमिति दैन्यान्तिकार्भक्तसम्बन्धेनैव जायते, न तु सांसारिकदुःखदर्शनेन, अतः सत्कृपैवाश्रयते। अन्तोऽपि तदानीं यद्यपि संसारे दुःखैर्न स्पृश्यत एव, अथापि कदाचिदपि स्मरेयुरतस्तेषां सांसारिकेऽपि कृपा भवति, यथा श्रीनारदस्य नलकूबरमणिग्रीवयोः।

एवञ्च सत्सङ्गवाहना सत्कृपावाहना वा भक्तिः साधकानां हृदये विकासं प्राप्नोति। तद्विकासे च क्रमभेदो वर्तते। तत्र श्रीमद्भागवते प्रथमस्कन्धे श्रीनारदोपवर्णितं स्वचरितमवलम्ब्य श्रीधरस्वामिपादप्रदर्शितोऽयं क्रमो यथावन्निरूप्यते—

'प्रथमं महतां सेवा, ततस्तत्कृपा, ततस्तद्धर्मश्रद्धा, ततो भगवत्कथाश्रवणम्, ततो भगवति रतिः, तया च देहाद्वयविवेकात्मज्ञानम्, ततो दृढा भक्तिः, ततो भगवत्तत्त्वज्ञानम्, ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भावः' इति।

तत्र मधुसूदनसरस्वतीपादेन श्रीधरस्वामिपादानां क्रम एव प्रायो गृहीतः। तथाहि उक्तं तेन तदीये भक्तिरसायनग्रन्थे—

प्रथमं महतां सेवा तद्दयापात्रता ततः।
तेषां धर्मेषु रतिस्ततो भक्तिगुणस्तुतिः॥
ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्ततः।
प्रेमवृद्धिपरानन्दे तस्यामाक्रीडनं ततः॥
भगवद्धर्मनिष्ठातः स्वस्मिन् तद्गुणशालिता।
प्रेम्णोऽथ परमाकाष्ठेत्युदिता भक्तिः भूमिका॥

एष नवक्रमः श्रीमद्रूपगोस्वामिचरणमनुसारिणा श्रीमद्विश्वनाथचक्रवर्तिपादेन किञ्चिद् विलक्षणतयोपवर्णितः। तथाहि—

सतां कृपा महत्सेवा श्रद्धागुरुपदाश्रयः।
भजनेषु स्पृहा भक्तिरनर्थापगमस्ततः॥
निष्ठारुचिरा या सा·····रतिप्रेमानुदर्शनम्।
हरेर्माधुर्यानुभव इत्यर्था··············॥ इति।

भजधातोर्भावे क्तिन् प्रत्ययेन भक्तिरिति पदं सिद्धम्। तस्यार्थस्तु लक्षणं·······स्वरूपलक्षणञ्च गरुडपुराणे—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विष्णुर्भक्ति प्रवक्ष्यामि यया सर्वमवाप्यते ।
यथा भक्त्या हरि·················केनचित् ॥
भज इत्येष वै धातुःसेवायां परिकीर्तितः ।
तस्मात् सेवा बुधैः प्रोक्ता भक्तिसाधनभूयसी ॥ इति ।

अत्र यया सर्वमवाप्यते इति तटस्थलक्षणम् । द्वितीयश्लोके च सेवाशब्देन स्वरूपलक्षणम् । पितृभक्तिः मातृभक्तिः, पतिभक्तिरित्यादि काचिद् भक्तिरेव, किन्तु न पारमार्थिकी, तासामुतापारमार्थिकं नश्वरं फलम्—

"देवान् देवयजो यान्ति पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥" इति ।

श्रीभगवद्भक्तेर्न तत् फलम्, परं चरमं वा, अतस्ताः पित्रादिभक्त्यो न मुख्यतो भक्तिपदेनाभिहिताः । तर्हि किं नाम भक्तिरित्याकाङ्क्षायां श्रीगोपालतापिनीस्तुतिः–भक्तिरस्य भजनं तदीहा तत्रोपाधिनैराश्येनातस्मिन्, अतः कल्पनमेतदेव नैष्कर्म्यमिति । अस्य भगवतो भजनं भक्तिरिति । यथाकथञ्चित् सम्पदादिलाभेच्छया भगवद्भजनमपि भक्तिरेव, किन्तु सा सकामा एव, न निष्कामा । सकामा भक्तिश्च अग्रजैव, सा च एकाशीतिप्रकारा श्रीमद्भागवते तृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादादवगम्यते । तत्र च मोक्षकामनयापि या भक्तिः सा हि सात्त्विकी, श्रेष्ठा अग्रजैव स्यात्, न निर्गुणा । उक्तं च श्रीधरस्वामिभिः "धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्" इत्यादिश्रीमद्भागवतीयद्वितीयपद्यव्याख्याने—"प्रशब्देन मोक्षाभिसन्धिरपि निरस्त" इति । एवं च 'भक्तिरस्य भजनम्' इत्यत्र लक्षणे उक्तम् । श्रीकृष्णस्यानुकूल्येन श्रवणादिका भक्तिर्भजनम् । तथामुष्मिन् भगवति चित्तान्तरज्ञानमुत, अतः कल्प्यते अनुरज्यते अर्प्यतेऽनेनेति निरुक्तेः, तादृशश्रवणादिहेतुकभाव इत्यर्थः ।

निर्गुणत्वसिद्धये आह—तदीहा सूत्रोपाधिनैराश्येनेति, कृष्णस्य फलाभिलाषराहित्येन तन्मात्रमपहाय जायमानमित्यर्थः । एषा एव भक्तिरनन्याख्ययाभिहिता भवति, अकामेषु भक्तियोगेषु फल एवानुरागः, न तु विष्णौ, फलालाभेन भक्तित्यागात् । शतपथश्रुतावपि—

"स होवाच याज्ञवल्क्यस्तत्····
····द्वितीय प्रेम्णा हरिं भजेत्" ।

प्रेम्णा प्रीतिमात्रकामनया यदान्तर्हितं तस्मै इत्यर्थः । शाण्डिल्यभक्तिसूत्रे च "सा परानुरक्तिरीश्वरे" इति लक्षणम् ।' अत्रापि निष्ठामेव भक्तिरभिधीयते । देवहूतिमात्रा भगवता श्रीकपिलदेवेन चोक्तं भक्तिलक्षणम्—

सद्गुणस्तुतिमात्रेण मयि सर्वगुणाशये ।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।
अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे ॥
···· ···· ···· ···· ···· ····सामीप्यैकत्वमप्युत ।
दीयमानं ···· ···· विना मत्सेवनं जनाः ॥ इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अन्यत्र च तेनैवोक्तम्—

देवानां गुणलिप्सानामानुश्रविककर्मणाम् ।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या ॥
अनिमित्ता भगवती भक्तिः सिध्यैर्गरीयसी ।
जरयत्याशु या कोशं निगीर्णमनलो यथा ॥ इति ।

सर्वत्रैवानन्यभक्तेरेव लक्षणमभिहितम् ।

श्रीकपिलदेवप्रोक्तलक्षणमनुसृत्य श्रीमधुसूदनसरस्वतीपादेनोक्तं भक्तिलक्षणम्—

··· तस्य भगवद्धर्मं धारावाहिकतां गता ।
सर्वेशे मनसोवृत्तिर्भक्तिरित्यभिधीयते ॥ इति ।

तन्मते तु प्रातिकूल्यस्यापि भक्तित्वमङ्गीकृतम् । तदुक्तिश्च "जगद्धर्मश्च भगवद्गुण-श्रवणं ननु धर्मबुद्धया तदनुष्ठानपर्यन्तमपेक्षितम्" ।

"तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्" इत्यत्रापि "केनाप्युपायेनेति" धर्म-बुध्यानुष्ठितेनायत्तसिद्धेन वा भगवद्गुणश्रवणेनेत्यर्थः । तेन शिशुपालादौ । नाव्याप्तिरिति । अत्र न सम्मतिः श्रीमद्रूपगोस्वामिचरणानाम् । निरुक्तं श्रीगोपालतापिन्याद्युक्तलक्षणमनुयायि च । तदुक्तलक्षणम्—

अन्याभिबाधिता शून्यं ज्ञानधर्माद्यनावृतम् ।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमम् ॥ इति ।

अत्र च 'आनुकूल्येन कृष्णानुशीलनम्' इत्यनेन प्रातिकूल्ये भक्तित्वाप्रसिद्धेः । भजनप्रतिकूले मम भावे भक्तित्वमत्यन्तमसङ्गतमेवेति मन्तव्यम् ।

.... भक्तिश्चैषा ।
क्लेशघ्नी सुभदा मोक्षयुक्ताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषान्ता श्रीकृष्णाकर्षिणी च सा ॥

इति गुणषट्कयुता परमानन्दमयमपि भगवन्तमत्यर्थं प्रीणयति ।

ननु निरतिशयनित्यानन्दस्य भगवतः कथं तया सुखमुत्पद्यते, निरतिशयत्वनित्यत्वयो-र्विरोधादिति चेन्न, शास्त्रे खलु निरतिशयानन्दं नित्यत्वमुत भगवतः श्रूयते भक्तेरपि तत्प्रीति-हेतुत्वं श्रूयते, तत एवं गम्यते तस्य परमानन्दैकरूपस्य स्वपरानन्दिनी स्वरूपभक्तिर्या ह्लादिनी नाम्नी वर्तते, प्रकाशवस्तुनः स्वपरप्रकाशनशक्तिवत् तत्परमवृत्तिरूपैषा भक्तिः, भगवान् स्ववृन्दे निक्षिपन्नेव नित्यत्वं वर्तते । तत् समुद्रेण च स्वयमतितरां प्रीणातीति । भगवत्प्रीणनहेतुत्वादेव न सा भक्तिः प्राकृतसत्त्वमयज्ञानानन्दरूपा, भगवतो मायावश्यत्वाश्रयणात्, स्वतः पूर्णत्वाच्च । अपूर्णो हि जीवः प्राकृतं ज्ञानानन्दम् इच्छति तदर्थमुद्यतते च । नापि भगवद्दत्तानन्दरूपया तया आनन्दस्वरूपस्य भगवतेऽतिशयासिद्धेः । नापि चैव ज्ञानानन्दरूपा, जैवयोर्ज्ञानानन्दयोः क्षोदिष्ठत्वाद् अतः स्वरूपशक्तिवृत्तिरूपैवैषा भक्तिरिति मन्तव्यम् । अत एवास्य प्रीतिरूपस्यापि भगवतो भक्त्या प्रीणनीयत्वमाह श्रीमद्भागवतम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत् प्रीणनाद् बर्हिषि···· ····

···· ···· ···· ···· ।

प्रीणेत सद्यः स हि विश्वबीजः

प्रीतिः स्वयं प्रीतिमगात्········ ॥

परमतत्त्वसाक्षात्कारान्तकस्य मोक्षस्य परमपुरुषार्थत्वं श्रीशङ्कराचार्यपादादीनामभिमतम् । अतस्तन्मते कैवल्यादिलक्षणमोक्ष एव परमप्रयोजनम् । वैष्णवाचार्याणां मतेऽपि भगवत्साक्षात्कारमात्रस्यापि यद्यपि पुरुषप्रयोजनत्वम्, तथापि तस्मिन्नपि साक्षात्कारे निरुपाधिप्रीत्यास्पदत्वस्वभावस्य प्रियत्वधर्मानुभवं विना साक्षात्कारोऽप्यसाक्षात्कार एव ।

माधुर्यं विना दुग्धम् ···· ···· ···· ।

अतस्तन्मते प्रीतिमयी सेवा एव परमपुरुषार्थत्वेनाभिमता । सेवासुखानुभविनां मोक्षानादरश्रवणात् । तथाहि श्रीमद्भागवते तृतीयस्कन्धे श्रीमदुद्धववचनम्—

'को न्वीशते पादसरोजभाजा

सुपूर्ण ···· ···· ···· चतुर्ष्वपीह ।

तथापि नाहं प्रवृणोमि भूमन्

भवत्पदाम्बुजनिषेवणोत्सुकाः'' ॥ इति ।

हयशीर्षपाञ्चरात्रे च—

न धर्मं काममर्थं वा मोक्षं वा वरदेश्वर ।

प्रार्थये तव पादाब्जे दास्यमेवाभिकामये ॥

किन्तु दुःखहानिः सुखावाप्तिश्च पुरुषार्थ इत्येके । तद्वास्यं यथा श्रीमद्भागवते—

अशेषसंक्लेशसमं विधत्ते········

गुणानुवादं श्रवणं मुरारेः ॥ इति ।

द्वितीयं तु यथा तत्रैव—

एकान्तिनो यस्य न कञ्चनार्थं वाञ्छन्ति ये वै भगवत्प्रपन्नाः ।

अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्त आनन्दसमुद्रमग्नाः ॥ इति ।

अतस्तत्रोक्तं पञ्चमस्कन्धे—''मधुद्विट्सेवानुरक्ते मनसामभावोऽपि फल्गुः'' इति । ''धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्'' इत्यादिपद्यव्याख्याने 'प्रशब्देन मोक्षाभिसन्धिरपि निरस्तः' इत्युक्तवता श्रीधरस्वामिपादेन तदेव च व्यक्तम् । अत्र भगवद्धर्मे मोक्षाभिसन्धिरपि कैतवम्, तात्पर्यान्तरादित्यर्थं च भगवत्स्वरूपशक्तिवृत्तिरूपा चेयं प्रीतिर्नित्या भगवदेकशरणस्य परमार्तस्य हृदये स्वत एवाविर्भूय असत्त्वातिशयेन नितरां पुष्टा भवति । साधकस्य हृदये तस्या आविर्भाव एव जन्म । तल्लक्षणं तूक्तं श्रीमता रूपगोस्वामिचरणेन—

अस्य मसृणितः स्वान्तो ममत्वातिशयाश्रितः ।

भावः स एव सान्द्रान्तो बुधैः प्रेमा निगद्यते ॥ इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तथाहि उक्तम्—

अनन्यममताविष्टो''''ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्म प्रह्लादोद्धवनारदैः ॥ इति ।

निरुक्तो भाव एव "सान्द्रान्तो निबिडस्वरूपप्रथमदशापेक्षायां परमानन्दात् ···· ···· ···· प्रेमा भवतीत्यर्थः" । भावश्चैवम्—

"शुद्धसत्त्वविशेषान्ता प्रेम सूर्य्यांशुसाम्यभावम् ।
रुचिभिश्चित्तमालम्ब्य कृदर्थो भाव उच्यते" ॥ इति ।

अत्र शुद्धसत्त्वं नाम भगवतः''''स्वरूपशक्तेः सम्विदाख्यावृत्तिः' । एवञ्चार्थः कृष्णस्य स्वरूपशक्तिरूपशुद्धसत्त्वविशेषो यः स एवान्ता तन्नित्यप्रियजनाधिष्ठानकतया नित्यसिद्धस्वरूपं यस्य सः ।

प्रेमलक्षणे उक्तम्—"भावः स एव सान्द्रान्तो बुधैः प्रेमा निगद्यते ।" इति प्रेमामरतयोर्भावरूपे जाते एव—

क्षान्तिरव्यर्थकालत्वं विरक्तिर्मानशून्यता ।
आशाबद्धः स सूत्कृष्टा नामगाने सदा रुचिः ॥
आसक्तिस्तद्गुणाख्याने प्रीतिस्तद्वसतिस्थले ।

इत्यादयोऽनुभवाः स्युरित्यनेनैव भावस्य परिचयो लक्ष्यते । अयमेव भावः प्रेमा स्यात्, स एव गौडीयवैष्णवानां परमपुरुषार्थ इत्यलं विस्तरेण ।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघुग्रन्थमाला–२२

अज्ञातकर्तृकः

जातकसारः

सम्पादकः

डॉ० मुरलीधरचतुर्वेदः

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः

वै० सं० २०३१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भूमिका

अथेदानीमुमामहेश्वरसंवादरूपोऽद्यावध्यमुद्रितश्च जातकसारनामको ग्रन्थः सम्पाद्यते। ग्रन्थस्यास्य तिस्रो मातृकाः पूर्णा विराजन्तेऽस्मिन् सरस्वतीभवनग्रन्थागारे। सम्पादनावसरे तासाम् [सं० ३६४८२, ३५२०१, ३६०३१] उपयोगः क्रमेण क० ख० ग० संज्ञया कृतोऽस्ति। अस्य ग्रन्थस्य रचनाकालविषये किमपि निर्णेतुं न शक्यते।

ग्रन्थेऽस्मिन् भावानां दशादीनाञ्च शुभाशुभफलकथनानन्तरं बालारिष्टवर्णनमस्ति। अत्र चतुर्थ-दशम-पञ्चम-नवमभावानां शुभदत्वम्, तृतीय-षष्ठ-अष्टम-लाभ-व्ययभावानामशुभप्रदत्वं च वर्णितमस्ति। तथा केचन सिद्धान्ता ग्रन्थकारस्य स्वबुद्धिप्रसूता एवोपलभ्यन्ते। ये नान्यत्र कुत्रापि दरीदृश्यन्ते। यथा—'राहुकेत्वोश्च सर्वेऽपि राशयः स्वगृहाः स्मृताः' इति।

अत्र मध्यपाराशरी-जातकपारिजातादिग्रन्थानामुद्धरणानि समुपलभ्यन्ते, तेषां निर्देशो मया टिप्पण्यां कृतोऽस्ति। आशासे च यल्लघुग्रन्थमालायां प्रकाशनेन जन्माङ्गफलादेशे ग्रन्थोऽयं सहायको भविष्यतीति।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,
वाराणसी
श्रावणपूर्णिमा
सं० २०३३

विदुषामनुचरः
मुरलीधरचतुर्वेदः
सरस्वतीभवनम्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणी

क्र० सं०	विषयाः		श्लोकाङ्काः
१.	उमाप्रश्नः	...	१–२
२.	महादेवस्योत्तरम्	...	३–५
३.	पूर्वमायुर्निश्चयं कृत्वा पश्चात् फलम्	...	६
४.	भावस्थितगृहस्यैव पूर्णफलदत्वम्	...	७
५.	भावसंज्ञा	...	८–१०½
६.	भावेषु पञ्चभावा अशुभदाः	...	१०½ १२
७.	शुभराशीनां भावाः	...	१३
८.	केन्द्रेषु चतुर्थदशमौ शुभदौ	...	१४
९.	केन्द्रत्रिकोणयोः संज्ञा, तथा तयोः संयोगेन राजयोगः	....	१५
१०.	बलिना लग्नाधिपेन दीर्घयुःप्राप्तिः	...	१६
११.	कोणपेन युतस्य लग्नेशस्य फलम्	...	१७
१२.	रन्ध्रपेण युतस्य लग्नेशस्य फलम्	...	१८
१३.	चन्द्रकृतारिष्टम्	...	१९
१४.	राहुकृतारिष्टम्	...	२०
१५.	रन्ध्रलाभयुतस्य भावेशस्य फलम्	...	२१
१६.	कोणपयुतस्य भावेशस्य फलम्	...	२२
१७.	परस्परत्रिकोणेशयोः सम्बन्धेन फलम्	...	२३
१८.	त्रिकोणेश-केन्द्रेशयोः सम्बन्धेन फलम्	...	२४–३१
१९.	अष्टमेशेन दृष्ट-युतभावफलम्	...	३२
२०.	लाभेशयुत-दृष्टसप्तमेशस्य फलम्	...	३३
२१.	अरिष्टज्ञानम्	...	३४–३५
२२.	राहुकेतू संयोगेन फलदौ	....	३६–४१
२३.	त्रिकोणेशसंयोगेन फलम्	....	४२
२४.	भावेशवशेन भावहानिः	....	४३

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२५.	धनभावस्थितराहुफलम्	....	४४
२६.	भावेशस्योच्चत्वनीचत्ववशेन फलभेदः	....	४५
२७.	नीचस्थितग्रहफलम्	....	४६
२८.	पुनः पार्वतीं प्रति महादेवस्य प्रश्नः	....	४७
२९.	दशाज्ञानाय पार्वतीप्रश्नः	....	४८
३०.	महादेवस्योत्तरम्	....	४९
३१.	नक्षत्रदशायाः शुभदत्वम्	....	५०
३२.	दशाकथनम्	....	५१–५२
३३.	ग्रहाणां नृपामात्यादिसंज्ञा	....	५३–५४
३४.	पूर्णमध्याल्पराजयोगः	....	५५–५६
३५.	अस्तग्रहस्य, राहुग्रस्तग्रहस्य च दशाफलम्	....	५७
३६.	ग्रहस्थितिवशेन दशाफलम्	....	५८–६६
३७.	संयोगस्य द्विविधत्वम्	....	६७–६८½
३८.	बालारिष्टम्	....	६८½–७१

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

जातकसारः

[1][अथोमामहेश्वरसंवाद (रूपं) जातकसारो लिख्यते]

श्रीदेव्युवाच

देव देव महादेव सर्वज्ञ शशिभूषण ।
ज्योतिषार्णवपीयूषं संक्षेपेण वदस्व मे ॥ १ ॥
अनुग्रहार्थं लोकस्य मयि कारुण्यवत्सल ।
दैवज्ञशास्त्रसारञ्च फलभागं वदस्व मे ॥ २ ॥

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि सावधानेन तच्छृणु ।
सप्तविंशतिऋक्षाणां राशयो द्वादश स्मृताः ॥ ३ ॥
सूर्यादीनां ग्रहाणां च नीचोच्चस्थानता स्मृता ।
राहुकेत्वोश्च [2]सर्वेऽपि राशयः स्वगृहाः स्मृताः ॥ ४ ॥

---

१. कोष्ठान्तरगतोंऽशः क० ख० पु० नोपलभ्यते ।

२. ग्रन्थान्तरेषु विपरीतं दृश्यते, यथा—बृहत्पाराशरहोराशास्त्रे (४७ अ०, ३५–३६)
राहोस्तु वृषभं केतोर्वृश्चिकं तुङ्गसंज्ञकम् ।
मूलत्रिकोणकं ज्ञेयं युग्मं चापं क्रमेण च ॥ ३५ ॥
कुम्भाली च गृहौ प्रोक्तौ कन्यामीनौ च केनचित् ।
जातकपारिजाते (१ अ०, २८)—
कुम्भस्त्रिकोणं फणिनायकस्य तुङ्गं नृयुग्मं रमणीगृहं स्यात् ।
प्रश्नभैरवे च (जा० पा० टी० १।२८)—
अङ्गीकृतं सौम्यगृहं सुहृत्त्वात् कन्याह्वयं तच्च विधुन्तुदेन ।
तत्सप्तमं यत् शिखिना गृहीतं मीनाह्वयञ्चेति बुधा वदन्ति ॥
स्यात् सिंहिकायास्तनयस्य तुङ्गं नृयुग्मसंज्ञं बुधदैवतञ्च ।
पुच्छस्य केतोर्गदितञ्च तुङ्गं तत्कार्मुकाख्यं गुरुदैवतञ्च ॥
ज्योतिषसारे च (९।१)—
कन्याराहोर्गृहं तथा । राहुर्युग्मे तु चापे च तमोवत्केतुजं फलम् ।
भावकुतूहले च (१।९)—
'मिथुने तमसः शिखिनो धनुषि प्रथमे बुधभे गुरुभे भवनम् ।' इत्यादिः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जन्मकाले तु संप्राप्ते लग्नं निश्चित्य पण्डितः ।
तस्मिन् काले खेचराणां चारं निश्चित्य योजयेत् ॥ ५ ॥
[1]पूर्वमायुः परीक्ष्यैव[2] पश्चाल्लक्षणमारभेत ।
नो चेत् तल्लक्षणज्ञाने आयासो व्यर्थमाप्नुयात् ॥ ६ ॥
[3]भावप्रवृत्तौ हि फलप्रवृत्तिः पूर्णं फलं भावसमांशकेषु ।
ह्रासक्रमाद् भावविरामकाले भावस्य नाशं कथयन्ति तज्ज्ञाः ॥ ७ ॥
प्रथमं लग्नभावं स्याद् द्वितीयं धनमेव च ।
तृतीयं भ्रातृभावं स्याच्चतुर्थं मातरं तथा ॥ ८ ॥
पञ्चमञ्च त्रिकोणं स्यात् षष्ठमं शत्रुसंज्ञकम् ।
जायास्थानं सप्तमं स्यादष्टमं निधनं तथा ॥ ९ ॥
नवमञ्च त्रिकोणं स्यात् तदेव पितृसंज्ञकम् ।
दशमं कर्मसंज्ञं स्याल्लाभमेकादशं तथा ॥ १० ॥
द्वादशञ्च व्ययस्थानमिति भावाः प्रकीर्त्तिताः ।
तेषां मध्ये भावपञ्च दुःखदायीति कथ्यते ॥ ११ ॥
[4]लाभं तृतीयं रन्ध्रञ्च शत्रुस्थानं व्ययं तथा ।
एतद्योगेन यो भावस्तन्नाशं प्राप्नुयाद् ध्रुवम् ॥ १२ ॥
[5]चत्वारो राशयो भद्राः केन्द्रकोणशुभावहाः ।
तेषां संयोगमात्रेण अशुभोऽपि शुभो भवेत् ॥ १३ ॥
[6]केन्द्राश्चतस्रो विख्याता ऋषिभिः परिकीर्त्तिताः ।
तेषां मध्ये तु शुभदौ कर्मबन्धुभसंज्ञकौ ॥ १४ ॥
तावेव योगकर्तारौ शेषौ तु फलभागिनौ ।
[7]लक्ष्मीस्थानं त्रिकोणं स्याद् विष्णुस्थानं तु केन्द्रकम् ॥
तेषां संयोगमात्रेण चक्रवर्ती नृपो भवेत् ॥ १५ ॥
लग्नाधिपोऽपि बलवानशुभैरदृष्टः केन्द्रस्थितैः शुभखगैरवलोक्यमानः ।
[8]दोषानपोह्य सकलानपि भाग्यतश्च दीर्घायुराशिर (सु ?) भवेच्च नवेशयोगात् ॥१६॥

---

१. द्रष्टव्यं मध्यपाराशर्याम् (१।१०) ।
२. परीक्षेत इति ग० पु० पाठः ।
३. द्र० मानसागरी (श्रीपतिपद्धत्यनुसारेण भावचक्रानयने ५ श्लो०) ।
४. द्र० मध्यपाराशरी (१।११) 'येषां योगेन' इति पाठः ।
५. ,, ,, (१।१२) ।
६. ,, ,, (१।१३) । 'कर्मबन्धू विशेषतः' इति पाठः ।
७. ,, ,, (१।१६) ।
८. "मृत्युं विधूय विदधाति स दीर्घमायुः सार्धं गुणैर्बहुभिरूर्जितराजलक्ष्म्या ।"
इति पाठान्तरं जातकपरिजाते (४।८३) ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लग्नाधिपः कोणपसंयुतश्चेद् ददाति सौभाग्यमतीव कीर्तिम् ।
साम्राज्यलाभञ्च सुधर्मलाभं दीर्घायुराढ्यश्च सदा नराणाम् ॥१७॥
लग्नाधिपो रन्ध्रपसंयुतश्चेदल्पायुरैश्वर्यविनाशनञ्च ।
शुभैरदृष्टो यदि पापदृष्टः करोति जातं न चिरायुषञ्च ॥१८॥
[1]सुतमदननवान्त्यरन्ध्रलग्नेष्वशुभयुतो मरणाय शीतरश्मिः ।
भृगुसुतगुरुसौम्यचन्द्रदृष्टो यदि न भवेच्च चिरं प्रशान्तचित्तः ॥१९॥

लग्ने राहुः स्थितो यस्य लग्नपेन युतोऽपि वा ।
चन्द्रेण संयुतश्चापि भूतग्रहवशं नयेत् ॥२०॥
तत्तद्भावार्थकामेशो रन्ध्रलाभैर्युतो यदि ।
ईक्षितो वापि तत्पाके मरणं प्राप्नुयाद् ध्रुवम् ॥२१॥

धनाधिपः कोणपसंयुतश्चेन्महाधनी भूपतिभाग्ययोगः ।
दयानुकम्पी[2] बहुपोषकश्च विद्याधिको मन्दिरसौख्यवांश्च ॥२२॥

त्रिकोणपौ यदान्योन्यं संयुतौ वीक्षितो [तावपि] पि वा ।
तत्काले श्रियमाप्नोति [3]केन्द्रपेण विशेषतः ॥२३॥
दुष्टभावपसंयोगे एतेषां मिश्रमाप्नुयात् ।
[4][त्रिकोणपाभ्यां योगेन एतेषां मिश्रमाप्नुयात्] ॥२४॥
त्रिकोणपाभ्यां योगेन कर्मप उच्चसंस्थितः ।
यदि स्याद् राजराजेन्द्रो भवत्येव न संशयः ॥२५॥

त्रिकोणपाभ्यां यदि बन्धुनाथो युतोऽपि वा दृष्टियुतोऽपि वा स्यात् ।
साम्राज्यलक्ष्मीं लभते मनुष्यो विद्याधिको [5]मन्दिरसौख्यवांश्च ॥२६॥

मातृसौख्यप्रदश्चैव बन्धुपोषणतत्परः ।
गृहसौख्यप्रदश्चैव भोगवांश्च[6] जितेन्द्रियः ॥२७॥
केन्द्राधिपः कोणपेन संयुतो वीक्षितोऽपि वा ।
अमात्ययोगो[7] विख्यातस्तत्काले[8] श्रियमाप्नुयात् ॥२८॥
योगकाले उच्चभागे खेचरो यदि संस्थितः ।
तद्योगः पूर्णयोगः स्यान्न्यूने न्यूनत्वमाप्नुयात् ॥२९॥

---

१. द्र० जा० पा० (४।३८) ।
२. नुकम्पा क० पु० पाठः ।
३. पेन क० ख० पु० पाठः ।
४. कोष्ठान्तरगतोंऽशः ख० ग० पु० नास्ति ।
५. 'वाहनभाग्यवांश्च' इति ख० ग० पु० पाठः ।
६. 'भोग्यवान् स जितेन्द्रियः' इति ख० पु० पाठः ।
७. 'अमात्ययोगे' इति क० पु० पाठः ।
८. तत्पाके ख० ग० पु० पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कोणपाभ्यां केन्द्रपाभ्यां योगोऽयं सार्वभौमिकः ।
तस्मिन् जातो दासपुत्रः सार्वभौमो भविष्यति ॥३०॥
यस्मिन् भावे तु योगः स्यात् तदधोंशस्तु योगतः ।
तत्पाके श्रियमापन्नो भवत्येव न संशयः ॥३१॥
रन्ध्राधिपस्तु यं भावमीक्षितो [क्षते] सँस्थितोऽपि वा ।
[1]तद्भावपस्य दाये तु [2]शत्रुवृद्धिर्नृपाद् भवेत् ॥३२॥
लाभाधीशयुतो वापि ईक्षितो वापि कामपः ।
तत्पाके मृत्युमाप्नोति [3]रन्ध्रपेण युतोऽपि वा ॥३३॥
धनाधिपो नीचगतो रन्ध्रलाभौ न ईक्षितः [क्षते] ।
कामपस्तु तथैव स्यान्मृत्युमाप्नोति निश्चितम् ॥३४॥
पितृभावो मातृभावः पुत्रभावस्तथैव च ।
यः सर्वेषां भावपानामेतन्मात्रेण [4]निश्चयेत् ॥३५॥
आदित्यादिग्रहाः सप्त एते योगाधिपाः स्मृताः ।
राहुकेत्वोस्तथा नास्ति संयोगेन फलन्ति हि ॥३६॥
छायाग्रहौ राहुकेतू शुभयोगे श्रियं भवेत् ।
पापयोगे तु पापः[5] स्यादिति शास्त्रार्थनिर्णयः ॥३७॥
[6]विहगो राजयोगस्थो [7]राहुदृष्ट्या स्थितो यदि ।
अत्यन्तं श्रियमाप्नोति राहुपाके न संशयः ॥३८॥
[8][विहगाः पापयोगस्था राहुदृष्ट्या स्थिता यदि ।]
राहुपाके दुःखवन्तो भवन्त्येव न संशयः ॥३९॥
[9]राहुकेत्वोश्च संयोगे [10]दृष्टियोगो न जायते ।
[11]धनाधिपो बलेनापि फलं [12]प्राप्नोत्यसंशयः ॥४०॥

---

१. तद्भावं यस्य दाः''' इति क० पु० पाठः ।
२. नृपो इति ख० ग० पु० पाठः ।
३. पेन इति क० पु० पाठः ।
४. निश्चियेदिति ख० पु० पाठः ।
५. पापा इति ख० पु० पाठः ।
६. विहंगो इति ख० पु० पाठः ।
७. राहुं दृष्ट्वा ख० पु० पाठः ।
८. कोष्ठान्तरगतोंऽशः ख० पु० नास्ति ।
९. पद्यमिदं ख० पु० नास्ति ।
१०. दृष्टियोगेनेति ग० पु० पाठः ।
११. धनाधिपे इति ग० पु० पाठः ।
१२. प्नोति न संशयः इति ग० पु० पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

राहुप्रतिमया प्रोक्तं [क्तः] केतोरपि तथैव च ।
उभयोः ग्रहसंयोगे फलं निश्चिनुयाद् बुधः ॥४१॥
त्रिकोणपेन संयोगं विना श्रेयो न विद्यते ।
एकेन वा कोणपेन द्वाभ्यां वा यस्तु भावपः ॥
तद्भावपस्य दाये तु शत्रुवृद्धिः [1]प्रजायते ॥४२॥
यद्भावस्था रन्ध्ररिःफारिनाथा यद्भावेशा रन्ध्ररिःफारियाताः ।
तेषामीशा [2]संयुताश्चाथ [3]दृष्टास्तत्तद्भावं नाशतामेति नित्यम् ॥४३॥
धनस्थानगते राहौ तदीशे शत्रुभे स्थिते ।
तस्मिन् दाये तु [4]हानिः स्यात् पशुधान्यधनानि च ॥४४॥
यस्मिन् भावाधिपे उच्चे तद्भावो वृद्धिमाप्नुयात् ।
यस्मिन् भावाधिपे नीचे तद्भावं नाशमाप्नुयात् ॥४५॥
नीचस्थितो जन्मनि यो ग्रहः [5]स्यात् तद्राशिनाथस्य च [6]दायकाले ।
तद्भावनाशं कथयन्ति तज्ज्ञाः पापेक्षितः पापसमन्वितो वा ॥४६॥
भावयोगाश्च कथिताः मया देवि सुनिश्चिता ।
[7]ततः परं पृच्छसि किं तद् वस्व शुभानने ॥४७॥

श्रीदेव्युवाच

नमस्ते देवदेवेश [8]सर्वलोकैकपूजित ।
एतेषां [9]भावयोगानां दशाः या [काः] फलदाः स्मृताः ॥४८॥

ईश्वर[10] उवाच

शृणु देवि प्रवक्ष्यामि सर्वलोकोपकारिणि ।
दशाश्च बहवः सन्ति केन्द्रकोणक्षपादयः ॥४९॥
तेषां[11] मध्ये ऋक्षदशा शुभदा फलदा स्मृता ।
यः खगो योगकर्त्ता स्याद् दशा तस्य शुभप्रदा ॥५०॥

---

१. न जायते इति ख० पु० पाठः ।
२. संयुतो चाथ क० पु० पाठः ।
३. भावो इति ख० पु० पाठः ।
४. घनादिनामिति ख० पु० पाठः ।
५. भावनाथस्येति ख० पु० पाठः ।
६. दाहकाले इति ख० पु० पाठः ।
७. इतः इति ख० पु० पाठः ।
८. पूजितमिति क० पु० पाठः ।
९. योगार्को क० पु० पाठः ।
१०. महादेव इ० खपु० भगवानिति ग० पु० पाठः ।
११. पद्यमिदं कपु० नास्ति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्माद् बलं ग्रहाणाञ्च सम्यक् संशोध्य बुद्धिमान् ।
कृत्तिकादीनि ऋक्षाणि सूर्यादीनां दशाः स्मृताः ॥५१॥
तेषां योगविशेषेण फलं प्राप्नोत्यसंशयम् ।
[1]राहुकेत्वोश्च संयोगे दृष्टियोगेन जायते ॥५२॥
स्थानाधिपबलेनापि फलं प्राप्नोत्यसंशयम् ।
राजग्रहौ सूर्यचन्द्रावमात्यो भौम एव च ॥५३॥
लिपिलेख्यादिभिः सौम्यो गुरुर्मन्त्री विचारतः ।
भार्गवोऽत्यन्तभोगी स्याच्छनिः सेव्याधिपो भवेत् ॥५४॥
यस्य[2] राज्ञः राजयोगो [गे] न्यूनत्वं तु [न] प्रजायते ।
तद्योगः पूर्णफलदो ह्यन्येषां दुर्बलो[3] भवेत् ॥५५॥
राश्यादौ योगपतिं नरेन्द्रं[4] प्रतिपद्यते ।
मध्ये मण्डलनाथं ग्रामपतिं चैव भवनान्ते ॥५६॥
अस्तगो यो खगो वापि राहुग्रस्तो यदा भवेत् ।
तत्पाके भावनाशः स्यादिति शास्त्रार्थनिश्चयम् ॥५७॥
भावेशाक्रान्तराशीश उच्चस्थः शुभवीक्षितः ।
तद्भावपस्य दाये तु राज्यं भवति निश्चितम् ॥५८॥
भावेशाक्रान्तराशीशो नीचगोऽस्तङ्गतोऽपि वा ।
पापैर्निरीक्षितो वापि तद्भावं नाशमाप्नुयात् ॥५९॥
भावेशाक्रान्तराशीशो राहुग्रस्तो यदा भवेत् ।
तत्पाके मृत्युमाप्नोति भावहानिश्च[5] जायते ॥६०॥
यद्भावे[6] रन्ध्रपे दुष्टे[7] तत्पतिर्नीचसंस्थितः ।
तत्पाके भावनाशश्च भवत्येव न संशयः ॥६१॥
नीचस्थितो जन्मनि यो ग्रहः स्यात् तद्राशिनाथो यदि स्वोच्चसंस्थः ।
तन्नीचपाके सुखमेति नित्यं[8] तेनेक्षितो वापि समन्वितो वा ॥६२॥
उच्चस्थितो जन्मनि यो ग्रहः स्यात् तद्राशिनाथो यदि नीचसंस्थः ।
तदुच्चपाकेष्वशुभं प्रयाति भावेक्षितो वापि विशेषतः स्यात् ॥६३॥

---

१. पद्यमिदं गपु० नास्ति ।
२. 'यस्य राजामचलतो न्यूनयोगेन जायते' इति कपु० पाठः । राजा ततोन्याश्च खपु० पाठः ।
३. स्वल्पदो इति कपु० पाठः ।
४. नरेन्द्रदंडयदिद्यते कपु०, दण्डपतिद्यममिति खपु० पाठः ।
५. भावनाशश्च इति खपु० पाठः ।
६. तद्भावे इति कपु० पाठः ।
७. दृष्टे इति खपु० पाठः ।
८. सत्यमिति ख० ग० पु० पाठः ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सप्तमाधिपतौ नीचे रन्ध्रपेण च वीक्षिते ।
तत्पाके मृत्युमाप्नोति भवत्येव न संशयः ॥६४॥
यः खगो दुष्टभावेशो योगदश्च समाश्रितः ।
तत्पाके श्रियमाप्नोति[1] सर्वारिष्टविनाशिनीम् ॥६५॥
यः खगः शुभभावेशः पापयुक्तेक्षितोऽपि वा ।
तत्पाके राज्यनाशः स्याद् देहनाशश्च जायते ॥६६॥
संयोगो द्विविधः प्रोक्तो [क्त] ईक्षितः संयुतोऽपि वा ।
तयोर्मध्ये तु फलदः पापानामीक्षणं परम् ॥६७॥
शुभानां संयुतं श्रेष्ठम् इति शास्त्रविदो विदुः ।
बालारिष्टाश्च बहवः सन्ति लोके मनीषिणाम् ॥
तेषां योगानहं[2] वक्ष्ये सावधानेन तच्छृणु ॥६८॥
लग्नाधिपो रन्ध्रपसंयुतश्चेन् तृतीयरन्ध्राधिप [ज ?] भावपानाम् ।
द्विसप्तमैकादशभावपानां पाके मृतिं सिद्धिमुपैति जन्तुम्[3] ॥६९॥
तत्तत्स्थानगतानाञ्च[4] पाके च मरणं भवेत् ।
तेषाञ्च शुभसंयोगे आयुर्वृद्धिः प्रजायते ॥७०॥
शैशवावस्थकाले[5] तु स्वप्नदोषश्च हानिकृत्[6] ।
इतरावस्थकाले तु रोगरूपेण बध्यते[7] ॥७१॥

॥ इति श्रीउमामहेश्वरसंवादे जातकसारः सम्पूर्णः ॥

---

१. मृत्युमा····इति खपु० पाठः ।
२. योगानि वक्षेऽहमिति ख० ग० पु० पाठः ।
३. जन्तून् खपु० पाठः । जन्तुः गपु० पाठः ।
४. त्तज्ज्ञानगता····इति कपु० पाठः ।
५. वस्तकाले कपु० पाठः ।
६. नाशकृत् गपु० पाठः ।
७. बाध्यते इति क० ख० पु० पाठः ।

●●●

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पञ्जीकरणसंख्या—६६८१।५७

सारस्वती सुषमा

सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयानुसन्धानपत्रिका

१. एषा देशे विदेशे च लब्धप्रसरा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठ-भाद्रपद-मार्गशीर्ष-फाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाना निबन्धाः प्रकाश्यन्ते।

५. प्रकाशितनिबन्धस्य प्रतिमुद्रणानां पञ्चविंशतिः, पत्रिकायाश्च सोऽङ्को दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

६. अस्यां पत्रिकायां विशिष्टानां हिन्दीसंस्कृताङ्गलग्रन्थानां समालोचनाः प्रकाश्यन्ते। तदर्थं ग्रन्थकृद्भिर्ग्रन्थस्य द्वे प्रतिकृती प्रेषयितव्ये।

७. 'कुलसचिव, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी-२२१००२ (उ०प्र०) इति सङ्केतेन ('बैंकड्राफ्ट' अथवा 'पोस्टल आर्डर' इत्येतेनैव) मूल्यं प्रेषणीयम्।

८. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी—२२१००२ (उ० प्र०) इति सङ्केतेन विधेयः।

प्रकाशकः—सञ्चालकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी-२२१००२ (उ० प्र०)
मुद्रकः—तारा प्रिंटिंगवर्क्स, कमच्छा, वाराणसी।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सुसंग्राह्याः केचन वेद-वेदाङ्गग्रन्थाः

क्रमसंख्या ग्रन्थनाम	मूल्यम्
१. **शुक्लयजुर्वेदकाण्वसंहिता**—संहितेयं खलु सायणभाष्यसमलङ्कृता साम्प्रतं मुद्रित-प्रायैव। ग्रन्थरत्नमिदं विविधैः पद-पाठ-टीकागतसन्दर्भसन्निवेश-विशिष्टैः टिप्पण्यादिभिः, अथ च विदुषा श्रीचिन्तामणिमिश्रमहोदयेन विरचितया गवेषणाप्रधानभूमिकया विविधैः परिशिष्टैश्च समेधित-मस्ति—	००
२. **अथर्ववेदे शान्तिपुष्टिकर्माणि**—श्रीमत्या डॉ० मायामालवीयया वैदिकवाङ्मयस्यानु-शीलनं कृत्वा विरचितो विविधाभिरानुसन्धानिकफलश्रुतिभिः प्रतिष्ठापितश्चायं गवेषणाप्रबन्धः—	८·००
३. **बौधायनशुल्बसूत्रम्**—[बोधायनाचार्यप्रणीतम्]। मुद्रितप्रायोऽयं ग्रन्थः श्रीव्यङ्क-टेश्वरदीक्षितविरचितया बोधायनशुल्बमीमांसाख्यया व्याख्यया, अथ च श्रीद्वारकानाथयज्वप्रणीतया बौधायनशुल्बसूत्रव्याख्यानाख्यया टीकया प्रभूतैः संवादात्मकैः रेखाचित्रैश्च सनाथीकृतः—	
४. **बृहत्संहिता**—[भागद्वयात्मिका] श्रीवराहमिहिराचार्यप्रणीता। ग्रन्थोऽयं श्रीभट्टोत्पल-विवृतिविभूषितः, अथ च विमर्शात्मकेनोपोद्घातेन समुल्लसितः।	प्रथमभागस्य मूल्यम्–१८·०० द्वितीयभागस्य मूल्यम्–२०·००
५. **स्कन्दशारीरकम्**—सामुद्रिकशास्त्रमधिकृत्य केनाप्यज्ञातनाम्ना विदुषा प्रणीतोऽयं ग्रन्थोऽज्ञातनाम्न्या टीकया पुरस्कृतोऽस्ति, अस्मिन् हि खलु ग्रन्थे शरीरस्थरेखापरीक्षणद्वारा सुकृतदुष्कृतयोरिष्टप्राप्तिसाधनयोर्भृशं विवेचनम् उपलभ्यते। पुस्तकमिदं गवेषणाप्रधानैः भूमिका-टिप्पणादि-विविधपरिशिष्टैर्नूनं स्वीयं महत्त्वं भजते—	१५·००
६. **अर्वाचीनं ज्योतिर्विज्ञानम्**—ग्रन्थोऽयं विदुषा श्रीरमानाथसहायमहोदयेन विनिर्मितः खल्वाधुनिकगवेषणापद्धत्या प्राच्यभारतीयगणितशास्त्राधुनिकभौतिक-शास्त्रयोरत्र तुलाबोधकं परीक्षणं कृतम्—	१३·००
७. **परिभाषेन्दुशेखरः**—[हैमवतीसंवलितः] वैयाकरणमूर्धन्यपण्डितश्रीयागेश्वरशास्त्रि-कृतया 'हैमवती' व्याख्यया समुद्भासितः। ग्रन्थरत्नमिदं सम्पूर्णानन्द-संस्कृतविश्वविद्यालयीयनव्यव्याकरणविभागीयैः 'उपाचार्य'(रीडर)-पदमलङ्कुर्वद्भिः श्रीकालिकाप्रसादशुक्लमहोदयैः विविधपाठभेद-टिप्पणी-परिभाषापाठानुक्रमणी-वर्णानुक्रमसूची-परिभाषाव्याख्यातृकृत-परिभाषापाठभेदप्रभृतिभिरुपादेयगवेषणामूलकभूमिकादिभिरुपस्कृतः—	४९·००

प्रकाशकः—निदेशकः, अनुसन्धानसंस्थानम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी–२२१००२
मुद्रकः—मुद्रणालय-व्यवस्थापकः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी–२२१००२

CC-0. Sampurnanand University Collection. Digitized by eGangotri